वरणादिर्योपिधामाय दर्शयामास रूपिणी मूर्तिमती श्रीरिव ताः स्त्रीर्दृष्ट्वा तासां तद्रूपस्यौदार्येण महत्त्वेन हृता श्री
कान्तिर्येषां ते १३ वृङ्ध्वं वृणीध्वं कं वयो वराकाः कं वेमा इति चेत्तत्राह सवर्णां समानरूपां नैकामस्मदनुरूपेति चेत्त
मा भवतु तथापि स्वर्गस्य भूषणरूपां १४ सुरवन्दिनः देवभृत्याः १५ इन्द्राय इन्द्रं प्रति नारायणबलमूचुः शक्रः त
त्रास त्रासं प्राप्तः विस्मितश्च तत्र विस्मितत्वे हेतुं निवा १६ भगवानेव नारायणांशत्वं स्तुवन्ति ताविवाह हंसस्वरूपीति दत्तः दत्ता
त्रेयः कुमाराः सनकादिः नः पिता ऋषभः च विष्णुरेकः कलयावतीर्णः सन्नात्मयोगमवदत् तेन विष्णुना हयास्ये हय
ग्रीवावतारे मधुभिदा सतानेन पलायितेन सनातनाः श्रुतयः सन्ना हृताः १७

१९ इत्युक्तो गंधर्वयक्षगुह्याः कौर्मे देवा हावताके ग्राहात् गजेंद्रममोचयत् मोचयामास एवमादौ यज्ञावतारनामसनातिं
च विभुः सितायुमनगनाकलयावलीणीरेत्यनुवर्तनीयं संस्तुवतः स्तुतिं कुर्वाणान् स्वर्वीनु बालखिल्यान् कश्यपार्थं
समिधाहरतो गोष्पदेनिमग्नानि देवलोपहसितान् उदधृत्यापदो मोचयत् तं नमसि वृत्रहत्या पापप्रविष्टं मोचयामास एवम्
इत्यादि हिंतानि रूद्रादेव स्त्रियस्ताष्ट्राश्च एवं दनेकावतारैः अंतरेषु सर्वे मन्वंतरेषु कलाभिर्मूर्तिभिर्भुवनानि
अदधात् अपालयत् इमां क्ष्मां समदात् ददौ हे दयालो कुलस्य अपायाय भार्गवरूपोग्निः समासोदाशरथिः सत्र समलंके
देवासुरे युधि च दैत्यपतीन्सुरार्थे हत्वांतरेषु भुवनान्यदधात्कलाभिः भूत्वाथ वामन इमामहरद्बलेः क्ष्मां
याच्ञाच्छलेन समदाददितेः सुतेभ्यः २० निःक्षत्रियामकृत गां च त्रिःसप्तकृत्वो रामस्तु हैहयकुलाप्ययभा
५ र्गवाग्निः सोब्धिं बबंध दशवक्त्रमहन्सलंकं सीतापतिर्जयति लोकमलघ्नकीर्तिः २१ भूमेर्भरावतरणा
य यदुष्वजन्मा जातः करिष्यति सुरैरपि दुष्कराणि वादैर्विमोहयति यज्ञकृतोतदर्हान् शूद्रान्कलौ क्षिति
भुजो न्यहनिष्यदंते २२ एवंविधानि कर्माणि जन्मानि च जगत्पतेः भूरीणि भूरियशसो वर्णितानि
महाभुज २३ इति श्रीभागवते एकादशे चतुर्थोध्यायः ४ राजोवाच भगवंतं हरिं प्रायो न भजंत्यात्म
वित्तमाः तेषामशांतकामानां का निष्ठा विजितात्मनां १ श्रीचमस उवाच मुखबाहूरुपादेभ्यः पुरु
षस्याश्रमैः सह चत्वारो जज्ञिरे वर्णा गुणैर्विप्रादयः पृथक् २ य एषां पुरुषं साक्षादात्मप्रभवमीश्वरं
न भजंत्यवजानंति स्थानाद्भ्रष्टाः पतंत्यधः ३ ॥
लोकापायांश्चिंते सवनयनिवर्तमानकालीनावतारत्वं धः २१ भाविनं रामकृष्णावतारमाह भूमेरिति बुद्धावतार
माह शूद्रानिति निहनिष्यति २२ इति भावार्थदीपिकायां चतुर्थोध्यायः ४ पंचमे भक्तिहीनानां का निष्ठा कोयुगे युगे इज्या
विधिरिति प्रश्नद्वयस्योत्तरमुच्यते तासेवतामस्तकुमारवृक्षीनानुपयरत्ननेन श्रीहरिभक्तिविमुखाधिपदे दृष्टापगा
तियांति प्रभक्तानां नवित्रामभवंनी मंके नहिं वे एकागमिभवती निष्ठे छतिभगवंतमिति हरिप्रायोत्मवित्तमाः अविजिता
त्मनामत एवाशांतकामानां का निष्ठा किं प्राप्यमित्यर्थः समनुकंपतो भगवतो नाद्यानुकूलो हरिणद्गतिर्याती
ति वक्तुं भगवतः सकाशात् वर्णाश्रमाणामुत्पत्तिमाह मुखेति गुणैः सत्वेन विप्राः सत्वरजोभ्यां क्षत्रियः रजस्तमोभ्यां वै
श्यः तमसा शूद्र इति य एषां मध्ये ये न भजंति ये चावजानंति आत्मनः प्रभवो जन्म यस्मात्तदभजनेन हृतत्वात्ताम

श्री॰
भा॰ द॰
टी॰
१३

नयेत्ताः तेभवद्विधानामनुग्राह्या इत्याह दूरइति हरेरूदूरे हरिकथाश्रवणं येषां ते अच्युतकीर्तनं येषां ते
दूरेस्वच्युतकीर्तनाश्चेति पाठान्तरं तत्र दूरे विदधाः स्वविचिकित्सया उपेक्षा दत्ताशयेनाह विप्रइति प्राप्ता अपि मुह्यन्ति कर्मफलेषु स
क्ता न तु पदं लक्षणमेतत् स्वाध्ययनादिना पिहरेः पादान्तिकं तद्भजनो नेमाधिकारं प्राप्ता अपि मुह्यन्तीति ता एव व्याचष्ट
तेति कुतः आम्नायवादाः अर्थवादाः तेन माहेकनया विधिनेयेषां ते नडवेर्गीताम् यामिमां पुष्पितां वाचं प्र
वदन्तिविपश्चितः वेदवादरताः पार्थनान्यदस्तीतिवादिन भक्तिमार्गादाद्यायनेषां माहेप्रपंचयन्निदति क

दूरेहरिकथाः केचिद्दूरे चाच्युतकीर्तनाः स्त्रियः शूद्रादयश्चैव तेनुकंप्या भवादृशां ४ विप्रो राजन्यवै
श्यौ वा हरेः प्राप्ताः पदान्तिकं श्रौतेन जन्मनाथापि मुह्यन्त्याम्नायवादिनः ५ कर्मण्यकोविदाः स्तब्धा
मूर्खाः पण्डितमानिनः वदन्तिचाटुकान्मूढा यया माध्व्या गिरोत्सुकाः ६ रजसा घोरसंकल्पाः का
मुका अहिमन्यवः दाम्भिका मानिनः पापा विहसन्त्यच्युतप्रियान् ७ वदन्ति तेन्योन्यमुपासितस्त्रियो
गृहेषु मैथुन्यपरेषु चाशिषः यजन्त्यसृष्टान्नविधानदक्षिणं वृत्त्यै परं घ्नन्ति पशूनतद्विदः ८ श्रि
या विभूत्याभिजनेन विद्यया त्यागेन रूपेण बलेन कर्मणा जातस्मयेनान्धधियः सहेश्वरान् सतोव
मन्यन्ति हरिप्रियान्खलाः ९

मस्तीत्यादिना ५ अकोविदाः यथा बंधकं न भवति तथा कर्तुमज्ञाः न चाभिज्ञानमस्ति चेति यतः स्तब्धाः नम्राः स
न्तीत्यादिना ५ अकोविदाः यथा बंधकं न भवति तथा कर्तुमज्ञाः न चाभिज्ञा ... अहमेवैतानमीमांसया
बुद्ध्येदस्तुः सतो अर्थाग्निपिपदितो वयमितिमानवन्तः अतः अपाम सोमममृता अभूम अक्षय्यं ह वै चातुर्मास्यया
जिनः सुकृतं भवति यत्र नोत्संभवति यत्र नोत्सन्नवणीतं स्यात्र ज्ञानि न्तो यरतन यस्मादिक यायया माध्व्या गि
रोत्सुकाः संतोष्टतात्तयाचाटुकानु अस्मरोभिः सह विचरध्यामरस्मादिप्रियान् शष्ठान्वदन्ति ६ ॥ ग्रे
नसोवामवेशय

किं वा तेषां कर्माभिनिवेशात्कामक्रोधपरं भोक्तृयोर्वहितरत्याह इयेतागत्यमतिघोरसंकल्पा अभिचारादिसंकल्पो येषां ते अहि
वन्मन्युर्येषां ते कामुकत्वं प्रपंचयति वदंतीति उपासिताः स्त्रियो यैः अन्यत्र हातेमैथुन्यमिथुनमेव परं येषां तेषु आदिषु
पुत्रैः गृहेषु तेषु आशिषो वदंति इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् इदमस्तीदमपि मे भविष्यति पुनर्धनमित्या
दिवत् दांभिकत्वं प्रपंचयति यजंतीति असृष्टान्नविधानदक्षिणं असृष्टाः न संपादिता अन्नविधानदक्षिणा यस्मिन् यथा
भवति तथा यजंति नदा वृत्त्यै जीविकार्थं परं केवलं पशून् घ्नंति अतद्विदः हिंसादोषानभिज्ञाः मानित्वं प्रपंचयति श्रियेति
श्रिया धनादिसंपदा विभूत्या संपत्त्या श्रियादिना जातो यः स्मयो गर्वस्तेन अंधा धीर्येषां ते ईश्वरसहितान् सतः अवम
न्यंते किं च एवं वर्तमाना अस्ते वेदं तन्मार्थं स्फुटमपि न जानंतीत्याह सर्वेष्विति केन रूपेणावस्थितं तदाह आत्मानमीश्वरं
प्रत्यगात्मतया ईश्वरतया चावस्थितं एवमप्यसंगतामाह यथा खं पुरुषार्थतामाह अभीष्टं स्फुटतामाह वेदोपगीतं

सर्वेषु शश्वत्तनुभृत्स्ववस्थितं यथा खमात्मानमभीष्टमीश्वरं वेदोपगीतं च न शृण्वतेऽबुधा मनोरथानां
प्रवदंति वार्तया १० लोके व्यवायामिषमद्यसेवा नित्यास्तु जंतोर्न हि तत्र चोदना व्यवस्थितिस्तेषु विवाह
यज्ञसुराग्रहैरासु निवृत्तिरिष्टा ११ ॥

वार्तया प्रवदंतीति प्रवदंति परमिति वर्णयंति १०
वेत्तिनक्तः यतो मनोरथानां व्यवायामिषमद्यसेवाविषयाणां वार्तया प्रवदंति प्रवर्तंते अतस्त्वाह लोक
इति व्यवायादीनामपि रतौ भार्यामुपेयात् इत्यादिशेषेण विहितत्वात्किमिति निषिध्यते अतस्त्वाह लोक
इति व्यवायः स्त्रीसंगः नित्याः रागतः प्राप्ताः जंतोः प्राणिमात्रस्य अतस्तत्र तासु चोदना विधिर्नास्ति ननु
तर्हि अप्राप्तविधिः किं तु नियमविधिः परिसंख्याविधिर्वा
न तु ऋतावुपेयादित्यादिविधिदर्शनात् सत्येनपरस्यैव विधिः रागतः प्राप्तत्वात् किं तु नियमविधिः परिसंख्याविधिर्वा
तत्रापि व्यवायादिषु तेषु विवाहयज्ञसुराग्रहैः विवाहविधय एव व्य
वस्थितिरिति तेषु व्यवायादिषु ... विवाहयज्ञसुराग्रहैः विवाहविधय एव
सम्यग्व्यवस्थाप्यते ननु ... नियमः क्रियते ननु व्य
वायः कार्यः यज्ञ एवामिषसेवा सौत्रामण्यां सुराग्रहान्गृह्णातीति श्रुतेः सुरैव मद्यसेवेति नियमः क्रियते ननु
तर्हि नियमविधिः प्राप्तः ... अत आह आसु निवृत्तिरिष्टा तस्य भावः न नियमविधिः परिसंख्या
यमयतेत्यादिषु ... कथं तर्हि व्यवस्थितिरित्युक्तमनेन ...
अतो निवृत्तिः परिसंख्यैव ... विधिः कथं तर्हि ... अतः परिसं
ख्याविधिना अन्यत्र निवृत्तिः ... निवृत्तिः फलं भवति ११ ॥
फलतो ... मनर्थक ... विधिनां निवृत्तिः

इमामसगृह्णन्नपरामामृतस्येत्यस्राभिधानीमादद्यत इत्यत्र दशनालिंगितोयर्दमास्राभिधानीदशनाद्यहस्य
तोमेदस्याप्यर्वविधिद्वारापरिसंख्योच्यते यथाक्रतेरवानिके अश्वामाभिविधिदेवायमतोमेदः स्वनिग्निः परिसं
ख्याफलेनोक्तानविशेषः पुनः स्फुटेतिवित्ति क्वचिन्नगतोविस्याप्रामस्याप्राप्तांशपूरणनदत्तास्य नियमफल
स्याप्यभावाद्विरयमविधिद्वाराफलतः परिसंख्याभवति यथापचपंचनखाभक्ष्याइति तथारागतोनित्यवत्या
प्रसक्तस्य वादाद्विवाहादिनियमेनाभ्युनुज्ञाद्वारापरिसंख्यैवति नत्वपदाभ्यनुज्ञामात्रमेतद्भवेत् तर्हि स्वर्गस्व
त्नातानेप्याभार्यासंविधानापगच्छति दोषापत्तिप्रसक्तायायापश्यतेनात्रमेशयइत्यादिदोषश्रवणेनस्यात् तेष
दोषः मतलिकामेमत्स्यपितस्यामक्रमादोषश्रुतिःतासामन्वयगच्छतांदोषश्रवणोपपत्तेरितिसर्वमनवद्यदोषव
द्भितेवृधिस्नानत्वामित्यर्थः तदेवंव्यवायादिमनोरथाकुलितत्वादभीष्टमात्मानंनपश्यतीत्यभिप्रेत्यआह दुरन्तेथ
नस्यापि धर्महेतुत्वात्परमात्मप्रापकत्वदृष्टोपभोगार्थंविनियोगात्तात्मतां नगच्छतीत्याह धनंचेतिधर्मएवैकःफलंय

धनं च धर्मैकफलं यतो वै ज्ञानं सविज्ञानमनुप्रशान्ति गृहेषु युञ्जन्ति कलेवरस्य मृत्युं न पश्यन्ति दुरन्तवीर्यं
१२ यद्घ्राणभक्षो विहितः सुरायाः तथा पशोरालभनं न हिंसा एवं व्यवायः प्रजया न रत्या इमं विशुद्धं न
विदुः स्वधर्मं १३ ये त्वनेवंविदोऽसन्तः स्तब्धाः सदभिमानिनः पशून्द्रुह्यन्ति विस्रब्धाः प्रेत्य खादन्ति ते च
तान् १४ ॥

स्यतत्फलं यतोधर्मात्र सविज्ञानमपरोक्षज्ञानमहिंसेदहे परोक्षज्ञानं भवति कथंभूतेश्वनुप्रतेतत्रमेवप्रकृष्टाशांती
तिः लिबालल्लणामसनत्व एवंभूतेधनंगृहेषुदेहाद्यर्थंयुंजन्ति १२ किंचव्यवस्थयापिस्रवायाद्यभ्यनुज्ञाना
यथेष्ट प्रवृत्तिरन्यथेत्याह यदिति यस्मात्सुरायाः घ्राणभक्षः अवघ्राणमेवविहितः नपानं तथापशोरप्यालं
भनमेवविहितंनतुहिंसाअयमर्थः देवतोद्देशेनत्यागपूर्वकहननवत्तदालभनं वायव्यंश्वेतमालभेतेत्यादिश्रुतेः
नतुहिंसा यावत्विहिताहिंसामानहिंसेतिकीर्त्यतइतिवचनात् भक्षणोद्देशेनतुक्रियमाणंलौकिकहननवद्धिं
सैव अवतालभनमेवविहितं नतुहिंसाअतोनयथेष्टभक्षणाभ्यनुज्ञेत्यर्थः व्यवायोपिप्रजयानिमित्तभूतयान
तुरत्येष्कृतोमनोरथवादिनरमंस्वधर्मंविशुद्धंस्वधर्मंनविदुरिति १३ एवंभगवत्पराङ्मुखानांबहुदोषतांप्रपंच्य न
त्विष्टंप्रपंचयतिपंचभिः येत्विति अनेवंविदः नएवंधर्मं विदंतीति येतविस्रब्धाः तेः शंकाः अनेनमनोरथाभ
विष्यतीति विस्रब्धास्तावारदानीतनपापवानचात्तेः पशुभिर्भिस्रब्धाः तेपशवः प्रेत्यप्रजनांत्खादन्ति भक्षयितामूत्र

श्रिभवासस्तिनादिषु द्विषंतः मृतके देहे सानुबंधे पुत्रादिसहिते १५ असंप्राप्ताः तत्त्वेतरवस्तुकं पिताः न चातीताः तस्मान्मनः येऽतीतास्ते
मत्ताः न च तन्निष्ठाः तेन बालवर्तिनः पतंतीत्याह ययदतिकेवल्यं न संप्राप्ता न मूढताः असंप्राप्ताः अतएव त्रिवर्गप्रधानाः अक्षणिकाः
दुपशांतिरहिताः देहादिष्वेयबुद्ध्या वा तेऽक्षयमेव स्वात्मानं घातयंति १६ तदाह एत इति आत्महनः अशांता
प[...]कृतार्थः अज्ञाने कर्माणि मिथ्यावस्तूनि स्वात्मसुखीनां मते लोकप्रांत्यंधेन ततस्मादृताः तापस्तेषामपि गच्छतीत्येके
वात्महनो जनाः इति १७ याः गृहापत्यसुहृच्छ्रियस्ताः हित्वा १८ तदेवं भगवद्भक्तिरेव कर्तव्येति स्थिते तत्र विशेषप्रश्न

द्विषंतः परकायेषु स्वात्मानं हरिमीश्वरम् मृतके सानुबंधेस्मिन् बद्धस्नेहाः पतंत्यधः १५ ये कैवल्यम
संप्राप्ता ये चातीताश्च मूढतां त्रैवर्गिका ह्यक्षणिका आत्मानं घातयंति ते १६ एत आत्महनोऽशांता अज्ञा
ने ज्ञानमानिनः सीदंत्यकृतकृत्या वै कालध्वस्तमनोरथाः १७ हित्वात्यायासरचिता गृहापत्यसुहृ
च्छ्रियः तमो विशंत्यनिच्छंतो वासुदेवपराङ्मुखाः १८ राजोवाच कस्मिन्काले स भगवान्किंवर्णः
कीदृशो नृभिः नाम्ना वा केन विधिना पूज्यते तदिहोच्यतां १९ करभाजन उवाच कृतं त्रेता द्वापरं च क
लिरित्येषु केशवः नानावर्णाभिधाकारो नानैव विधिनेज्यते २० कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कला
म्बरः कृष्णाजिनोपवीताक्षान्बिभ्रद्दंडकमंडलू २१ मनुष्यास्तु तदा शांता निर्वैराः सुहृदः समाः यजंति
तपसा देवं शमेन च दमेन च २२ हंसः सुपर्णो वैकुंठो धर्मो योगेश्वरोऽमलः ईश्वरः पुरुषोऽव्यक्तः पर
मात्मेति गीयते २३ त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः हिरण्यकेशस्त्रय्यात्मा स्रुक्स्रुवाद्युपल
क्षणः २४ तं तदा मनुजा देवं सर्वदेवमयं हरिं यजंति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः २५

ति कस्मिन्काले इति किंवर्णः कीदृग्वर्णवान् कीदृशः कीदृगाकारः केन वा विधिना एषु कृतादिकालेषु नानाप्र
कारा वर्णाभिधाकारा यस्य सः नानैव विधिना विविधेनैव मार्गेण १९ तदेव वर्णादि चतुर्ष्वप्याह कृत इत्यादिना
२० कृष्णाजिनादेव बिभ्रदिति २१ शांतत्वादेव योऽदमितः तपसा ध्यानेन २२ त्रिगुणादीनाम्भूत्वा मेखलाय
स्य सः यज्ञमूर्तिः हिरण्यकेशः पिंगलकेशः २४ त्रय्या विद्यया वेदत्रयोक्तकर्मभिः २५

पृश्निगर्भः तस्य पुत्रः वृषाकापिः स्मृतः मन्नूर्वर्षिकामान्नाकंपयतिवर्ष्केसानिति तथाजयत्येवंसर्वदाजयतेः २६
द्वापरे श्यामः वनसीपुष्पसंकाशः निजानिचक्रादीन्यायुधानियस्यसः श्रीवत्सोनामवक्षसोदक्षिणभागेरोमावर्तःप्रदक्षि
णावर्तः मस्यादिर्येषांकरचरणादिगतपद्मादीनांतैः ‑ श्रङ्कैःचिह्नैः किंतैः विशिष्टैः लक्षणैःकौस्तुभादिभिः २७ महा
राजोपलक्षणंछत्रचामरादियुक्तं वेदतन्त्राभ्यांवैदिकेनागमिकेनचमार्गेणार्चयन्ति पूजयन्तिपरमेश्वरंज्ञातुमिच्छवः
२८ नामान्याह नमस्तइति नानातन्त्रविधानेनेतिकेवलेनैवमार्गस्यपादादिदृश्यतिवलतोव्यावर्तयति ३१ त्विषाकृ

विस्नुर्यज्ञः पृश्निगर्भः सर्वदेवउरुक्रमः वृषाकपिर्जयंतश्चउरुगायइतीर्यते २६ द्वापरेभगवान्श्यामः
पीतवासानिजायुधः श्रीवत्सादिभिरङ्कैश्चलक्षणैरुपलक्षितः २७ तंतदापुरुषंमर्त्यामहाराजोपल
क्षणं यजन्तिवेदतन्त्राभ्यांपरंजिज्ञासवोनृप २८ नमस्तेवासुदेवायनमःसंकर्षणायच प्रद्युम्नायानि
रुद्धायतुभ्यंभगवतेनमः २९ नारायणायऋषयेपुरुषायमहात्मने विश्वेश्वरायविश्वायसर्वभूता
त्मनेनमः ३० इतिद्वापरउर्वीशस्तुवंतिजगदीश्वरं नानातन्त्रविधानेनकलावपितथाशृणु ३१ कृष्ण
वर्णंत्विषाकृष्णंसांगोपांगास्त्रपार्षदं यज्ञैःसंकीर्तनप्रायैर्यजंतिहिसुमेधसः ३२ ध्येयंसदापरिभ
वघ्नमभीष्टदोहंतीर्थास्पदंशिवविरिंचिनुतंशरण्यं भृत्यार्तिहंप्रणतपालभवाब्धिपोतंवंदेमहापुरु
षतेचरणारविंदम् ३३

त्वा अकृस्नमिंद्रनीलमणिवदुज्ज्वलं यद्वात्विषाकृष्णंकस्यावतारं अनेनकलौकृष्णावतारस्यप्राधान्यंदर्शयति अं
गानिहृदयादीनि उपांगानिकौस्तुभादीनि अस्त्राणिसुदर्शनादीनि पार्षदाःसुनंदादयः तत्सहितंयज्ञैःअर्चनैःसं
कीर्तनंनामोच्चारणंस्तुतिश्चतत्प्रधानैःसुमेधसोविवेकिनः ३२ स्तुतिमाह ध्येयमिति हेप्रणतपालहेमहापुरुषते
चरणारविंदंवंदेकेचिद्भूतंध्येयंध्यानयोग्यंसदेतिसर्वदाध्यातेत्यर्थः अयंवेहेतवः इंद्रियकुटुंबादिभिर्यःपरिभवस्तिरस्कारः
तंहंतीतितथाभूतं किंचअभीष्टदोहंमनोरथपूरकं किंचतीर्थास्पदं गंगायाआश्रयत्वेनपरमपावनंशिवविरिंचिभ्यां
नुतंस्तुतंमहत्तमंमन्वलोकतायथैवचकिंमर्थंनाभ्यासस्तेनतत्राहशरण्यंआश्रयणीयंवृत्तात्मकस्यअर्थैःनहिवृत्रादिस्त
स्यापाकृतस्यकथंगोचरःस्यादतआह भृत्यार्तिहंयस्यकस्यापिभृत्यमात्रस्यार्तिहंतेनकेवलमागतकार्तिमात्रंहंतीतिकिंतुभवाब्धि

रदानीं स्वयमात्मकामवात्रैरपि देवं भक्तार्थं वनसोपदर्शयन् श्रीरामचंद्रं स्तौति त्यक्त्वेति सुरैः सुदुस्त्यजाया
सुरेप्सितायाः राज्यलक्ष्म्यास्त्यागे कारणमिति परस्यार्थः यः अरण्यमगात् किं राज्यवैकल्यदर्शनेन धर्मेष्टः अतः आर्य-
वचसा पितृवचनेनेत्यर्थः एवमा किंच एवं गम्यमानोऽपि भक्तवात्सल्येन दयितया सीतया ईप्सितं मायामृगं स्वर्णाकारयो-
न्वधावत् तस्य भगवतश्चरणारविंदं वंदे यद्वा ह्यस्य मिष्टेति निर्वीयते तथाऽपि विवादितव्याद्यर्थं पदेन संधिर्न भव-
ति तथाऽपि द्रष्टादिति चरणारविंदमेवोच्यते यत् मायामृगमन्वधावत् तथैव पदारविंदं वंदे इत्यन्वयः ३३ एवं समानु-
युगानुरूपाभ्यां नामरूपाभ्यां ३४ एतेषु चतुर्षु युगेषु कलिरेव श्रेष्ठ इत्याह कलिमिति गुणज्ञाः कलेर्गुणं जानन्ति

त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसो यदगादरण्यं मायामृगं दयितयेप्सितमन्व
लक्ष्मीं धर्मिष्ठ आर्यवचसो धावद्वंदे महापुरुष ते चरणारविंदे ३४ एवं युगानुरूपाभ्यां भगवान्युगव
र्तिभिः मनुजैरिज्यते राजन् श्रेयसामीश्वरो हरिः ३५ कलिं सभाजयन्त्यार्या गुणज्ञाः सारभागिनः य
त्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते ३६ न ह्यतः परमो लाभो देहिनां भ्राम्यतामिह यतो विंदेत
परमां शांतिं नश्यति संसृतिः ३७ नावं कलियुगं प्राप्य सर्वधर्मविवर्जिते वासुदेवपरा मर्त्यास्ते कृता
र्था न संशयः तेषां भाग्यं महा——कृतार्था नृप निश्चितः ये स्मरंति सदा विष्णुं हरेर्नाम कलौ युगे ३९
कृतादिषु प्रजा राजन्कलाविद्रविडेषु च भूरिशः ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ४० कावेरी च महापु
ण्या प्रतीची च महानदी ये पिबन्ति जलं तासां मनुजा मनुजेश्वर ४१ प्रायो भक्ता भगवति वासुदेवेऽमलाश

येनेन तुष्टाः याः कृतयुगमभाजयन्तीत्याह सारभागिनः गुणांशग्राहिणः को सौ गुणः तमाह यत्रेति संकी-
र्तनेनेत्यर्थः ध्यायन् कृते यजन् यज्ञैस्त्रेतायां द्वापरेऽर्चयन् यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवमिति ३६ तस्मात् कलौ अतः अ-
स्मात्संकीर्तनात् परमो लाभो नास्ति यतः संकीर्तनात् ३७ किंच कृतादिषु प्रजाः अमलाशयाः सतः प्रायः प्रायशो भगवति भक्ता
भवंति भक्तस्य विधिनिषेधनिवृत्तेः कृतकृत्यतामाह देवर्षीति भूतानि आप्ताः ऋणी न भवति इतरे देवादयः पंचयज्ञदेवताः
एतेषां यथा भक्तेः ऋणी सन् एव तेषां किंकरः तद्देवानिसंपदयज्ञादि कर्तान्यथा वस्तुतः हीनजातिपरित्यागेन ऋणी
र्थक संकावयेदिति श्रयचनेन तया को मायः स्वभावेन मुकुंदपादयोगतः कर्मकृत्यपरिहृत्य यद्वाकर्तभेदपरिसमकृती

श्री:
भा॰पु॰
टी॰
१९

विहितकर्मनिवृत्तिमुक्त्वा निषेधनिमित्तप्रायश्चित्तनिवृत्तिमाह स्वपादमूलमिति त्यक्तः अन्यस्मिन्देहादौ देवतान्तरे वा
भावो येन अत एव तस्य विकर्मणि प्रवृत्तिर्न संभवति यच्च कथंचित्प्रमादादिना उत्पतितं भवेत् तदपि हृदि धृतो धुनोति नन्व
यमस्तत्र न प्रभवतीत्याह परेशः ननु श्रुतिस्मृती ममैवाज्ञे इति भगवद्वचनात्तदाज्ञाभंगः कथमेवं तत्राह प्रियस्य नन्वना
येनाप्यत्याज्यं भजतस्तत्राह हृदि संनिविष्टः नहि भक्तस्य ... विघ्नितामपेक्षा न त्वर्थः ४२ जायन्तेयान्नवयोगीन्द्रान् पूजार्थं
४३ उपातिष्ठन्ननुतिष्ठन् ४४ निःसंगोऽभिलाषाशून्यः प्रक्रियेयमुक्ता पुत्रत्वेन भगवतः प्रसंगात् वसुदेवनार्यौ विस्मयाह युवयोरिति

देवर्षिभूताप्तनृणां पितॄणां न किंकरो नायमृणी च राजन् सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृ-
त्य कर्तम् ४१ स्वपादमूलं भजतः प्रियस्य त्यक्तान्यभावस्य हरिः परेशः विकर्म यच्चोत्पतितं कथंचिद्धुनोति
सर्वं हृदि संनिविष्टः ४२ नारद उवाच धर्मान्भागवतानित्थं श्रुत्वाथ मिथिलेश्वरः जायन्तेयान्मुनीन्प्रीतः
सोपाध्यायो ह्यपूजयत् ४३ ततोऽन्तर्दधिरे सिद्धाः सर्वलोकस्य पश्यतः राजा धर्मानुपातिष्ठन्नवाप पर-
मां गतिं ४४ त्वमप्येतान्महाभाग धर्मान्भागवतान्श्रुतान् आस्थितः श्रद्धया युक्तो निःसंगो यास्यसे
परम् ४५ युवयोः खलु दंपत्योर्यशसा पूरितं जगत् पुत्रतामगमद्यद्वां भगवानीश्वरो हरिः ४६ दर्श-
नालिंगनालापैः शयनासनभोजनैः आत्मा वां पावितः कृष्णे पुत्रस्नेहं प्रकुर्वतोः ४७ वैरेण यं नृपतयः
शिशुपालपौण्ड्रशाल्वादयो गतिविलासविलोकनाद्यैः ध्यायन्त आकृतधियः शयनासनादौ तत्साम्यमापु-
रनुरक्तधियां पुनः किं ४८ मापत्यबुद्धिमकृथाः कृष्णे सर्वात्मनीश्वरे मायामनुष्यभावेन गूढैश्वर्ये परे

वं युवयोः न तु सर्वकर्मोपशमादिभागवतधर्मैरन्येषामिव युवयोः संशुद्धिरापादनीया पुत्रलालनेनैव भागवतधर्म-
सर्वस्वसिद्धेरित्याह दर्शनेति कृष्णे पुत्र इति स्नेहं प्रकुर्वतोर्वां तस्य दर्शनादिभिरात्मा पावितः शोधितः ४७ एतदेव कै-
मुत्यन्यायेन स्फुटयति वैरेणेति यं शयनासनादौ वैरेणापि ध्यायन्तः तस्य गतिविलासादेः आहृतधियः तत्तदाकाराकारी-
कृतधियः तेन तत्साम्यमापुः किं पुनर्वक्तव्यमनुरक्तधियां तत्साम्यं भवतीति ४८ ननु पुत्रस्नेहस्तु मोहादेः नहि सर्वेश्व-
रे तत्राह मापत्यबुद्धिमिति अपत्यमिति बुद्धिं माकृथाः अत्रागमः त्वादृशः ४९

नन्वकथमीश्वरो मानुषः स्यात् कथं वा तस्य विश्वस्रष्टादिकर्तुः श्रुतनाशोपायादिकर्माश्चर्यमिव निरूप्यते तत्राह भूभार॰
रूपास्त्वसुरपार्थिवायोगात्तस्मात्तेषां हंतते तान् हंतेति निर्वृत्तिमोक्षाय ५१ इहास्मिन्नेव देहे समूलमोहं विधूय शमनाय कलि
लैः ५२ इति श्रीभावार्थदीपिकायामेकादशे पंचमोऽध्यायः ५ षष्ठे ब्रह्मादिभिः स्तवागैर्विज्ञापितहरिं उद्धवः प्रार्थयामास स्व

भूभारासुरराजन्यहंतवे गुप्तये सतां अवतीर्णस्य निर्वृत्यै यशो लोके वितन्यते ५० श्रीशुक उवाच एतच्छ्रुत्वा
महाभागो वसुदेवोऽतिविस्मितः देवकी च महाभागा जहतुर्मोहमात्मनः ५१ इतिहासमिमं पुण्यं धा
रयेद्यः समाहितः स विधूयेह शमलं ब्रह्मभूयाय कल्पते ५२ इति श्रीभागवते एकादशस्कंधे पंचमो॰
ध्यायः ५ बादरायणिरुवाच अथ ब्रह्मात्मजैर्देवैः प्रजेशैरावृतोऽभ्यगात् भवश्च भूतभव्येशो ययौ भूतगणै
र्वृतः १ इंद्रो मरुद्भिर्भगवानादित्या वसवोऽश्विनौ ऋभवोऽगिरसो रुद्रा विश्वे साध्याश्च देवताः २ गंधर्वा
प्सरसो नागाः सिद्धचारणगुह्यकाः ऋषयः पितरश्चैव सविद्याधरकिन्नराः ३ द्वारकामुपसंजग्मुः
सर्वे कृष्णदिदृक्षवः वपुषा येन भगवान्नरलोकमनोरमः ४ यशो वितेने लोकेषु सर्वलोकमला
पहे ४ तस्यां विभ्राजमानायां समृद्धायां महर्द्धिभिः ५ व्यचक्षतावितृप्ताक्षाः कृष्णमद्भुतदर्शनं
स्वर्गोद्यानोपगैर्माल्यैः छादयंतो यदूत्तमम् ६ गीर्भिः चित्रपदार्थाभिः स्तुष्टुवुर्जगदीश्वरं ६ देवा ऊचुः
नताः स्म ते नाथ पदारविंदं बुद्धींद्रियप्राणमनोवचोभिः यच्चिंत्यतेंतर्हृदि भावयुक्तैर्मुमुक्षुभिः कर्ममयो
रुपाशात् ७ ॥

धामनयनमात्मनीति श्रुतः एवमतिविस्तरेणात्मविद्यां निरूप्य नृत्तस्य स्तवमाह अथेति आत्मजैः सनकादिभिः अभ्यगा
द्द्वारकामिति वक्ष्यमाणेनान्वयः ननु तेषामपि ब्रह्मादीनां भगवंतं नित्यं पश्यतां केयमतिदिदृक्षा तत्राह वपुषेति येन
वपुषा नरलोकमनोरमः सन् सर्वलोकेषु यशो वितेने तदिति संदर्शवपुः दिदृक्षवः यावत्तत्त्वपश्यन् ५ स्वर्गोद्यान
स्थैर्माल्यैः विचित्राणि सुलभानि पदानि अर्थाश्च याभिस्ताभिर्गीर्भिः ६ बुद्धींद्रियादिभिः दर्शनादिना प्रणाम
वचनेन नाटेन स्वरूपाणि पदानि नताः स्म ते नत इति विमर्श्यमाहुः दोर्भ्यां पदाभ्यां जानुभ्यां उरसा शिरसा दृ
शा मनसा वचसा चेति प्रणामोऽष्टांग ईरित इति स्मरणात् विस्मयाय तिप्रणामकर्ममयात् पाशान्मुमुक्षुभिर्भाव युक्तैर
थ केवलमंतर्हृदि चिंत्यते तत् प्रणतेनत्थं नताः ब्रह्मो भागवमिमयं ७

श्रीः भा॰ स्क॰ टी॰ १२

नतु मम मायिक दृश्य कर्म कारणात् कृतो तत्पदारविंदद्विंतनं कर्मपाशान्मुमुक्षुभिः क्रियते तेनाह ॥ अमिति हे भूमिन्नतु ता
स्ता मिदानी तन मिदमल्पकर्मदृष्टा के मह दादि प्रपंच सृजसि पालयसि संहरसि ततद्व्यान्मंतेवन स्थकर्तृत्वं माया
मान सा प्यवितर्क्यं तत्तद्गुणस्थः त्वमायमाया गुणैर्नियंत्र त्वेनस्थितः अथ एवैते कर्मभिः भवा न लिप्यते
कृतः यो भवानन्तर्यामी अनवद्यः रागादिरहितः एतः स्वेप्राप्ते भावसुखप्राप्य वर्द्धिते अनावृते अभिवृत्तः अत एव कर्मकर्तृत्व
तेषाकर्मणः परम स्फुरणात् मुमुक्षुभिः विनपतः इति भावः ८ नन्वात्मारामस्य किं कर्मकारणेन अत आह शुद्धि
रिति दुरंतरागदेहस्य भक्तिविना या नान्य कोऽपि नानाविधास्य यानवृत्ति यादिभिस्तथा शुद्धिर्न भवति तथाभ्यां सत्वां ते यथा सिश्रव
णेन संभृतया पवित्रया सद्गुरुदृष्ट्याम सत्ययाम सत्त्वहृदयाय यथास्यात् परमपावनस्य यशोसौवितानानायन त्वत्कर्मो च रामि तिभाव
९ न देवं तव्यपाः सुहृद मम शुद्धिर्हैतः अस्माभिस्तव वाग्भिर्न स्त अतस्ते वाग्भिर्नोस्माकं अशुभानां विविधा विषयवास

नं मायया त्रिगुणया त्मनि दुर्विभाव्यं व्यक्तं सृजस्यवसि लुंपसि तद्गुणस्थः नैतैर्भवानजित कर्मभिरज्यते वै
यत्स्वे सुखेऽव्यवहितेऽभिरतोऽनवद्यः ८ शुद्धिर्नृणां न तु तथेड्य दुराशयानां विद्याश्रुताध्ययनदानतपः
क्रियाभिः सत्त्वात्मनामृषभ ते यशसि प्रवृद्धसच्छ्रद्धया श्रवणसंभृतया यथा स्यात् ९ स्यान्नस्तवांघ्रि
रशुभाशयधूमकेतुः क्षेमाय यो मुनिभिरार्द्रहृदोह्यमानः यः सात्वतैः समविभूतय आत्मवद्भिर्व्यूहे
र्चितः सवनशः स्वरतिक्रमाय १० यश्चिंत्यते प्रयतपाणिभिरध्वराग्नौ त्रय्यानिरुक्तविधिनेश हविर्गृही
त्वा अध्यात्मयोग उत योगिभिरात्ममायां जिज्ञासुभिः परमभागवतैः परीष्टः ११
नां धूमकेतुः तत्र हेतुः क्षेमाय कथं भूतः यः क्षेमाय मस्त्वाय मुनिभिः मुमुक्षुभिः प्रेमार्द्रहृदा मानः विंसमानः यश्च
सात्वतैर्भक्तैः समविभूतये समानेश्वर्याय वासुदेवादिव्यूहैः चितः तेषु वक्ताभ्वि हात्मवद्भिर्धीरैः स्वरतिक्रमाय श्रुति
क्रमाय स्वर्गलोकं आमयम्य वनशः त्रिकालशः पूजितः १० एतेषां च मुनिसात्वतादीनां च सामसंवकानामधीपरमभागवते धूलन्या
श्रपितवर्गाणि वधिक निस्तवं तिथ्यतुपयति इड भावः स्वादसः अह यदवसामिन भवत्वासि पर्युषिता पीयवमती निष्प्रति पनिवता
पितवनमालया भक्तैरर्पितया मि मपल्ली वनश्रीः सपत्नहृदमा नाभवति तथा पितास्य हृदमा नाश्रियमनाहरयो भवान पर्युषितयापि अभावनमालयाभक्तैरर्पितयामि
मपत्नी वनश्रीः सपत्नहृदमाना भवति तया पितास्य हृदमा नाश्रियमनाहरयो भवानम्र पुष्पितयापि अभावनमालया भक्तैरर्पितया मि
तिरीत्यासमलीन संस्तुत्य संपादितयथा भवति तयार्हणयमामादस्तत्वो कृतत्वान्नत स्य न वाग्भिर्नः अथ धूमकेतुर्भूयात्तयतः सपा
णीनमर्हणमादस्तमनोसुभाशय भूयादिमन्वयः अथ चैवं संबंधः एतेभ्योप्यानावेतादि मिष्टोपि सिद्ध्याभि मवहृष
दुहावंतयवस्तुना यो भगवतो यशः प्रियत्वादि स्याह पर्युषितयापि वनमाला नामिमस्मात्पतिः सर्वांगतृष्ट्याकांत यापिजितवनमाल

श्रीरामचन्द्रकृपया ११

किं च पश्यत यत्पाणिभिः संयतहस्तैर्हृदि विशुद्धीना प्रधरायोग्राहवनीयादौ यातिके यं श्रिंत्यते नन्वयमेवदेवतायेहं विशुद्धी तस्या त्रोध्यायेद्धृदष्टकं दिष्ट्ये ति वचनात् तत्र देवताः चिंत्यते यत आह इत्यादिरुक्तेन विधिना ईदृशादिरूपेणाव यत्स पुरुषः चिंतनरम्यः इतः किं च अध्यात्मयोगे आत्माधिकारे योगे योगिभिः ध्यात्वा तत्तत्र मायाश्रयिणामादिरूपाणि तान भिः तत्काम्यैर्यं चिंत्यते परमभागवतैस्तत्सम्यक्तैर्यः परीष्टः सर्वतः प्रजितैः सततं चाङ्घ्रिर्नोऽशुभाशयधूमकेतुः स्यादिति शेषेणान्वयः १२ तत्सुवर्णस्यमङ्गलपत्रपातः प्रसिद्ध एवेति स्तवनं सार्थयन्ते केतुरिति बलिवधनेन त्रिभिर्विक्रमैर्युतः ततो द्वितीयविक्रमे सत्यलोकं गतः तत्र पादः केतुः ब्रह्मलिङ्गेनाविजयध्वजरूपत्वान्तस्य पादस्येति त्रिपतत्पताकः त्रिधापतन्ती गंगा पताका यस्य सः तथाऽसुराणां देवानां च चम्वोः तत्सेनयोः क्रमं भयाभयं भयं अभयं च करः साधुषु स्वर्गाय खलेषु स्वर्गाय खलेषु सघो

पर्युष्टया तव विभो वनमालयेयं संस्पर्धिनी भगवती प्रतिपत्निवच्छ्रीः यः सुप्रणीतममुयार्हणमाददन्नो भूयात्सदाङ्घ्रिरशुभाशयधूमकेतुः १२ केतुस्त्रिविक्रमयुतस्त्रिपतत्पताको यस्ते भयाभयकरोऽसुरदेवचम्वोः स्वर्गाय साधुषु खलेष्वितराय भूमन् पादः पुनातु भगवन्भजतामघं नः १३ नस्योतगाव इव यस्य वशे भवन्ति ब्रह्मादयस्तनुभृतो मिथुरर्द्यमानाः कालस्य ते प्रकृतिपूरुषयोः परस्य शं नस्तनोतु चरणः पुरुषोत्तमस्य १४ अस्यासि हेतुरुदयस्थितिसंयमानामव्यक्तजीवमहतामपि कालमाहुः सोऽयं त्रिणाभिरखिलापचये प्रवृत्तः कालो गभीररय उत्तमपूरुषस्त्वम् १५

इतराय अधोगमनाय एवं केतुरूपस्ते पादः भजतां नः अघं पुनातु शोधयतु अघादिति यद्वा भजतां नः इति कर्मणि षष्ठी श्रुत्या ऊर्ध्वं तस्मान्मुनाविति तथा च श्रुतिः वरुणपवित्रं विततं ब्रह्मणा येन पूतस्तरति दुष्कृतानि तेन पवित्रेण शुद्धेन पूता अतिपाप्मानमरातिं तरेम लोकस्य द्वारमर्चिमत्पवित्रं ज्योतिष्मद्भ्राजमानं महस्वत् अमृतस्य धारा बहुधा दोहमानं चरणं नो लोके सुधितां दधातु इति १३ ननु इत्येवं ब्रह्मादयः परस्परं जयन्ति जीयन्ते वा किं स्वेच्छेतरे यत आह नसीति मिथुः मिथः अर्द्यमानाः युद्धादिभिः पीड्यमानाः ब्रह्मादयोऽपि यस्य तव वशे भवन्ति तत्र दृष्टान्तः यथा नसि नासिकायां ओताः नासिका मा विधाय बद्धाः गावो बलीवर्दा इव अतः कलया च कलयितुः प्रवर्तकस्य तत्र हेतुः प्रकृतिपुरुषयोरपि परस्य तस्य ते पुरुषोत्तमस्य पादो नः शं तनोतु १४ प्रकृतिपुरुषाभ्यां परत्वमुपपादयन् कालत्वेन पुरुषोत्तमत्वमाह अस्येति अस्य जगतः उदयादीनां हेतुरसि अतः अव्यक्तं प्रकृतिः जीवः पुरुषः महान्महत्तत्वं तेषां कालं नियन्तारं त्वमाहुः यत एवमतः परमेशः परमव्यक्तअव्यक्तात्पुरुषः परः पुरुषान्न परं

श्रीः
भा॰ ए॰
टी॰
१८

किंचित्त्वा कुशा सामावरिगतिविद्याः कृतयः किं च प्रथमं स्वतन्त्रात्मकोयं कालः त्रिणाभिः त्रीणि चातुर्मास्यानि नाभयो यस्य
स सोपि त्वमेव अतः त्वमुत्तमपुरुष इति तथा च श्रीगीतासु यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके
वेदे च प्रथितः पुरुषोत्तमः इति १५ तमेव प्रकृत्यादिद्वारा जगत्सृष्ट्यादिहेतुत्वं किं तत्केन प्रकारेणेत्यादाहुः त्वत्त इति
त्वत्तः पुरुषः पुरुषो वीर्यं शक्तिं समधिकृत्य प्राप्य यया मायया सह महान्तं धत्ते किमिव अमोघ—अमोघगर्भमिव योयमा
हान् तयैव मायया अनुगतः सन् आत्मनः सकाशात् आण्डकोशं ससर्ज तया अनुगत आत्मन इति पाठेपि तया मायया अनुयायि
ष्ठितः १६ तवैवंभूतमीश्वरत्वं सम्यक् तावद्गततदाहुः तदिति तत्तस्मात् तस्थुषः स्थावरस्य च जगतो जंगमस्य च भवानधी
शः यद्यस्मात् मायया उत्थाः उत्पन्ना ये गुणाः विक्रिया इन्द्रियवृत्तिः तया उपनीतान् अर्थान् विषयान् जुषन् जुषमाणोपि

त्वत्तः पुमान्समधिकृत्य यया स्ववीर्यं धत्ते महान्तमिव गर्भममोघवीर्यः सोयं तयानुगत आत्मन आण्डकोशं
हैमं ससर्ज बहिरावरणैरुपेतं १६ तत्तस्थुषश्च जगतश्च भवानधीशो यन्माययोत्थगुणविक्रिययोप
नीतान् अर्थान् जुषन्नपि हृषीकपते न लिप्तो येन्ये स्वतः परिहृतादपि बिभ्यति स्म १७ स्मायावलोकल
वदर्शितभावहारि भ्रूमण्डलप्रहितसौरतमंत्रशौण्डैः पत्न्यस्तु षोडशसहस्रमनंगबाणैर्यस्येन्द्रियं विमथि
तुं करणैर्न विभ्व्यः १८ विभ्व्यस्तवामृतकथोदवहास्त्रिलोक्याः पादावनेजसरितः शमलानि हन्तुं आनु
श्रवं श्रुतिभिरंघ्रिजमंगसंगैः तीर्थद्वयं शुचिषदस्त उपस्पृशन्ति १९ बादरायणिरुवाच इत्यभिष्टूय वि
बुधैः सेशः शतधृतिर्हरिं अभ्यभाषत गोविन्दं प्रणम्याम्बरमाश्रितः २० ब्रह्मोवाच भूमेर्भारावतारा
य पुरा विज्ञापितः प्रभो त्वमस्माभिरशेषात्मंस्तत्तथैवोपपादितं २१ धर्मश्च स्थापितः सत्सु सत्यसंधेषु वै
त्वया कीर्तिश्च दिक्षु विक्षिप्ता सर्वलोकमलापहा २२ अवतीर्य यदोर्वंशे बिभ्रद्रूपमनुत्तमं कर्माण्युद्दाम

[illegible]

हे हृषीकपते न लिप्तः त्वं च तस्मै जीवा योगिनो वा स्वतः परिहृतादपि अविद्यमानानोप्येकान्ता विषयतो भयात् बिभ्यति विर
क्तानाम् एतावत् अधिकैश्वर्यं १७ अपि सर्वमाहुः स्मायेति स्मयावलोको मंदस्मितविलसितावलोकः तस्य लवः कटा
क्षः तेन दर्शितो यो भावोभिप्रायः तेन मनोहारि यत् भ्रूमण्डलं तेन प्रहिता ये सौरता मन्त्राः केलिवार्ताः तेषु शौण्डैः प्रगल्भैरंगवाणैः
सम्मोहनैः करणैः कामकलाभिः षोडशसहस्रं पत्न्यः यस्येन्द्रियमनः विमथितुं क्षोभयितुं न विभ्व्यः न समर्थाः स भवान्
विभुः इति एवं गुणत्रयः १८ तस्मात् तव अमृतरूपाया कथायाः तदेव अमृतमुदकं वहन्तीति तथा कान्तिनद्यः तथा पादावनेज
सरितो गंगायाश्च त्रिलोक्याः शमलानि हन्तुं विभ्व्यः केन प्रकारेण आनुश्रवं गुरोरुच्चारणमनु श्रूयत इत्यनुश्रवो वेदः तद्भक्तौ
तिरूपं तीर्थं श्रुतिभिः श्रवणेन्द्रियैः अङ्घ्रिजं गाङ्गमङ्गसंगैः एवं शुचिष—मध्यधर्मे स्थितास्तव तीर्थद्वयमुपस्पृशन्ति सेवन्त इति

श्री
१८

विबुधैः सह विदिमा विस्ताविनाऽद्य मानिषून ---- मायेषु तातिकर्माणि वीर्यं शौर्यं गुरुश्रिया २९ उद्वेलेन ललवि
नमयांदेनवेऽऽयाम्यन्नलवभवन् --- प्रभासयाम्या मरतिवदतोयमभिप्रायः एते देवाः स्वाधिकारेण वा इति

यानि तेच विमानी यामनुष्याः साधवः कलौ श्रुत्वं ततः कीर्तयन्तः स्तुतविष्णुं जनमात्मनः २४ यदुवंशेव
तीर्णा स्मभवतः पुरुषोत्तम शरच्छतं व्यतीयाय पंचविंशाधिकं प्रभो २५ नाधुनाते किलाथाव देवकार्या
वशेषितं कुलं च विप्रशापेन नष्टप्रायमभूदिदं २६ ततः स्वधाम परमं विशस्व यदि मन्यसे सलोकान्
लोकपालानः पाहि वैकुंठकिंकरान् २७ तदिदं यादवकुलं वीर्यशौर्यश्रियोद्धतं लोकं जिघृक्षुरुद्धमेव
न मे वयहार्णवः २८ यद्यसंहृत्य गृध्राणां यदूनां विपुलं कुलं गंतास्म्यनेन लोकोयमुद्वेलेन विनंक्ष्यसि
३० इदानीं नाशआरब्धः कुलस्य द्विजशापतः यास्यामि भवनं ब्रह्मन्नेतदंते तवानघ ३१ शुक उवाच
इत्युक्तो लोकनाथेन स्वयंभूः प्रणिपत्य तं सह देवगणैर्देवः स्वधाम समपद्यत ३२ अथ तस्यां महोत्पा
तान्द्वारवत्यां समुत्थितान् विलोक्य भगवानाह यदुवृद्धान्समागतान् ३३ श्रीभगवानुवाच एते वै
सुमहोत्पाता व्युत्तिष्ठंतीह सर्वतः शापश्च नः कुलस्यासीद्ब्राह्मणेभ्यो दुरत्ययः ३४ न वस्तव्यमिहा
स्माभिर्जिजीविषुभिरार्यकाः प्रभासं सुमहत्पुण्यं यास्यामोद्यैव मा चिरं ३५ यत्र स्नात्वा दक्षशापाद्
गृहीतो यक्ष्मणोडुराट् विमुक्तः किल्बिषात्सद्यो भेजे भूयः कलोदयं ३६ वयं च तस्मिन्नाप्लुत्य तर्पयित्वा
पितॄन्सुरान् भोजयित्वोशिजो विप्रान्नानागुणवतान्धसा ३७ तेषु दानानि पात्रेषु श्रद्धयोप्त्वा महांति वै
वृजिनानि तरिष्यामो दानैर्नौभिरिवार्णवं ३८ शुक उवाच एवं भगवतादिष्टा यादवाः कुलनंदन ग
न्तुं कृतधियस्तीर्थं स्यंदनान्समयूयुजन् ३९ तन्निरीक्ष्योद्धवो राजन्श्रुत्वा भगवतोदितं दृष्ट्वारिष्टानि घो
राणि नित्यं कृष्णमनुव्रतः ४० ✕ श्रीभगवानुवाच अवधारितमेतन्मे यदात्थ विबुधेश्वर कृतं वः कार्यम
खिलं भूमेर्भारोवतारयत् २८ ॥ २८ ॥

ननु सर्वो मोर्तं द्वारवत्यां मृता ------ स्मादभ्युदयफलं प्रभासं तेषामीतिदत्तपणपाद्यन्माणगृहीतं स्वेदोयस्ता
नमावेकृतवाकिल्बिषान्नस्मात् रोगतः स्वात्सद्यो विमुक्तः सत्कलावृद्धिं भेजे ३६ उशिजः कमनीयान्नप्रथमसाधनेन
२० --- नियम्यामल्लेववीजमुसंवद्धफलं भवति तयादानेसमभ्यारत्ति ३७ ३८ ३९ ४०

श्री: भा-द- टी- ४४

लोकं मर्त्यलोके ४२ नप्रत्यहन्न प्रतिहतवान् प्रतिहत ४३ शय्यादिषु त्वां भक्ताः निर्मुमे विनवं तो वयं कथं त्यजेम ४५ त्वा
त्तो मत्वा कृत्वन्नु पार्थयेन मायाभयादि त्याह त्वयेति वर्विना अलंकृताः इति निश्चितं जयेम ४६ संन्यासिनो ह्रिवुत्सव
योदितो कर्मवर्त्मसु वयं तन्नायासेनैव तरिष्याम इत्याह वातरशना इति ऊर्ध्वरेतसः तावकैर्भक्तैः सह त्वद्वार्तया
४८ क्ष्वेली परिहासः हे हेकनं ४९ एकान्तिनमित्यादि स्वाभिप्रायवचनेनेतः ५० इति श्रीभावार्थदीपिकायामेकाद

विविक्त उपसंगम्य जगतामीश्वरेश्वरं प्रणम्य शिरसा पादौ प्रांजलिस्तमभाषत ४१ श्रीउद्धव उवाच देवदेवे
श योगेश पुण्यश्रवणकीर्तन संहृत्यैतत्कुलं नूनं लोकं सन्त्यक्ष्यते भवान् ४२ विप्रशापं समर्थोपि प्रत्य
हन्न यदीश्वरः नाहं तवाङ्घ्रिकमलं क्षणार्धमपि केशव ४३ त्यक्तुं समुत्सहे नाथ स्वधाम नय मामपि
तव विक्रीडितं कृष्ण नृणां परममंगलं कर्णपीयूषमास्वाद्य त्यजन्त्यन्यस्पृहां जनाः ४४ शय्यासना
टनस्थानस्नानक्रीडाशनादिषु कथं त्वां प्रियमात्मानं वयं भक्तास्त्यजेम हि ४५ त्वयोपभुक्तस्रग्ग
न्धवासोलंकारचर्चिताः उच्छिष्टभोजिनो दासास्तव मायां जयेम हि ४६ वातरशना य ऋषयः श्र
मणा ऊर्ध्वमन्थिनः ब्रह्माख्यं धाम ते यान्ति शान्ताः संन्यासिनोमलाः ४७ वयं त्विह महायोगिन्भ्रमन्तः
कर्मवर्त्मसु त्वद्वार्तया तरिष्यामस्तावकैर्दुस्तरं तमः ४८ स्मरन्तः कीर्तयन्तस्ते कृतानि गदितानि च
गत्युत्स्मितेक्षणक्ष्वेलि यन्नृलोकविडंबनं ४९ श्रीशुक उवाच एवं विज्ञापितो राजन्भगवान्देवकीसु
तः एकान्तिनं प्रियं भृत्यमुद्धवं समभाषत ५० इति श्रीभागवते एकादशे षष्ठोध्यायः ६ श्रीभग
वानुवाच यदात्थ मां महाभाग तच्चिकीर्षितमेव मे ब्रह्मा भवो लोकपालाः स्वर्वासं मेभिकांक्षि
णः १ मया निष्पादितं ह्यत्र देवकार्यमशेषतः यदर्थमवतीर्णोहमंशेन ब्रह्मणार्थितः २ कुलं
वै शापनिर्दग्धं नंक्ष्यत्यन्योन्यविग्रहात् समुद्रः सप्तमे ह्येनां पुरीं च प्लावयिष्यति ३ यर्ह्येवायं मया त्य
क्तो लोकोयं नष्टमंगलः भविष्यत्यचिरात्साधो कलिनापि निराकृतः ४ न वस्तव्यं त्वयैवेह मया त्य
क्ते महीतले जनोधर्मरुचिर्भद्र भविष्यति कलौ युगे ५

शेषष्ठोध्यायः ६ सप्तमे तूद्धवस्यात्मज्ञानसिद्ध्यै हरिः स्वयं अवधूतेतिहासोक्तगुरुषष्टाववर्णयत् यदात्थ मे ह
स्येन कुलमिति सर्वा संवेऊंठवासं प्रति १ नवसर्वं मायोनात्मनिष्ठो भवेति वक्तुं माहात्म्यमिति त्रयेण २ न देवायनेष्ट

ननु गुणदोषभूयिष्ठे लोके कुतः समदृष्टिः स्यादत आह यदिदमिति मनआदिभिर्गृह्यमाणं मनोमयं ज्ञात्वा मायेति वि-
द्धि तदपि नश्वरं किं च नश्वरं च विद्धि ७ मनोमयत्वे हेतुः पुंस इति अयुक्तस्य विक्षिप्तमनसः नानार्थो भेदविषयो भ्रमः स
भ्रम एव गुणदोषभाक् ननु वेदेनैव विधिनिषेधाभ्यां भेदस्य सत्यतोक्तानविक्षेभित गुणदोषबुद्धेः पुंसः कर्म विहि-
तं अकर्म तल्लोपः विकर्म निषिद्धमिति भेदः अविद्यावद्विषय एव वेदस्यार्थः ८ कथमात्मविपरिच्छिन्ने विततं जग-
दीक्षणीयं आत्मानमिति मय्यधिब्रह्मणि तद्रूपेणेक्षस्व ९ नन्वेवं युक्तचित्तेनैन कर्माकरणे देवादयो विघ्नं करिष्य-

त्वं तु सर्वं परित्यज्य स्नेहं स्वजनबन्धुषु मय्यावेश्य मनः सम्यक् समदृग्विचरस्व गां ६ यदिदं मनसा वाचा चक्षु-
र्भ्यां श्रवणादिभिः नश्वरं गृह्यमाणं च विद्धि मायामनोमयं ७ पुंसोऽयुक्तस्य नानार्थो भ्रमः स गुणदोषभा-
क् कर्माकर्मविकर्मेति गुणदोषधियो भिदा ८ तस्माद्युक्तेन्द्रियग्रामो युक्तचित्त इदं जगत् आत्मनीक्षस्व
विततमात्मानं मय्यधीश्वरे ९ ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणां आत्मानुभवतुष्टात्मा नान्तरायैर्विह-
न्यसे १० दोषबुद्ध्योभयातीतो निषेधान्न निवर्तते गुणबुद्ध्या च विहितं न करोति यथार्भकः ११ सर्वभूत-
सुहृच्छान्तो ज्ञानविज्ञाननिश्चयः पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः १२ शुक उवाच इत्यादिष्टो भ-
गवता महाभागवतो नृप उद्धवः प्रणिपत्याह तत्त्वजिज्ञासुरच्युतम् १३ उद्धव उवाच योगेश योगवि-
न्यास योगात्मन्योगसम्भव निःश्रेयसाय मे प्रोक्तः त्यागः संन्यासलक्षणः १४ त्यागोऽयं दुष्करो भूमन्कामा-
नां विषयात्मभिः सुतरां त्वयि सर्वात्मन्नभक्तैरिति मे मतिः १५

तीत्याह ज्ञानेति ज्ञानं वेदतात्पर्यनिश्चयः विज्ञानं तदर्थानुभवः ताभ्यां सम्यक् युक्तः तत एवात्मानुभवेनैव तुष्टचि-
त्तः अतः शरीरिणां देवादीनां आत्मभूतः अन्तरायैर्न प्रतिहन्यसे अयं भावः यावदनुभवं यथाश्रमं कर्माणि कुर्यादेव
तदनन्तरं सर्वेषां आत्मभूतत्वान्न कोऽपि विघ्नमाचरतीति तथा च श्रुतिः तस्य ह न देवाश्चनाभूत्या ईशते आत्मा ह्येषां
स भवतीति १० नन्वेवमुत्पन्नज्ञानस्यापि यथेष्टाचरणप्रसङ्गस्तत्राह दोषबुद्ध्येति गुणदोषबुद्ध्यतीतोऽपि शास्त्रसंस्कारा-
न्निषेधान्निवर्तत एव किन्तु न दोषबुद्ध्या विहितं च प्रायशः करोति न गुणबुद्ध्या यथार्भकः संकल्पविकल्परहितः
किं चित्करोति कुतश्चिन्निवर्तते न सहेतु ११ एवंभूतस्य न पुनः संसार इत्याह सर्वभूतेति न विपद्येत न पुनः संसरेत् १२
तत्सर्वं परित्यज्येत्याद्युपदेशमात्मनोऽयोग्यं मन्वानः पृच्छति योगेशेति योगफलदायिन् योगाविद्यान्यास नामा-
तिवाच्योऽन्निदेव विशेषः यद्वा योगो विन्यस्यते क्रियते यस्मिन् योगात्मन् योगे आत्मा प्रकटो भवति यस्य योगस्य

श्री: भा॰ ए॰ टी॰ २०

त्वेपि निवा योगस्य संभवो यस्मात् तत्संबोधनैः त्वमदृिष्ट्वा केवलं त्वया उपदिष्टं न तु मदधिकारं पर्यालोच्येति दि
ति ते तदाह इति: श्रेयसे इति निश्चयो योगाद्यर्थं सर्वं स्वधामादिवदयं त्यागः किंतु संन्यासलक्षणः अप्रमाणवत्तिरूपः ये
प्र तिस्यामागाद्युपदिष्टः सो दुष्कर इति मे मतिः ॥ अतः ममेति मम अहमिति च सानुबंधे पुत्रादिसहिते त्वन्मायया विरचिते आत्मनि देहे ।
विगाढो निमग्नः तत्तु भवता निगदितं यथाहं अंजसा संसाधयामि तथा भृत्यं मामनुशाधि शिक्षय १६ मयामे
तु पतत् कं विस्तरतः त्वयास्मिच्छति चेत् अत आह सत्यस्येति स्वदृशः स्वप्रकाशस्य सत्यस्यात्मनः आत्मनोन्यं वक्ता
रं तेम्यतः अन्यं नानुचक्षे न पश्यामि स्वदृशः स्वतः सिद्धज्ञानात् ज्ञात्मेतिवा अतस्तत्र आह सर्वे इति बहिरर्थभावा

सोहं ममाहमिति मूढमतिर्विगाढस्त्वन्मायया विरचितात्मनि सानुबंधे तत्त्वंजसा निगदितं भवता यथाहं
संसाधयामि भगवन्ननुशाधि भृत्यं १६ सत्यस्य ते स्वदृश आत्मन आत्मनोन्यं वक्तारमीश विबुधेष्वपि नानु
चक्षे सर्वे विमोहितधियः तव माययेमे ब्रह्मादयस्तनुभृतो बहिरर्थभावाः १७ तस्माद्भवंतमनवद्यम
नंतपारं सर्वज्ञमीश्वरमकुंठविकुंठधिष्ण्यं निर्विण्णधीरहमु ह वृजिनाभितप्तो नारायणं नरसखं शरणं प्र
पद्ये १८ श्रीभगवानुवाच प्रायेण मनुजा लोके लोकतत्त्वविचक्षणाः समुद्धरंति ह्यात्मानमात्मनैवा
शुभाशयात् १९ आत्मनो गुरुरात्मैव पुरुषस्य विशेषतः यत्प्रत्यक्षानुमानाभ्यां श्रेयोसावनुविंदते २०
पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः आविस्तरां प्रपश्यंति सर्वशक्त्युपबृंहितं २१

विषयेष्वर्थबुद्धयः १७ किंचिदुःशीला भवंति केचिन्मे विना फलकाले विनश्यंति केचिदक्षाः केचिदरक्षणे समर्थाः के
चित्तत्स्वान भृष्टाः तस्मात् हेत्वर्थ मनवद्यमित्यादीनि एव विशेषणानि न यंतः कालतः पारं देशतस्य यस्य तं कालादि
भिरकुंठे विकुंठलोके धिष्ण्यं स्थानं यस्य तं उ हे भगवन् स्फुटं निर्वेदहेतुः वृजिनैः दुःखैरभितप्तः हकारो गोप्यवायमर्ह।
यद्वा कारो गुरुकं तु पठनीयः तु मनवद्यादीनि कृतो मम तदाह नारायणमिति अत एव पितामह नरसखं जीवः यस्य सं
खा यं भवंतं शरणं प्रपद्ये १८ तदेव तत्संभावना विपरीतभावनाभ्यामुपदिष्टं तत्त्वमनवगाहमानं शतानि त्वहिदेन गुरू
पदेशं विनापि स्वान्वयव्यतिरेकाभ्यामेव तत्त्वं पश्यति पतिर्भवतीति दर्शयितुमाह प्रायेणेति लोकतत्त्वस्य विचक्षणाः
परीक्षकाः अशुभाशयात् विषयवासनातः १९ तदुपपादयति आत्मनः पश्वादिशरीरे आत्मैव हिताहितज्ञानगुरुः २०
तत्र पुरुषत्वे विशेषयति पुरुषत्वे चेति तथा च श्रुतिः पुरुषे त्वाविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति
विज्ञानं वदति विज्ञानं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृतमीप्सत्येवं संपन्नोऽथेतरेषां पशूनामशनापिपासे

२०

अतः पुरुषत्वं स्त्रीत्वं निपकेति २३ अनुमानमाह अत्रेति अत्र पौरुष्यां पुरि युक्ता अप्रमत्ताः अग्राह्यं ग्राहकेभ्यो हेत्वादि भ्यो व्यतिरिक्तं मां अहमास्पदात् मृगयंति मार्गणप्रकारद्वयमाह गृह्यमाणैर्बुद्ध्यादिभिर्गुणैर्हेतुभिः न चात्मनोऽप्रकाशः स्वप्रकाशमेकं विना न घटनअनुपपत्तिस्वभावेन लक्षकैः तथा तैरेव लिंगैर्व्याप्तिग्रहणेनानुमानमाहुः स्वं प्रवर्तकं मृगयंते बुद्ध्यादिकारणानि कर्तृप्रयोज्यानि करणत्वाद्वास्यादिवदिति तदुक्तं भगवत्सर्वभूतेषु लक्षितं स्वात्मना हरिः दृश्यैर्बु द्ध्यादिभिर्द्रष्टा लक्षणैरनुमापकैरिति नवैनावलाऽनुमानिकमात्मेति मंतव्यं देहादिव्यतिरिक्तत्वे पदार्थशुद्धिमात्र स्यैवानुमानेन विवक्षितत्वात् २२ अन्वयव्यतिरेकाभ्यां भ्रमभावनादिनिष्ठत्वाविति हासमाह अत्रापीति २५ अवधि

एकद्वित्रिचतुष्पादो बहुपादस्तथापदः बह्व्यः संति पुरः सृष्टास्तासां मे पौरुषी प्रिया अत्र मां मार्गयंत्यद्धा
युक्ता हेतुभिरीश्वरं गृह्यमाणैर्गुणैर्लिंगैरग्राह्यमनुमानतः २३ अत्राप्युदाहरंतीममितिहासं पुरातनं अ
वधूतस्य संवादं यदोरमिततेजसः २४ अवधूतं द्विजं कंचिच्चरंतमकुतोभयं कविं निरीक्ष्य तरुणं यदुः पप्र
च्छ धर्मवित् २४ यदुरुवाच कुतो बुद्धिरियं ब्रह्मन्नकर्तुः सुविशारदा यामासाद्य भवांल्लोकं विद्वांश्चरति बा
लवत् २५ प्रायो धर्मार्थकामेषु विवित्सायां च मानवाः हेतुनैव समीहंत आयुषो यशसः श्रियः २७ त्वं
तु कल्पः कविर्दक्षः सुभगोऽमृतभाषणः न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् २८ जनेषु दह्यमाने-
षु कामलोभदवाग्निना न तप्यसेऽग्निना मुक्तो गंगांभस्थ इव द्विपः २९ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानंदका
रणं ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ३० श्रीभगवानुवाच यदुनैवं महाभागो ब्रह्मण्येन सुमेध
सा पृष्टः सभाजितः प्राह प्रश्रयावनतं द्विजः ३१ बालः सन्निमद्रवो न तत्त्वद्रवोऽद्युपाधिभिः यतोऽविद्युपा

यावदायुरपि निपुणा २६ सर्वलोकवैलक्षण्यमाह प्रायशः इति धर्मादिषु विवित्सायां आत्मविचारे मानवाः समीहंते य वर्तंते अन्यथापि अप्रयासेहेतुना कामनयैव २७ सत्त्वं न कस्यापि विकर्मणः कर्ता भवसि न च किंचिदीहसे इच्छसि न च यथाक्रमा वा प्रज्ञानेन वा श्रमेणाल्पेन वा चित्रपदेन वाऽप्रवाग्मितया वाऽज्ञो दासीनोऽसि तत्र तत्र पवने प्राह कल्पः समर्थ इत्यादिना २८ महानानंदस्य तव कुतः इति पृच्छति स्पर्शविहीनस्य विषयभोगरहितस्य अत्र हेतुः कलत्रादिशून्यस्य बुद्ध्यैवोपाधिनाः सीकताः न तत्पदेशेन अथापि पर्यटामि ३१ सोऽभने त्र्यं पकीरस्य कतोनीतिमुपदेशकृत ३२

श्री: भा॰ए॰ टी॰ २१

मेमयाश्रितानित्याह एतेषां वृत्तिभिः आत्मनःशिक्षाशिक्षितानीयनयान् हेयोपादेयादीन्यन्वशिक्षं अन्वशिक्षितवा
नस्मि ३४ नाहुषात्मज ययातेः ३५ क्षितेः व्रतंशिक्षितवानित्याह भूतैरिति आक्रम्यमाणः पीड्यमानः तद्विद्वान् भूतानां
दैववशावर्तित्वं विद्वान् व्रतं नियमं पर्वतवृक्षाद्वृत्तवृक्षाययाहृथिवीतस्याः शिक्षितमाह शश्वदिति सर्वदा परार्थाः परोप
कारार्थाः सर्वाईहा यस्य सः परार्थैकप्रकान्ततः संभवो यस्य सः भूभृतः पर्वतान् तस्य हि वृक्षतृणादिरूपेण समस्तक्रियाः प
रार्थाः एवं वृक्षात् तद्वत् तथा परा शिष्यः वृत्तशिष्यः सन् परात्मतां परार्थीनतामात्मनो वृक्षे यथा परैः स्वीक्रियमाणत्वात् एवमेव सम
यनुमन्येनेनहृत ३७ वायुरपि द्विविधः प्राणो बाह्यश्चतत्र प्राणस्य गुरुत्वमाह प्राणवृत्त्येति प्राणो बाह्याद्यादिमात्रेण

पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः कपोतोजगरः सिंधुः पतंगो मधुकृद्गजः ३२ मधुहा हरिणो
मीनः पिंगला कुररोर्भकः कुमारी शरकृत्सर्प ऊर्णनाभिः सुपेशकृत् ३३ एते मे गुरवो राजन् चतुर्विंशति
राश्रिताः शिक्षा वृत्तिभिरेतेषामन्वशिक्षमिहात्मनः ३४ यतो यदनुशिक्षामि यथा वा नाहुषात्मज तत्त
था पुरुषव्याघ्र निबोध कथयामि ते ३५ भूतैराक्रम्यमाणोपि धीरो दैववशानुगैः तद्विद्वान्न चलेन्मार्गा
दन्वशिक्षं क्षितेर्व्रतं ३६ शश्वत्परार्थसर्वेहः परार्थैकांतसंभवः साधुः शिक्षेत भूभृत्तो नगशिष्यः परात्मतां
३७ प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः ३८ विषयेष्वाविश
न्योगी नानाधर्मेषु सर्वतः गुणदोषव्यपेतात्मा न विषज्जेत वायुवत् ३९ पार्थिवेष्विव देहेषु प्रविष्टस्तद्गु
णाश्रयः गुणैर्न युज्यते योगी गंधैर्वायुरिवात्मदृक् ४०

प्रवर्तेत रूपरसादीनिन्द्रियनात्मनापेक्षेत तथा मुनिरपि भवेदित्यर्थः प्राणवृत्तेरकरणे मनोवैकल्येन ज्ञाननाशः स्या
त् अतो देहनिर्वाहः कर्तव्यः गुणलिप्सायां तु कलुषेन स्वविक्षेपेण अन्नादिकं लिप्सेदित्याह ज्ञानमिति नावकीर्येत
न विक्षिप्येत ३८ विषयान् सेवमानोपि तेषु नासक्तिं वा लाभालाभयोः शिक्षेदित्याह विषयेष्विति नानाधर्मेषु शीतो
ष्णादिधर्मकेषु नहि वायुर्वने दहने वा सज्जते नेतद्वत् तथा वायुर्गंधादिधर्मयोगेन प्रतीयमानोपि वस्तुतेन तथा योगी ३९
एवं देहादिधर्मयोगेन प्रत्ययोप्रतीयमानोप्यात्मानं तद्धर्मवानिति संभावितमित्यमिति वायोरेव शिक्षितमित्याह पा
र्थिवेष्विति ४०

आकाशवच्छिदितत्वसंभावनाद्वयमाह अंतर्हितश्चेति द्वयेन अंतर्हितश्च देहान्तर्गतोऽपि मुनिरात्मनो देहाद्यसंगं यत्तत्पवाव्यवच्छेदं च भावयेत् कुतः स्थिरजंगमेषु समन्वयेन व्याप्त्या तया किमाकाशस्येव व्याप्तिः तविततस्य सर्वगतस्य तत्त्वं कुतः ब्रह्मात्मभावेन ब्रह्मस्वरूपभावनया तत्त्वमसीति श्रुतेः न चैतत्सर्वं कथं संभवति तत्राह नभस्त्वं तत्त्वं संभावयेत् यथा नभसः सर्वगतस्य न घटादिभिः संगः परिच्छेदो वा एवमात्मनापि संभवतीति ४२ किंच कूटस्थस्यात्मनो नागमापायिदेहादिसंबंध इत्याह ते जोवन्नमयैः तेजश्च आपश्च अन्नं च पृथिवी च तन्मयैः कालसृष्टैर्गुणैर्देहादिभिः पुमान्न संस्पृश्यत इ

अंतर्हितश्च स्थिरजंगमेषु ब्रह्मात्मभावेन समन्वयेन व्याप्त्याव्यवच्छेदमसंगमात्मनो मुनिर्नभ
स्त्वं विततस्य भावयेत् ४२ तेजोवन्नमयैर्भावैर्मेघाद्यैर्वायुनेरितैः न स्पृश्यते नभस्तद्वत्कालसृ
ष्टैर्गुणैः पुमान् ४३ स्वच्छः प्रकृतितः स्निग्धो माधुर्यस्तीर्थभूर्नृणां मुनिः पुनात्यपां मित्रं
ईक्षोपस्पर्शकीर्तनैः ४४ तेजस्वी तपसा दीप्तो दुर्धर्षोदरभाजनः सर्वभक्ष्योऽपि युक्तात्मा ना
दत्ते मलमग्निवत् ४५ ॥

ति नभोवत्संभवतीति ४३ स्वच्छत्वादिभिर्गुणैः उदकं जगत्पुनातीति तद्गुणमयाशिक्षितेत्याह स्वच्छः निर्मलः प्रकृतितः स्वभावतः स्निग्धः जने प्रवृत्तरागवान् माधुर्यः मधुरालापी तीर्थभूः तीर्थस्था नेषु अपांमित्रमुदकवत्तुल्यः अपादिति पाठे सत्वायेपा यात्पुनाति स्वच्छत्वादिगुणैर्यथोदकस्यास्य दर्शनं तनवा ४४ अग्नेः शिक्षितमाह तेजस्वीति तेजस्वी ज्ञानातिशयवान् विशेषतः तपसा दीप्तः दुर्धर्षः अक्षोभ्यः उदरभाजनस्य अपरिग्रहः युक्तात्मा मुनिः पवित्रस्वरूपः ४५ ॥ ॥

श्री॰
भा॰द॰
टी॰
२५
१२

अथेश्वरस्याभिप्रायेणात्मानमाह कुविदिति यथाग्निः परेष्वेधेषु विग्रहणाति तथा ग्रसतीत्याह दग्धृत्वमि
ति आततायिभिमन्त्रेण भविष्यत्युपापे ४५ आत्मनो देहोपाधिकमेवाच्छनीचत्वादिकमित्यभिप्रेत्याने
न संभावितमित्याह स्वमाययेति स्वमायया स्वाविद्यया सृष्टं सदसल्लक्षणं देवतिर्यगादिरूपं वा ४६
आत्मनो जन्मादिषड्विकाराभावः चेद्दृष्टान्तेन संभावितमित्याह विसर्गाद्या इति विसर्गो जन्म श्मशा
नं नाशः नन्वेवं ज्योतिः शास्त्रप्रक्रिया आप्यमण्डलं चन्द्रः तेजोमयं मण्डलमादित्यः तयोरेकनक्षत्रावस्था
ने चन्द्रो न दृश्यते चन्द्रबिम्बस्यादित्यमण्डलेन समदेशस्थितेन व्यवधानात् सा अमावास्या अथ पक्षादिचारि

कुविकृत्वः कुवित्सृष्टः उपास्यः श्रेयस्कृतो भुङ्क्ते सर्वत्र दाशार्णान्दहन्याद्गुनरात्मभं ४५ स्व
माययासृष्टमिदं सदसल्लक्षणं विभुः प्रविष्ट ईयसे तत्तत्स्वरूपोऽग्निरिवैधसि ४६ विसर्गा
द्याः श्मशानान्ता भावा देहस्य नात्मनः कलानामिव चन्द्रस्य कालेनाव्यक्तवर्त्मना ४७ ॥

काभिः चन्द्रो न दृश्यते नरं गच्छति आदित्यचन्द्रयोर्दशभिरहोरात्रैः पुनः प्रतिपदमारभ्य विषमस्थितस्या
दित्यमण्डलस्य पञ्चदशः पञ्चदशो भागश्चाप्यमण्डले प्रतिदिवसं दृश्यते सा कलेत्युच्यते एवं पञ्चदशो हि च
योदशाभिर्नक्षत्रैरन्तरमिति तिरोधिः चक्रस्य सप्तविंशतिनक्षत्रात्मकस्य मध्ये संमुखौ चन्द्रादित्यौ तिष्ठतः तदा सं
पूर्णं प्रतिबिम्बं छायालोके तन्न दृश्यते सा पूर्णिमा तस्याममावास्या प्रतिबिम्बेन सह षोडश कलाः चन्द्रः उपचा
र्यमेतत् ततः पुनः प्रतिपदमारभ्य मण्डलयोर्विषमीभावात्कलाह्रासः तत्र यथा कलानामेवात्मनो दृश्योनाप्यमण्ड
लस्य तथात्मनोपीत्याह कलानामिवेति ४७ ॥ ॥

राम॰
२५

सिंहावलोकनेनाग्निदृष्टांतेनैव देहानां क्षणभंगुरतयात्मनोसंश्लेषितमित्याह कालेनेति ओघवद्वेगो यस्य तेन आ
त्मनः संबंधिनां भूतानां देहानामित्यर्थः ४८ आदित्यात्तु शिक्षितमाह द्वाभ्यां गुणैरिति गुणैरिंद्रियैर्गुणान्विषया
नुपादत्ते यथाकाले अर्थिन्यागते सति विसृजति न तेषु युज्यते लब्धमिदं त्वमिति नाभिनिवेशं करोति गोभिः रश्मि
भिः जलानि गोपतिः सूर्यो यथा स्वतो भेदस्फूर्तिर्नास्त्यात्मनो भेदप्रतीतिस्तूपाधिवशादित्यादित्यदृष्टांतेनैव संभावित

कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ नित्यावपि न दृश्येते आत्मनोग्नेर्यथार्चिषां ४८ गुणैर्गुणानु
पादत्ते यथाकालं विमुंचति न तेषु युज्यते योगी गोभिर्गा इव गोपतिः ४९ बुध्यते स्वेन भेदेन व्यक्तिस्थ इ
व तद्गतः लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोर्कवत् ५० नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचि
त् कुर्वन्विंदेत संतापं कपोत इव दीनधीः ५१ कपोतः कश्चनारण्ये कृतनीडो वनस्पतौ कपोत्या भार्य
यासार्द्धमुवास कतिचित्समाः ५२
राम राम

मित्याह बुध्यत इति स्वे स्वरूपे अवस्थित आत्मा भेदेन न बुध्यते अभिव्यनक्तीति व्यक्तिरूपोपाधिः व्यक्तिस्थः उपा
धौ प्रतिबिंबितस्तद्गत इव उपाधिप्रविष्ट इव भेदेन स्थूलमतिभिर्लक्ष्यते अर्कवदित्यन्वयः ५० कपोतात्तु शिक्षि
तमाह नातिस्नेह इति स्नेहः प्रीतिः प्रसंगः उपलालनादासक्तिः दृष्टांतं प्रपंचयति कपोतः कश्चनेति ५२
ॐ नमो भगवते वासुदेवाय ॐ नमो नारायणा
य ॥

श्रीः
भा·पु·
टी·
११

तयो मिथः स्नेहप्रसंगो दर्शयति कपोतौ इति येषणा स्नेहेन गुणितं निबद्धं हृदयं ययोस्तौ ५२ विस्रब्धौ निःशंकौ ५४
सा कपोती तर्पयंती महासखी त्विनालापादिभिः प्रीणयंती अतएव तेनानुकंपिता सती यं यं वांछति तं तं कामं समनयत्
संपादयामास गजन्निति वयंथानिस्वचिते ५५ तेषु जलमगितेषु अंडेषु हरेः स्वभावकर्मादिशक्तिभिः रचितावयव·

कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ दृष्टिं दृष्ट्यांगमंगेन बुद्धिं बुद्ध्या बबंधतुः ५२ शय्यासनाटनस्था
नस्थानवार्ताक्रीडाशनादिकं मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु ५४ यं यं वांछति सा राजंस्तर्पयं·
त्यनुकंपिता तं तं समनयत्कामं कृच्छ्रेणाप्यजितेंद्रियः ५५ कपोती प्रथमं गर्भं गृह्णंती काल आगते
अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती ५६ तेषु काले व्यजायंत रचितावयवा हरेः शक्तिभिर्दुर्विभा
व्याभिः कोमलांगतनूरुहाः ५७ प्रजाः पुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ शृण्वंतौ कूजितं तासां निर्वृ
तौ कलभाषितैः ५८ तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः प्रत्युद्गमैरदीनानां पितरौ मुदमाप
तुः ५९ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ६० ए
कदा जग्मतुः तासामन्नार्थं तौ कुटुंबिनौ परितः कानने तस्मिन्नर्थिनौ चेरतुः चिरम् ६१ दृष्ट्वा तान्लुब्ध
कः कश्चिद्यदृच्छातो वनेचरः जगृहे जाल
मातत्य चरतः स्वाल
यांतिके ६२

रचितावयवा इति पाठः कोमलानि अंगानि तनूरुहाश्च येषां ते ५७ पतत्रैः पक्षैः अदीनानां हृष्टानां ५८ शिशून् बालान् प्रजाः
पुत्रान् ६० स्वालयांतिके चरतः क्रीडतः तान् कपोतपुत्रान् आततम् प्रसार्य ६२ ॥ श्रीगणेशाय नमो भगव
ते वासुदेवाय ॥

तस्य कृत्वादेयतत्पोषणार्थं गतौ पोषणं भक्ष्यं ६३ शिचा जालेन ६५ नानुरूपां भार्यां विललाप शुशोच ६६
विलापमाह त्रयेण अहो इति अतृप्तस्य अदृष्टसुखेषु अकृतार्थस्य अदृष्टमसंपादितवतः अकृतात्मनः पत्न्यापि शिक्षमालिप्य

कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ६३ कपोती स्वा
त्मजान्वीक्ष्य बालकान् जालसंवृतान् तानभ्यधावत्क्रोशंती क्रोशतो भृशदुःखिता ६४ सासकृत्स्नेह
गुणिता दीनचित्ताजमायया स्वयं चाबध्यत शिचा बद्धान्पश्यंत्यपस्मृतिः ६५ कपोतश्चात्मजान्ब
द्धानात्मनोप्यधिकान्प्रियान् भार्यां चात्मसमां दीनो विललापातिदुःखितः ६६ अहो मे पश्यता
पायमल्पपुण्यस्य दुर्मतेः अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः ६७ अनुरूपानुकूला च यस्य मे
पतिदेवता शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति साधुभिः ६८ सोहं शून्ये गृहे दीनो मृतदारो मृतप्रजः
जिजीविषे किमर्थं वा विधुरो दुःखजीवितः ६९ तांस्तथैवावृतान् शिग्भिर्मृत्युग्रस्तान्विचेष्टतः स्वयं
च कृपणः शिक्षु पश्यन्नप्यबुधोपतत् ७० तं लब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनं कपोतकान्क
पोतीं च सिद्धार्थः प्रययौ गृहम् ७१ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् पुष्णन्कुटुंबं कृ
पणः सानुबंधोवसीदति ७२ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतं गृहेषु खगवत्सक्तस्तमा
रूढच्युतं विदुः ७३ इति श्री एकादशस्कंधे सप्तमोध्यायः ७

दार्ष्टांतिके योजयति एवमिति एवं गृहासक्तिः निःश्रेयसानर्थहेतुः ७० मनुष्यस्य तु अतिनिंदितात्याह
यः प्राप्येति ७४ इति श्रीभावार्थदीपि
कायामेकादशे सप्तमः ७

श्री॰
भा॰ ए॰
टी॰
२४

अष्टमेजगरादिभ्योनवभ्यः शिक्षितंहरिः अवधूतनिगदितमाहविवेकायोद्धवंप्रति १ प्रारब्धकर्मभोगस्या
वश्यंभावित्वात्तदर्थोः यत्नेनायुर्व्ययोऽनर्थाकर्तव्यइति अजगरात् शिक्षितमित्याह सुखमित्यादिना
यदैंद्रियकंसुखंतत्स्वर्गेनरकेचभवत्येवयथादुःखंतस्माद्बुधः तन्नेच्छेत शरीरनिर्वाहमात्रंतुयथालब्धे
नकीर्तव्यमित्याह ग्रासंस्वितिद्वाआजगरः अजगरवद्वृत्तिः अक्रियः उदासीनः २ यदानापततितदाकिं
कर्तव्यंतत्राहशयीतेति अनुपक्रमः निरुद्यमः दिष्टभुक् दैवमेवप्रापकमितिधैर्यवान् ३ ननुममा
प्यपिशयीतेवकिं ऊंइत्याह ओजइति ओजइंद्रियबलंसहोमनोबलं बलंशारीरमेव नयुक्तमपिदेह

श्रीब्राह्मणउवाच सुखमैंद्रियकंराजन्स्वर्गेनरकएवच देहिनांचयथादुःखंतस्मान्नेच्छेततद्
बुधः १ ग्रासंसुमृष्टंविरसंमहांतंस्तोकमेवच यदृच्छयैवापतितंग्रसेदाजगरोऽक्रियः २ शयी
ताहानिभूरीणिनिराहारोऽनुपक्रमः यदिनोपनयेद्ग्रासोमहाहिरिवदिष्टभुक् ३ ओजः
सहोबलयुतंबिभ्रद्देहमकर्मकं शयानोवीतनिद्रश्चनेहेतेंद्रियवानपि ४ मुनिःप्रसन्नगं
भीरोदुर्विगाह्योदुरत्ययः अनंतपारोह्यक्षोभ्यस्तिमितोदइवार्णवः ५ ॥ ॥

मकर्मकमेवबिभ्रत् शयानएवभवेत् वीतनिद्रः स्वार्थेदत्तदृष्टिश्चभवेत् नतुनिरीहेत इंद्रियवानपीति
दर्शनादिक्रियापारमपिनिवारयति समुद्राच्छिक्षितमाह मुनिरितिबहिः प्रसन्नस्त्वासौअंतर्गंभीरश्चदुर्वि
गाह्यः एवंभूतइतिपरिकलयितुमशक्यः अलक्ष्याभिप्रायत्वात् दुरत्ययः अनतिक्रमणीयः तेजस्वि
त्वात् अनंतपारः कालतोदेशतश्च अपरिच्छेद्यः स्वरूपाविर्भावात् अक्षोभ्यः अविकार्यः रागाद्यभा
वात् स्तिमितोदः निश्चलोदकः अर्णवोयथा नदद्भिस्तेर्णवोभवेदित्यर्थः ५ ॥ ॥ एक॰
२४

किंवर्षासुसरिद्भिःसमुद्रापिसागरोयथानोत्सर्पेत ग्रीष्मेसरिद्धीनोपिनशुष्येत तथासमृद्धकामस्तद्विहीनोवा
नहृष्येत् नचशोचेदित्यर्थः अत्रहेतुः नारायणपरः नतुविषयपरइतिरूपगंधस्पर्शशब्दरसैःपंचभिर्विषयैर्मोहि
ताः पतंगमधुकरगजहरिणमीनाहताः अतस्तेषुनासक्तःपंचत्वंनेशुरेव तदुक्तं पतंगमातंगकुरंगभृंगमीनाहताःपं
चभिरेवपंच एकः प्रमादीसकथंनहन्यतेयःसेवतेपंचभिरेवपंचेति तत्ररूपविलाससंमोहितोनश्यतीति ६ पतं
गान्शिक्षितमाह दृष्ट्वेतितस्याभावैःप्रलोभितः ७ स्त्रियमुपलक्षणीकृत्यैतत्प्रपंचयतियोषिदिति ८ मधुकरा

समृद्धकामोहीनोवानारायणपरोमुनिः नोत्सर्पेतनशुष्येतसरिद्भिरिवसागरः ६ दृष्ट्वास्त्रियंदेव
मायांतद्भावैरजितेन्द्रियः प्रलोभितःपतत्यंधेतमस्यग्नौपतंगवत् ७ योषिद्धिरण्याभरणांबरादि
द्रव्येषुमायारचितेषुमूढः प्रलोभितात्माह्युपभोगबुद्ध्यापतंगवन्नश्यतिनष्टदृष्टिः ८ स्तोकंस्तोकं
ग्रसेद्ग्रासंदेहोवर्तेतयावता गृहानहिंसन्नातिष्ठेद्वृत्तिंमाधुकरींमुनिः ९ अणुभ्यश्चमहद्भ्यश्चशास्त्रे
भ्यःकुशलोनरः सर्वतःसारमादद्यात्पुष्पेभ्यइवषट्पदः १० सायंतनंश्वस्तनंवानसंगृह्णीतभिक्षि
तं पाणिपात्रोदरामत्रोमक्षिकेवनसंग्रही ११

स्वरूपंतत्त्वमजानन्त्यस्तथापिसत्संगात् परंब्रह्मसारभूतमविविधमपिब्रह्मस्वरूपमेवमांपरंप्रापुरित्यर्थः

नानाविदन्मय्यनुषंगवद्धधियःस्वमात्मानमदःतथेदं यथासमाधौमुनयोब्धितोये
नद्यःप्रविष्टाइवनामरूपे १२ मत्कामारमणंजारमस्वरूपविदोबलाः ब्रह्ममांपरमंप्रा
पुःसंगाच्छतसहस्रशः १३ तस्मात्त्वमुद्धवोत्सृज्यचोदनांप्रतिचोदनां प्रवृत्तिंचनिवृ
त्तिंचश्रोतव्यंश्रुतमेवच १४ मामेकमेवशरणमात्मानंसर्वदेहिनां याहिसर्वात्मभावे
नमयास्याह्यकुतोभयः १५ श्रीउद्धवउवाच संशयःशृण्वतोवाचंतवयोगेश्वरेश्वर ननिव
र्ततआत्मस्थोयेनभ्राम्यतिमेमनः १६

१३ यस्मादेवंभूतामत्संगप्रभावः तस्मात्त्वंचोदनांश्रुतिंप्रतिचोदनांस्मृतिंचयद्वाविधिंचउत्सृ
ज्यपरित्यज्यमांशरणंयाहि मय्येवअकुतोभयःस्याः अत्रैवंतावन्मयोदितेष्ववहितःस्वधर्मेष्विज्या
दिनाकर्मकर्तव्यमित्युक्तंइदानींतुसर्वंत्यक्त्वामांशरणंयाहीत्युच्यतेततश्चकिमात्मनःकर्तव्यम
स्तिनास्तिवेत्यात्मस्थःआत्मविषयःसंशयोननिवर्ततेयद्वाकर्मकार्यंत्याज्यंवेत्यात्मस्थःहृदिस्थः
संशयोननिवर्ततइत्याहसंशयइतियेनसंशयेन १६ ॥ ॥ ॥

द्वैतं मयपवरत्यह्यमिः अपेगावः ईश्वरस्तावत्स्वमायावष्टम्भस्य प्रपंचात्मना भातितस्य प्रपंचाध्यासाच्च जीवानामनाद्यवि
द्यया कर्तृत्वादि तेन विधिनिषेधाधिकारः तदानीमनन्वयसुखस्य स्थैर्यं कर्माणि लिङ्गविंशुक्तं सर्वेषु च स्मृद्देशतः कर्मजाद्यप
रिहाराय भक्तिविक्षेपककर्मादेवं परित्यज्य दृढविश्वासेन भजेत्युक्तं नानानायोन्तविघायोन किंचित्कर्तव्यमस्ती।
ति तत्र तावदीश्वरं हार्गादीरियद्वारा जीवसंसृतिकारणभूतं प्रपंचोन्मसमाह साद्वैस्त्रिभिः सएषस्रववदनः जीव
यतीति जीवः परमेश्वरः प्रणोत्सवेहेतुः विवेषुप्राधारादिचक्रेषु प्रसृतिरभिव्यक्तिर्यस्य सः तामेवाभिव्यक्तिमाह द्यो
षेनेतिघोषेनरूपाख्येन नादवता प्राणेन सह गुहां प्राधारचक्रं प्रविष्टः सन्मनोमयं सूक्ष्मरूपं परापश्यंत्याख्यं मध्य

श्रीभगवानुवाच सएषजीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः मनोमयं सूक्ष्ममुपेत्य रू
पं मात्रा स्वरो वर्ण इति स्थविष्ठः १७

मात्राख्यं च मणिपूरचक्रे विशुद्धिचक्रे चउपेत्य प्राप्य वक्त्रे मात्रा ह्रस्वादिः स्वर उदात्तादिः वर्णः अकारादिरित्येवं वैखर्या
ख्यः स्थविष्ठः श्रुतिस्थलेनानावेदरूपात्मा कोऽभवति तथा च श्रुतिः चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्म
णा ये मनीषिणः गुहा त्रीणि निहिता नेंगयंति तुरीयं वाचो मनुष्या वदंति अभिप्रुक्तश्लोकस्य यासामित्रावरुणा
सदनाद्युच्चरंती त्रिषष्टिं वर्णानेतः प्रकटकरणैः प्राणसंगात्स्वस्तेनेतां पश्यंती प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये १७ १२
॥ राम राम

अव्यक्तस्य सतः सत्त्वमध्यमवैकृताभिव्यक्तौ दृष्टांतः यथेति यथाग्निः खे ऊष्मा अव्यक्तोऽस्वरूपः दारुण्यधिकं
मथ्यमानः अनिलसहायः सन् अणुः सूक्ष्मविस्फुलिंगादिरूपो भवति पुनः घृताहुत्या हविषा संवर्द्धते
तथा वेदवाणी ममाभिव्यक्तिः १८ इत्थं वागिति उपसंहरति इंद्रियवृत्तिष्वपि दृष्टान्तमेवमिति एवं गदिः गदनं भाष
णमेव्यक्तिरिति उपसंहारः कर्म हस्तयोः वृत्तिर्गतिः पादयोः विसर्गः पायूपस्थयोः इति कर्मेंद्रियाणां घ्राणं श्रव

यथानिलः खेनिलबंधुरूष्माबलेन दारुण्यधिमथ्यमानः अणुः प्रजातो हविषा समिध्यते त
थैव मे व्यक्तिरियं हि वाणी १८ एवं गदिः कर्म गतिर्विसर्गो घ्राणो रसो दृक स्पर्शः श्रुतिश्च संकल्प
विज्ञानमथाभिमानः सूत्रं रजः सत्वतमोविकारः १९

घ्राणं रसो रसनं दृक् दर्शनं स्पर्शः स्पर्शनं श्रुतिः श्रवणं इति ज्ञानेंद्रियाणां संकल्पो मनसः विज्ञानं बुद्धिचि
त्तयोः अभिमानोऽहंकारस्य सूत्रं प्रधानस्य सत्त्वरजस्तमसां विकारोऽधिदैवादिः त्रिविधः सर्वं मे व्यक्तिरिति शे
षेणान्वयः १९ १९ ॥
राम

तस्मादीश्वराभिव्यक्तिरूपः प्रपंचो नेश्वरात्प्रपंचो भिन्नो स्तीत्याह त्रयमिति यज्जीवः ईश्वरः प्रादावयं नप्तैकएव वयसा काले
न विश्लिष्टशक्ति विभक्ताः वा सादीरिय त्रयाः प्राक्तयोयस्य यद्वा विशेषेणाश्लिष्टा प्रश्लिगिता मायाशक्तिर्येन सः बहुप्रकार इवा
भाति यतः स एवाद्यः त्रिवृत् त्रिगुणाश्रयः अब्जयोनिः लोकपद्मस्य कारणभूतः एकस्य बहुधाभाने दृष्टांतः योनिं क्षेत्रं प्रति
पद्य प्राप्य बीजानि यद्वदिति २२ तस्मात्तन्मायया विलसितमात्रत्वात्तदाश्रयमिदं जगत् ततः पृथगिति सदृष्टांतमाह यस्मि
न्निदमिति तंतुविताने संस्थास्थितिर्यस्य सः पटो यथा तद्वत्तस्मिन्निदं विश्वं प्रोतं दीर्घतंतुष्वप्रस्ववोतं तिर्यक्तंतुष्विव प्र
वेभृत्ततमप्रक्षिप्यस्तात्मकं विश्वमविद्यात्मनोभिन्नं तदेतद्रूपं जीवस्य कर्तृत्वादिसंसारहेतुः अतस्तद्विवेकज्ञानेन कर्मादिसंबं

अयं हि जीवस्त्रिवृदब्जयोनिरव्यक्त एको वयसा स आद्यः विश्लिष्टशक्तिर्बहुधेव भाति बीजानि योनिं प्रतिपद्य य
द्वत् २० यस्मिन्निदं प्रोतमशेषमोतं पटो यथा तंतुवितानसंस्थः य एष संसारतरुः पुराणः कर्मात्मकः पुष्प
फले प्रसूते २१ द्वे अस्य बीजे शतमूलस्त्रिनालः पंचस्कंधः पंचरसप्रसूतिः दशैकशाखो द्विसुपर्णनीडस्त्रि
वल्कलो द्विफलोर्कं प्रविष्टः २२ अदंति चैकं फलमस्य गृध्रा ग्रामेचरा एकमरण्यवासाः हंसा य एकं ब
हुरूपमिज्यैर्मायामयं वेद स वेद वेदम् २३ एवं गुरूपासनयैकभक्त्या विद्याकुठारेण शितेन धीरः विवृ
श्च्य जीवाशयमप्रमत्तः संपद्य चात्मानमथ त्यजास्त्रम् २४ इति एकादशस्कंधे द्वादशोऽध्यायः १२

न्धात्स्यमिति उक्तं इदानीं शास्त्रेणाह य एष इति सार्द्धैस्त्रिभिः पुराणः अनादिः कर्मात्मकः प्रवृत्तिस्वभावः पुष्पफले भोगापव
र्गौ कर्मफले वा प्रसूते जनयति २१ तदेवं रूपकं प्रपंचयति द्वे पुण्यपापे अस्य बीजे वासनामूलः शतसंख्यामिता वा
सनामूलानि यस्य त्रयो गुणाः नालानि प्रकांडाः पंचभूतानि स्कंधाः यस्य पंच रसाः शब्दादयः प्रसूतिर्यस्मात् एकादशे
न्द्रियाणि शाखा यस्य द्वयोः सुपर्णयोर्जीवपरमात्मनोर्नीडं यस्मिन् त्रीणि वल्कलानि वातपित्तश्लेष्माणो यस्य द्वे
सुखदुःखे फले यस्य सः अर्कं प्रविष्टः सूर्यमंडलपर्यंतव्याप्तः ततोभिन्नस्य संसाराभावात् २२ तत्फलभोक्तृत्वानाह अदंति
चैकमिति गृध्राः कामिनः ग्रामेचरा गृहस्थाः अस्य वृक्षस्य एकं फलं दुःखमदंति निष्कामत्वात् सुखगीदेरपि दुःखत्वप्रमात
सविवेकिनः अरण्यवासिनः संन्यासिन एकं फलं सुखमदंति एकं परमात्मानं मायामयं एवं बहुरूपमिज्यैः श्रेष्ठगुरु
भिः कृपया यो वेद स सर्वं वेदं वेद २३ न चैवं तन्मात्रा कृतकृत्यता सर्वसाधनसाध्यमाह एवमिति एकांतभक्त्या शितेन तीक्ष्णेन तेन
कुठारेण तत्त्वज्ञानेन च जीवाशयं जीवस्य उपाधिं त्रिगुणात्मकं लिंगशरीरं विवृश्च्य छित्त्वा परमात्मानं संपद्य प्राप्य अस्त्रं साधनं त्य

श्री: भा॰ए॰ टी॰ ८४

त्रयोदशेऽथसत्वस्यवृद्ध्याविद्योदयक्रमः हंसेतिहासतश्चित्तगुणविश्लेषवर्णनं । विद्याऽऽचार्येणजीवाशयेसंश्लिष्टस्याथवै
तन्नोत्मकं ततस्तमआदिगुणत्रयवृत्तिप्रतिबंधेसतिकथंविद्योत्पत्तिरित्याशंक्यतन्निवृत्त्याविद्योत्पत्तिप्रकारमाहस
त्वमितिसप्तभिः तत्रयथावेदादिवदात्मधर्मागुणाःस्युस्तर्हितन्निस्तरणपतनानेषांदृष्टिर्नस्यात् नत्वेतदस्तीत्याह बुद्धेःप्रकृतेरेवते
गुणाःनआत्मनइतिअतःसत्वेनसत्ववृद्ध्याअन्यतमौहन्यात्रजस्तमौवृत्तीजयेदित्यर्थः सत्वेवधर्मस्थदयादिवृत्तिरूपस्यपश्चा
त्मकेनसत्वेनैवहन्यात् १ ननुगुणत्रयवृत्तीनांपरस्परोपमर्दरूपतानांवसत्ववृद्ध्येवेतरवृत्तयोनियमेनहंतव्याःतत्रा
हसत्वादितिसत्वात्किलतद्यतियोधर्मःसमुद्रक्तिरूपएववासत्वमेवकथंवर्धतेतत्राह सात्विकानांपदार्थानामुपासया
मेवयासत्ववृद्धिर्भवतीत्यर्थः २ सधर्मःरजस्तमसीहन्यात्ऊर्ध्वंविपतेऽतमोयस्मात्ःसर्वेतमःयतःसत्वस्यवृद्धिर्य॰

श्री॰भगवानुवाच सत्वंरजस्तमइतिगुणाबुद्धेर्नचात्मनः सत्वेनान्यतमेहन्यात्सत्वंसत्वेनचैवहि १ सत्वाद्धर्मो
भवेद्वृद्धात्पुंसोमद्भक्तिलक्षणः सात्विकोपासयासत्वंततोधर्मःप्रवर्तते २ सधर्मोरजस्तमसीहन्यात्सत्ववृ
द्धिरनुत्तमः आशुनश्यतितन्मूलोह्यधर्मउभयेहते ३ आगमोऽपःप्रजादेशःकालःकर्मचजन्मच ध्यानं
मंत्रोऽथसंस्कारोदशैतेगुणहेतवः ४ तत्तत्सात्विकमेवैषांयद्यद्वृद्धाःप्रचक्षते निंदंतितामसंतत्तद्राजसंतदुपे
क्षितं ५ सात्विकान्येवसेवेतपुमान्सत्वविवृद्धये ततोधर्मस्ततोज्ञानंयावत्स्मृतिरपोहनं ६ ॥

स्मिन्नतत्कारणंवायस्यासः अतएवतत्कार्येधर्मप्रतिबंधोपितन्नास्तीत्याह तस्मिन्नुभयस्मिन्हतेऽतन्मूलःनीरजस्तमसीरागा
द्वेषादिनाप्रमादालस्यादिनाचमूलंयस्यासः ३ आगमोधीतोवेदःअपःतोयोपयोगित्वेनविनप्रजासत्वचःदेशःआरण्यसेवा
विमुक्तिकालोवसंतादिकर्म आवश्यमादितंतन्मोभयकुलविशुद्धंध्यानंदेवताविषयंमंत्रोगायत्र्यादिसंस्कारःगर्भाधानादि
गुणहेतवःसत्वाद्युत्पत्तिहेतवःएतेषामपित्रैविध्यंद्रष्टव्यमनुष्ठपरंपरयातानत्वमाह सात्विकोपासनयासत्ववर्धतेत्युक्तंतानेव
सत्ववृद्धिहेतुरपांयित्वेसामान्यतोगुणत्रयवृद्धिहेतुनाहप्रागमःशास्त्रस्यापत्त्यापःकविदागमोथेइतिपाठः ४ एषुसा
त्विकादिनिर्णयमाहएषामेवमध्येप्रवदंतेप्रसंसंति यद्यन्निंदंतितत्तामसंयत्तुनैतेरुपेक्षितंनस्तुवंतिनचनिंदंति ५ सात्वि
कान्येवेतिनिवृत्तिपरंशास्त्रसेवेतनप्रवृत्तिःपाषाण्डशास्त्राणितीर्थापवित्रगंधोदकसुरायाःप्रजाजननिवृत्तानांचनाजनाश
वृत्तउपासनाविविक्तदेशोजनस्थानाद्युत्तदेशःप्रकृत कालेब्रह्ममुहूर्तादिकंध्यानादौनप्रदोषनिशीथादौनकर्मचनित्यंनकाम्याभि
चारादीनिजन्मवैष्णवशैवमेवंतनश्राक्तादेदीक्षांध्यानंश्रीविष्णोर्नकामिनीविदेषामंत्रप्रणवादिकेनकामदंडसंस्कारमा

ननुगुणव्यतिकराज्जातो देहः कथं स्वाश्रयभूतान्गुणान्स्तत एवोपमर्दयाविद्यया योऽस्य गमप्युपरमेन तत्राह वेणुजो मंथनीयज्जा
तोग्निर्वह्निर्यथा स्वतयवो यन्नभिन्नालाभिस्तद्वनं सर्वं दग्ध्वा स्वयं शाम्यति एवं देहोपि तत्क्रियः तस्याग्नेरिव क्रिया यस्या यो यमर्थः
७ यतउत्पन्नस्तदेव एवं निर्वहन्नेवं भूतो यमर्थः ७ ननु नियतेन्द्रियतानासात्त्विकसेवया मिथ्या नास्ति पुरुषार्थस्तथापि राजसादी
न्नविषयाद् दुःखमिति मानेनोपि कथं सेवंतिरतिष्ठंति विदंतीति पदस्थानेश्वानो यथा भर्त्स्यमाना अपि वरायथापद्मोत्ता अ
न्नाना अपि बलीमनुधावंत अजाः यथा निर्लज्जा हे तथानीता अपि तद्वत् ८ मिथ्याभिनिवेशनश्रंजंतेत्यति सहेतुकमाह अहं
मीति त्रिभिः प्रमत्तस्य विवेकशून्यस्य देहादावहमिति मिथ्याबुद्धिर्हृदि यथा यथावदुपसर्पति ततो हेतुर्हेतुर्वैकारिकसत्वम

वेणुसंघर्षजो वह्निर्दग्ध्वा शाम्यति तद्वनं एवं गुणव्यतिकराद्देहः शाम्यति तत्क्रियः ७ विदंति मर्त्याः प्रायेण वि
षयान्पदमापदां तथापि भुंजते कृष्ण तत्कथं श्वखराजवत् ८ श्रीभगवानुवाच अहमित्यन्यथाबुद्धिः प्रमत्त
स्य यथा हृदि उत्सर्पति रजो घोरं ततो वैकारिकं मनः ९ रजोयुक्तस्य मनसः संकल्पः सविकल्पकः ततः का
मो गुणध्यानाद्दुःसहः स्याद्धि दुर्मतेः १० करोति कामवशगः कर्माण्यविजितेंद्रियः दुःखोदर्काणि संपश्यन्
रजोवेगविमोहितः ११ रजस्तमोभ्यां यदपि विद्वान्विक्षिप्तधीः पुनः अतंद्रितो मनो युंजन्दोषदृष्टिर्न सज्जते
१२ अप्रमत्तोनुयुंजीत मनो मय्यर्पयन्शनैः अनिर्विण्णो यथाकालं जितश्वासो जितासनः १३ एतावान्योग आ
दिष्टो मच्छिष्यैः सनकादिभिः सर्वतो मन आकृष्य मय्यद्धावेश्यते यथा १४

धानमपि मनः अतिघोरदुःखात्मकरजः उपसर्पति मनो व्याप्नोतीत्यर्थः ९ इदमेवमिदमेव सौख्यमिति सविकल्पकः सं
कल्पः स्यात् ततस्तुच्छहात्तत्र महो भावदेतिगुणध्यानाद्दुर्धरः कामः स्यात् १० ततो विषयान्भोक्तुं कर्माणि करोति ।। ए
वं चेन्नकस्यापि दुःखनिवृत्तिः स्यादित्याशंक्याह यदपीति यद्यपि रजस्तमोभ्यां विक्षिप्तधीः शठधीस्तथापि विद्वान्विवेकी पुन
र्मनो निरुंधन्न सज्जते १२ विषयदोषदृष्ट्यापि मनोनिरोधाशक्तौ मत्सेवनान्निरोधोपायमाह अप्रमत्त इति अनिर्विण्णोनलसः
यथाकालं त्रिषवणमपि परमानंदरूपे मय्यर्पयन्समाधत्त १३ विषयोत्संगग्रथितस्य मनसस्तद्वियोगेन स्वस्वरूपे निश्चलमसंभावित
मन्यमानं प्रतिनिरूपणायेतिहास यद्यपि दिप्रतिपत्ता वानिति तथा मय्यावेश्यते सम्यगतो वानिसर्थः मच्छिष्यैरित्युक्तं तेनायमपि
न्यायसामनेन तद्रूपता निरूपणास भवानापृच्छति यदेति तेन कालेन देन रूपेण चवेवित्तुमिच्छामि तत्कथयेति १४ १४
रामचंद्रायनमः

मानसाः पुत्राः सूक्ष्मां दुर्ज्ञेयां एकान्तिकीं गतिं परां काष्ठाम् १६ तदेवाह गुणेष्विति विषयेषु स्वभावतो रागादिवशाच्चेतः प्रवि
शति ते चान्तश्चेतसि विषया वासनारूपेण चेतः प्रविशन्ति अतितितीर्षोः विषयानतिक्रमितुमिच्छोः १७ एवमिति महादेवोऽपि स्व
यंभूरपि भूतानां स्रष्टापि ध्यायमानः विचारयन्नपि प्रश्नस्य बीजं यद्दत्तानादयं प्रश्नस्तन्नाविदत् यतः कर्मविक्षिप्तधीः १८
प्रश्नस्य पारमन्तं समाप्तिं माया वा तस्यापि तितीर्षया जिज्ञासया हंसरूपेणेति यथा हंसो नीरं क्षीरं च पृथक्कर्तुं शक्तः एवमहं गुणा
ञ्श्चेतश्चेति विवेचयितुं हंसरूपेणागतोऽस्मीति १९ इत्यहं मुनिभिः पृष्ट इति पृथग्वाक्यं यदवोचमिति चतुष्टयक ग्रन्थोऽस्याः शाखा

उद्धव उवाच यदा त्वं सनकादिभ्यो येन रूपेण केशव योगमादिष्टवानेतद्रूपमिच्छामि वेदितुं १५ श्रीभग
वानुवाच पुत्रा हिरण्यगर्भस्य मानसाः सनकादयः पप्रच्छुः पितरं सूक्ष्मां योगस्यैकान्तिकीं गतिं १६ सन
कादय उवाच गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रभो कथमन्योन्यसंत्यागो मुमुक्षोरतितितीर्षतः १७ श्री
भगवानुवाच एवं पृष्टो महादेवः स्वयंभूर्भूतभावनः ध्यायमानः प्रश्नबीजं नाभ्यपद्यत कर्मधीः १८ स मा
मचिंतयद्देवः प्रश्नपारतितीर्षया तस्याहं हंसरूपेण सकाशमगमं तदा १९ दृष्ट्वा मां त उपव्रज्य कृत्वा
पादाभिवंदनं ब्रह्माणमग्रतः कृत्वा पप्रच्छुः को भवानिति २० इत्यहं मुनिभिः पृष्टस्तत्त्वजिज्ञासुभिस्तदा
यदवोचमहं तेभ्यस्तदुद्धव निबोध मे २१ वस्तुनो यद्यनानात्वमात्मनः प्रश्न ईदृशः कथं घटेत वो विप्रा व
क्तुर्वा मे क आश्रयः २२ पंचात्मकेषु भूतेषु समानेषु च वस्तुतः को भवानिति वः प्रश्नो वाचारंभो ह्यनर्थकः
२३ मनसा वचसा दृष्ट्या गृह्यतेऽन्यैरपींद्रियैः अहमेव न मत्तोऽन्यदिति बुध्यध्वमंजसा २४

इति यदवोचं तेभ्यो यदवोचं तन्मद्वचनं निबोध २१ देहादिविविक्तात्मतत्त्वे सति तत्र प्रश्नस्य रागाद्यसंभवात्स्वयमेव वि
षयचेतसोर्विश्लेषो भवतीति वक्तुं प्रश्नं खंडयन्निव तावदात्मानात्मविवेकमाह वस्तुन इति त्रिभिः श्लोकैः किमात्मनोऽयं प्रश्नः
तद्रूपाधेर्भूतसंघातस्य वा आद्ये आत्मवस्तुनि न स्ववस्तुतः परमार्थरूपस्यानात्मत्वे सति हे विप्रा वः युष्माभिः कृतः प्रश्न ईदृशः बहु
त्वनिर्धारणरूपः कथं घटेत न कथंचित् तथा वक्तुर्मे मम क आश्रयः अविशेषेणात्मनि कं जातिगुणादिविशेषमाश्रित्योत्तरं
दद्यामीत्यर्थः २२ अनसंज्ञविषये द्वितीयेऽपि प्रश्नः वाचारंभः वाङ्मात्रेणारब्धः यतोऽनर्थकः ज्ञातः भूतेषु देवमनुष्या
दिदेहेषु पंचभूतात्मकेषु वस्तुतः समानेषु अभिन्नेषु पुनश्च वर्णस्ततः परमकारणात्मना अभिन्नेषु च वाचारंभणं विकारो नाम
धेयं मृत्तिकेत्येव सत्यमिति श्रुतेः २३ तत्र पंचात्मकमतित्वादिसिद्धिमेवेति परमकारणाभेदमेवोपपादयति मनसेति मनसा आदि

एवं प्रश्नत्रितयं ननु मिथो गुणैर्बद्धमात्मस्वरूपं मामाश्रितोऽनिरूप्य खलु गुणापितुः परिहरेयमतस्तत्रोत्तरमाह गुणेष्विष्यादिना यावदध्याय
समाप्तिः अयमभिप्रायः यदि कर्तृत्वभोक्तृत्वादिरूपतया विषयैः संग्रथितं चित्तं बुद्ध्यादिशब्दवाच्यमेव जीवस्य स्वरूपं भवेत्
ततस्तद्वियोगानुपपत्तेस्तत्स्वरूपमहं ब्रह्मैव चित्ताध्यासेन तत्तदुपाधिभावतया विषयैः संग्रथितं जीवस्य स्वतस्तस्य ब्रह्मत्वभावन
या विषयाणां च मिथ्यात्वानुसंधानेन सर्वतो निर्विण्णः श्रीभगवति मनो भवेदेव परित्यागो स्वरूपाभ्यासादिति हि महापुरुषाः स
चेतो गुणेषु आविशति गुणाश्चेतसि एवं गुणाः चेतश्चोभयं ग्रथितं महात्मनो ब्रह्मस्वरूपस्य जीवस्य देहः अयमस्तु उपाधिः
नतु स्वरूपं २५ तस्मादभीक्ष्णं पुनः गुणेष्वाविशच्चित्तं तेषु पुनर्वासनारूपेणाविष्टं प्रकर्षेण भवतीति तथा गुणाश्चित्तस्थ एव
यदुभयं तद्रूपः सन् त्यजेत् २६ ननु जाग्रदाद्यवस्थावतः कुतः कूटस्थरूपता तत्राह जाग्रत् जागरः स्वप्नः सुषुप्तं चेति बुद्धेर्वृत्तयो

गुणेष्वाविशते चेतो गुणाश्चेतसि च प्रजाः जीवस्य देह उभयं गुणाश्चेतो मदात्मनः २५ गुणेषु चाविशच्चित्तमभी
क्ष्णं गुणसेवया गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् २६ जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः तासां विलक्ष
णो जीवः साक्षित्वेन विनिश्चितः २७ यर्हि संसृतिबन्धोऽयमात्मनो गुणवृत्तिदः मयि तुर्ये स्थितो जह्यात्त्यागस्तद्गु
णचेतसाम् २८ अहंकारकृतं बन्धमात्मनोऽर्थविपर्ययं विद्वान्निर्विद्य संसारचिन्तां तुर्ये स्थितस्त्यजेत् २९ याव
न्नानार्थधीः पुंसो न निवर्तेत युक्तिभिः जागर्त्यपि स्वपन्नज्ञः स्वप्ने जागरणं यथा ३०

त्रयः नात्मनः स्वाभाविक्यः किंतु सत्त्वाज्जागरणं विषयाद्रजसः स्वप्नमात्रादिशेत् प्रस्वापं तमसा जातोऽस्तुरीयं त्रिगुणं ततमिति वृत्त
यः नामकर्मगुणात एवं जीवस्तद्विलक्षणः तदवस्थारहितेऽप्येव विनिश्चितः कुतः तासां साक्षित्वेन २७ ननु तर्हि कथं बन्धः
दासीन्याद्विपरीतो निरन्तरमाह यर्हि यस्मात् अन्यकृतः संसृतिबन्धो यतस्तु सः सति बुद्धिः तया बन्धोऽयमात्मनो गुणवृत्तिदो बुद्धिदत्तानि यस्मा
न्मयि तुर्ये स्थितः सन् इमं संसृतिबन्धं जह्यात् तत एव गुणवतः गुणचेतसां त्यागो भवति २८ कथं संसारबन्धः
कथं च तं जह्यात्तदाह अहंकारेण कृतं बन्धं तमात्मनः पार्थविपर्ययं आनन्दावरणेनानर्थहेतुं विद्वान् ज्ञात्वा निर्विद्य
तमेतदितिचिन्तावान् तुर्ये स्थितः सन् संसारचिन्तां संसारे बुद्धिः तस्मिंश्चिन्ता अभिमानेन तत्कृतभोगचिन्ता च त्यजेदिति २९ या
वदेवं न त्यजेत्तावन्नत्यकर्मज्ञानादि सर्वं व्यर्थमित्याह यावदिति यद्यपि जागर्ति कर्मादि शृणोति तथापि स्वप्नवत् प्रपञ्चं भवति
अज्ञोऽत्यन्तमकृतार्थः अत्र जागरणं स्वप्नमेव दृष्टान्तः स्वप्न इति ३० ॥

श्रीः
भा॰ए॰
टी॰
४३

नन्वकर्तृभोक्तृप्रमितवर्णाश्रमकर्मादिनानानार्थो निर्वर्त्तते तत्राह असत्त्वादिति भावा देहादीनां तत्कृता भिदा वर्णाश्रमा-
दिरूपा गतयः स्वर्गादिफलानि हेतवः कर्माणि चास्यात्मनो मृषा अविद्यावद्विषयो वेद इति भावः ३१ युक्तिभिरुक्तं तत्-
एव युक्तीराह य इति अर्थान् स्थूलान्देहादीन् समस्तकरणैः चक्षुरादिभिर्भुङ्क्ते कथंभूतान् अनुक्षणधर्मिणः क्षणिकत्वा-
त्यताः रूपणादिधर्मवतः स्वप्ने च हृदि जागरदृष्टसदृक्षान् वासनामयान् भुङ्क्ते सुषुप्ते च सर्वानुपसंहरति स एकः कुतः
त्रिगुणवृत्तिदृक् अवस्थात्रयद्रष्टा न तु जाग्रदवस्थामेवेन्द्रियाणामधिपतिरिति स ममेतः स्मृतिः तत्संस्कारणाबुद्धिः कथमात्मा
न तद्द्रष्टा अन्यथाहमिन्द्रियग्राह्यविविक्षितेन समस्ताभिज्ञाः न कुतः स्मृत्या प्रतिसंधानेन सर्वावस्थान्वयात् यः स्वप्नमनस्त्वं सोऽहं
न दर्शनं तं न किंचिदवेदिषमेव एता हि जागरादीनि त्रिगुणोपाधिभेदेन विश्वादिव्यवहार इति भावः एतेन बालयुवाद्यवस्थाप्रति

असत्त्वादात्मनोऽन्येषां भावानां तत्कृता भिदा गतयो हेतवश्चास्य मृषा स्वप्नदृशो यथा ३१ यो जागरे बहिरनु-
क्षणधर्मिणोऽर्थान्भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृ-
त्तिदृगिन्द्रियेशः ३२ एवं विमृश्य गुणतो मनसस्त्र्यवस्था मन्माययामयि कृता इति निश्चितार्थाः संछिद्य हार्द-
मनुमानसदुक्तितीक्ष्णज्ञानासिना भजत माखिलसंशयाधिम् ३३ ईक्षेत विभ्रममिदं मनसो विलासं दृष्टं वि-
नष्टमतिलोलमलातचक्रं विज्ञानमेकमुरुधेव विभाति माया स्वप्नस्त्रिधा गुणविसर्गकृतो विकल्पः ३४ दृ-
ष्टिं ततः प्रतिनिवर्त्य निवृत्ततृष्णस्तूष्णीं भवेन्निजसुखानुभवो निरीहः संदृश्यते क्व च यदीदमवस्तुबुद्ध्या त्यक्तं
भ्रमाय न भवेत्स्मृतिरा-
निपातात् ३५

संधानेनैकत्वं द्रष्टव्यं ३२ ततः किमत आह एवमिति गुणतो या एता मनसस्त्र्यवस्थाः ता मदविद्यया मयि कृता न तत्त्वतः सन्ती-
ति निश्चितप्रान्तरूपार्था यूयं अखिलसंशयानामाधिं आधीयतेऽस्मिन्निति आधिरहंकारस्तं संछिद्य हार्दं हृदिस्थितं मां
भजत केन संछिद्य ज्ञानदाह अनुमानैः सदुक्तिभिः सतां गुरूपदेशैः श्रुतिभिश्च तीक्ष्णेन ज्ञानखड्गेन ३३ अनुमानादि दर्शयति
ईक्षेतेति इदं जगद्विभ्रममीक्षेत अत्र हेतवो मनोविलासं भिन्नत्वान्तरदृष्टत्वात् विनाशित्वाच्च स्वप्नवत् अतिचञ्चलत्वाच्च अलातचक्र-
वत् ननु भ्रमोऽपि निर्विषयः कथं स्यात्तत्राह विज्ञानमिति निगमनेन सा विद्या यायं त्रिगुणपरिणामकृतो विकल्पभेदः समा-
येति ३४ तस्मात्ततो दृश्यात् दृष्टिं प्रतिनिवर्त्य निजसुखानुभवो भवति तत्रैव स्थित्यर्थं च निवृत्ततृष्णः तूष्णीं निरीहश्च भवेत् मनो-
वाक्कायव्यापाररहितस्तिष्ठेत् ननु देहवतः सर्वथा हेतदृष्टिप्रतिनिवर्तनायोगात्पुनः संसारः स्यात् तत्राह संदृश्यत इति क्वचि-
दावश्यकाहारादिषु यद्यपीदं दृश्यते तथापि पूर्वमेवावस्तुबुद्ध्या त्यक्तं तत्पुनर्मोहाय भवेदेव किं तर्हि आदेहपातपर्यन्तं स्मृतिरवभास-
तिरवस्मृतिः संस्कारमात्रेणावभासो भवेदित्यर्थः ३५

४३

एतदेवोपपादयति देहमिति आसनेऽवस्थितमुत्थायगतं चैव वा स्थितं ततः कदाचिद्दैवादपेतं निर्गतं पुनस्तथैव दैववशेनैवागतं वा देहमप्येनान्न
मेधत्रेऽनात्मानुपश्यतः येन देहेन देहे न स्वरूपमध्यगमत् ज्ञातवान् तद्देहं यतः कारणादि निवा परिकृतं परिहितं वा सोगतो
स्थितं वा यथा न वेत्ति तद्वत् ३६ ननु यः परिपाल्यमानोऽपि मुमूर्षति मर्तुमिच्छति तच्चेन्न पश्यति तर्हि पतेदेवेत्याह देहोपी
ति दैववशेन गच्छन् स्वारंभकं कर्म यावदस्ति तावत्पर्यन्तं प्रतिसमीक्षत एव सासुः प्राणेन्द्रियसहितः तर्हि तस्मिन्कदाचि
तेनापि नेत्याह तमिति स्वाप्नं स्वप्नतुल्यं अधिरूढः प्राप्तः समाधिपर्यन्तो योगो येन अत एव प्रतिबुद्धं ज्ञातं परमार्थवस्तु येन.
सः तथाप्याकृतिः तस्य तावदेव विरं यावत्प्रतिमानं तेन प्रबुद्धस्य तरति ३७ उक्तानेवार्थान्विश्वासार्थं स्वरूपमाह मयेति सांख्ये
मात्मानात्मविवेकः योगोऽष्टांगः तयोर्गुह्यं रहस्यं यज्ञं विष्णुं युष्मद्धर्मविवक्षया युष्मान्धर्मं उपदेष्टुमिच्छया ३८ अत एव

देहं च नश्वरमवस्थितमुत्थितं वा सिद्धो न पश्यति यतोऽध्यगमत्स्वरूपं दैवादपेतमुत दैववशादुपेतं वासो यथा परि
कृतं मदिरामदान्धः ३६ देहोऽपि दैववशगः खलु कर्म यावत्स्वारंभकं प्रतिसमीक्षत एव सासुः तं सप्रपंचमधि
रूढसमाधियोगः स्वाप्नं पुनर्न भजते प्रतिबुद्धवस्तुः ३७ मयैतदुक्तं वो विप्रा गुह्यं यत्सांख्ययोगयोः जानीत माग
तं यज्ञं युष्मद्धर्मविवक्षया ३८ अहं योगस्य सांख्यस्य सत्यस्यर्तस्य तेजसः परायणं द्विजश्रेष्ठाः श्रियः कीर्तेर्दमस्य
च ३९ मां भजन्ति गुणाः सर्वे निर्गुणं निरपेक्षकं सुहृदं प्रियमात्मानं साम्यासंगादयोऽगुणाः ४० इति मे छिन्नसं
देहा मुनयः सनकादयः सभाजयित्वा परया भक्त्यागृणत संस्तवैः ४१ तैरहं पूजितः सम्यक् संस्तुतः परमर्षि
भिः प्रत्येयाय स्वकं धाम पश्यतः परमेष्ठिनः ४२ इत्येतद्धंसरूपेण इति एकादशे त्रयोदशः १३ उद्धवः वदे
न्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः तेषां विकल्पप्राधान्यमुताहो एकमुख्यता १ मुखिता

एतेन हंसरूपेणाख्यातेन ज्ञानेन परमात्मा यथावेत्यनुवादो भविष्यति अतः तेषां श्रीयमानोयधर्मः सत्यमन्त्रद्वीपमानोयधर्मः तेजः प्रभावः
एतेषां परमयनं ३९ किं च मामिति कथं भजन्ति गुणा निर्गुणं विगाम ज्ञानेन भवंति किं तन्निर्गुणत्वमित्याह निरपेक्षकः ४० मेमयाश्रगृणत सा
वस्तुः ४१ प्रत्येयाय प्रयातोऽस्मि ४२ इति भावार्थदीपिकायामेकादशे त्रयोदशः १३ अस्तदंशो परं श्रेयो भक्तिरेव न चेतरत् इत्येतद्ध
रूपेण ध्यानयोगं समं साधनैः एवं तावद्भगवता भक्त्यामोतरसंक्षे श्रेयस्तत्साधनानि वर्दनीति श्रविष्णावविशेषं निर्धार
तायाः स्वानिवर्तनीति श्रेयांसि श्रेयः साधनानि किं विकल्पेन यथारुचि अनु
हो किं वा एकस्यैव मुख्यता १ ॥

श्रेयसोन्यानैकारणांभवेदिति अनपेक्षितेनश्रेयसायस्मिन्नःयुक्तेतकः श्रेयसर्व्वः भवतोक्तोभक्तियोगउताः श्रेयश्चश्रेयःसा
धनानिवदंतितेषांकिंसाक्षात्फलसाधनत्वेनप्राधान्यमेवसर्वेषांउतागागियथान्योपिकिंविकल्पेनसर्वेषांतुल्यफलत्वंन
यद्वाकेषुचिद्दर्शनविशेषःपरंतिनत्रभक्तिरेवमहाफलत्वेनमुख्याअन्यानितुस्वस्वरूपानुसारेणपुष्पस्थानीयस्वर्गादिफलत्व
हिभिःसाक्षिभिःसाधारणेनपरिकल्पितानित्यत्वंकेफलानीतिविवेकःप्रकृत्यनुसारेणावेद्यथावेदनार्थंप्रतिपादितंप्रकट
यत्राहचकालेनेतिसप्तभिः २ मदात्मकःमय्येवात्माविततेयेनसः उभयपदसंबंधीयथोचितंनुवर्तनीयः ३ भृग्वादयःभृग्वमरी
चिरतेःगिवसष्ठपुलस्त्यःपुलहःक्रतुरित्येतेसप्तब्रह्मणःप्रजापतयस्तेमहर्षयस्तु ४ ५ किंदेवाःक्लामसेदर्दाजेध्या
दिशाहित्येनकिंदेवामनुष्यावेति संदेहास्पदत्वात्तत्रमनुष्याएवनिर्विंषं किंनराःकिंचित्नराएवसुखनःशभीरतोवाकिंपु

भवतोदाहृतःस्वामिन्भक्तियोगोनपेक्षकः निरस्यसर्वतःसंगंयेनत्वय्याविशेन्मनः २ श्रीभगवानुवाच का
लेननष्टाप्रलयेवाणीयंवेदसंज्ञिता मयादौब्रह्मणेप्रोक्ताधर्मोयस्यांमदात्मकः ३ तेनप्रोक्तास्वपुत्रायमन
वेपूर्वजायसा ततोभृग्वादयोगृह्णन्सप्तब्रह्ममहर्षयः ४ तेभ्यःपितृभ्यस्तत्पुत्रादेवदानवगुह्यकाः मनु
ष्याःसिद्धगंधर्वाःसविद्याधरचारणाः ५ किंदेवाःकिन्नरानागारक्षःकिंपुरुषादयः बह्व्यस्तेषांप्रकृतयोरजः
सत्वतमोभुवः ६ याभिर्भूतानिभिद्यंतेभूतानांपतयस्तथा यथाप्रकृतिसर्वेषांचित्रावाचःस्रवंतिहि ७
एवंप्रकृतिवैचित्र्याद्भिद्यंतेमतयोनृणां पारंपर्येणकेषांचित्पाषंडमतयोपरे ८ मन्मायामोहि
तधियःपुरुषाःपुरुषर्षभ श्रेयोवदंत्यनेकांतंयथाकर्मयथारुचि ९ धर्ममेकेयशश्चान्येकामंसत्यंदमंशमं
अन्येवदंतिस्वार्थंवाऐश्वर्यंत्यागभोजनं केचिद्यज्ञंतपोदानंव्रतानिनियमान्यमान् १०

स्वः किंचिन्नरूपस्वरूपवानरादयःप्रकृतयःवासनाःबह्व्यःकुतःरजःसत्वतमःसाम्भिभुवःजन्मस्थानानियासांताः ६ भूता
निदेवासुरमनुष्यादीनिवाचःवेदार्थव्याख्यानविषयाः ७ एवमित्यंसंहारःकेषांचिदध्ययनादिशून्यानामपिउपदेश
पारंपर्येणपाषंडमतयः ८ तत्रकृतीनांमायागुणमूलत्वात्ममायामोहितधियःअनेकांतंनानाविधंतदेवाह सार्ध
न ९ धर्ममेकेमीमांसकाःतदुक्तंमोक्षार्थीनप्रवर्ततेतत्रकाम्यनिषिद्धयोःनित्यनैमित्तिकेकुर्यात्प्रत्यवायजिहासयेत्यादि य
शःकाव्यालंकारकृतःयथाहुःयावत्कीर्तिर्मनुष्यस्यपुण्यालोकेषुगीयते तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते का
मंवात्स्यायनादयःसत्यंमदमयोगशास्त्रकृतःश्रमंदृष्ट्वावादिनोदमंनीतिकृतःवैशेषिकैश्वर्यमेवस्वार्थंगुरुपार्श्व
वदंतिअन्यःसामान्यत्वायएवश्रेयस्साधनमितितेषांमतेनत्यागभोजनेवकालायतिकावोढाःयज्ञमादानयज्ञादे

वतानांश्वनेतपस्तुदानंचतेनेषांतत्तत्फलत्वमित्याह आद्यन्तवन्तइति १०

एषांलोकाःएतैःसाधनानिफलानितमोनिष्ठामोहावसानाःभोगकालेप्यसूयादिभिःशुचार्पिताःव्याप्ताःभक्तेस्तु
त्यवमाहमर्पितेतियावत्समाप्ति ॥ हेसभ्यमयापरमानंदरूपेणात्मनास्वरूपेणैवस्फुरता १२ किंचअन्येषांनतल्लोका
कादिपरिच्छिन्नंसर्वंभक्तस्यतुपरिपूर्णमित्याहअकिंचनस्येति १३ परिपूर्णतामेवाहनपारमेष्ठ्यमितिनरसाधिपत्यंपा
तालाधिपत्यंअपुनर्भवंमोक्षमपिमद्विनामांहित्वाअन्यन्नेच्छतिअहमेवतस्यश्रेष्ठइत्यर्थः १४ ममापिसएवसर्वश्रे
ष्ठइत्याहनतथेतिद्वाभ्यांआत्मयोनिर्ब्रह्मापुत्रोपिशंकरोमूर्तिस्वरूपभूतोपिसंकर्षणोभ्राताश्रीःभार्यापिआत्मामूर्तिरपि
यथाभक्तइतिवक्तव्येतिहर्षेणाहभवानिति १५ पूयेयमहंतेनैवतिब्राह्मणात्मानिपवित्रीकुर्यामितिभावेनेत्यर्थः १६ किं

आद्यंतवंतएवैषांलोकाःकर्मविनिर्मिताः दुःखोदर्कास्तमोनिष्ठाःक्षुद्रानंदाःशुचार्पिताः ॥११॥ मय्यर्पिता
त्मनःसभ्यनिरपेक्षस्यसर्वतः मयात्मनासुखंयत्तत्कुतःस्याद्विषयात्मनः १२ अकिंचनस्यदांतस्यशांतस्यस
मचेतसः मयासंतुष्टमनसःसर्वाःसुखमयादिशः १३ नपारमेष्ठ्यंनमहेंद्रधिष्ण्यंनसार्वभौमंनरसाधिप
त्यं नयोगसिद्धीरपुनर्भवंवामय्यर्पितात्मेच्छतिमद्विनान्यत् १४ नतथामेप्रियतमआत्मयोनिर्नशंकरः न
चसंकर्षणोनश्रीर्नैवात्माचयथाभवान् १५ निरपेक्षंमुनिंशांतंनिर्वैरंसमदर्शनं अनुव्रजाम्यहंनित्यंपूयेये
त्यंघ्रिरेणुभिः १६ निष्किंचनामय्यनुरक्तचेतसःशांतामहांतोखिलजीववत्सलाः कामैरनालब्धधियोजुषंति
यत्तैरपेक्ष्यंनविदुःसुखंमम १७ बाध्यमानोपिमद्भक्तोविषयैरजितेंद्रियः प्रायःप्रगल्भयाभक्त्याविषयैर्नाभि
भूयते १८ यथाग्निःसुसमिद्धार्चिःकरोत्येधांसिभस्मसात् तथामद्विषयाभक्तिरुद्धवैनांसिकृत्स्नशः १९

चसद्भक्तानांसुखमेतावदेवेत्यनेनाहमतिवाकोवक्तुंसमर्थः यतस्तत्स्वयंवेद्यंनिरूपयन्नैरपेक्ष्यमाहनिष्किंचनाइतिमहांतोविरक्ता
त्मानःअतएवानालब्धधियःअस्पृष्टचित्ताःनिष्किंचनत्वादीनांस्वरूपेहेतुहेतुमद्भावःएवंभूताममदीयाःयत्सुखंजुषंतिसेवंतेतत्
सुखंतएवविदुःकुतःनैरपेक्ष्येणात्मस्थःअपीतिगीयंतेनिरपेक्षाःनैरवलभ्यंनतुमोक्षादिपदैरपीत्यर्थःयद्वाएवंभूतास्तेनो
चेममसुखमित्यर्थः नचैतेप्रीतासितिएवयत्तैरपेक्ष्यसुखंतद्विदुःनान्यस्यत्वयः १७ अपिचआस्तांतावदुत्तमभक्तकथा
यतःप्राकृतोपिभक्तःकृतार्थएवेत्याह बाध्यमानइतिद्वाभ्यांविषयैराकृष्यमाणोपिप्रगल्भयासमर्थया १८ प्राकाम्य
येप्रज्वालितोप्यग्निर्यथाकाष्ठानिभस्मीकरोतितथायमादिनापिकर्ष्यापिचिन्मद्विषयासतीभक्तिःसमस्तपापानीतिभगवा
नपिसभक्तिमहिमाश्चर्येणासंबोधयतिअहोउद्धवविस्मयंसूचयतिवा १९

अतएवंभूतंश्रेयोनान्यदस्तीत्याहनसाधयंतीतिद्वाभ्यां २० श्रद्धयाभक्तिःतयासंभवात्जातिदोषादपीत्यर्थः २१ भक्त्या
भावेनात्मसाधनत्वमर्थमित्याहद्वाभ्यांनसाधयतीतिद्वाभ्यां, धर्मइति २२ रोमहर्षादिकंविनाकथंभक्तिर्गम्यतेभक्त्यावा
विनाकथमाशयःशुध्येदिति २३ किंचभक्तिःस्वाश्रयंशोधयतीतिकिंवक्तव्यंयतोगद्गदवागादिलक्षणोमद्भक्तियुक्तो
लोकंसर्वंपुनातीत्याहवागिति २४ अपिचभक्त्यैवात्मशुद्धिर्नान्यतइतिसदृष्टान्तमाहयथेतियथाग्निनाध्मातेनापि
तेहेमसुवर्णांशंतमलंजहातिनतुक्षालनादिभिःस्वंनिजंरूपंचभजतेकर्मानुशयंकर्मवासनांमाभजनेमद्रूपंनाप्नोप
ते २५ ननुब्रह्मविदाप्नोतिपरंतमेवविदित्वातिमृत्युमेतीत्यादिश्रुतिभ्योज्ञानादेवाविद्यानिवृत्त्यानन्दप्राप्तिरवगम्य

नसाधयतिमांयोगोनसांख्यंधर्मउद्धव नस्वाध्यायस्तपस्त्यागोयथाभक्तिर्ममोर्जिता २० भक्त्याहमेक
याग्राह्यःश्रद्धयात्माप्रियःसतां भक्तिःपुनातिमन्निष्ठाश्वपाकानपिसंभवात् २१ धर्मःसत्यदयोपेतोवि
द्यावातपसान्विता मद्भक्त्यापेतमात्मानंनसम्यक्प्रपुनातिहि २२ कथंविनारोमहर्षंद्रवताचेतसाविना
विनानंदाश्रुकलयाशुध्येद्भक्त्याविनाशयः २३ वाग्गद्गदाद्रवतेयस्यचित्तंरुदत्यभीक्ष्णंहसतिक्वचि
च्च विलज्जउद्गायतिनृत्यतेचमद्भक्तियुक्तोभुवनंपुनाति २४ यथाग्निनाहेममलंजहातिध्मातंपुनःस्वंभ
जतेचरूपं आत्माचकर्मानुशयंविधूयमद्भक्तियोगेनभजत्यथोमां २५ यथायथात्मापरिमृज्यतेसौम
त्पुण्यगाथाश्रवणाभिधानैः तथातथापश्यतिवस्तुसूक्ष्मंचक्षुर्यथैवांजनसंप्रयुक्तं २६ विषयान्ध्याय
तश्चित्तंविषयेषुविषज्जते मामनुस्मरतश्चित्तंमय्येवप्रविलीयते २७ तस्मादसदभिध्यानंयथास्वप्नम
नोरथं हित्वामयिसमाधत्स्वमनोमद्भावभावितम् २८

ते केवलोभक्तियोगेनैतत्कुतोनेत्याहयथायथेतियथात्माचित्तंपरिमृज्यतेशोध्यतेमत्पुण्यकथानांश्रवणाभिधानैश्चभक्तैरेवा
वात्मस्वापावरणज्ञानेनदृश्यमित्यर्थः २६ किंचध्यानेननामचित्तस्यमदाकारपरिणामःसचमांभजतःस्वभावएवभवति
नचयत्नान्तरमपेक्षतेइतिसदृष्टान्तमाहविषयानिति २७ यस्मादन्यसाधनेतत्फलंचस्वप्नमनोरथवदसदभि
ध्यानमात्रंतस्मात्तद्विहायमय्येवमनःसमाहितंकुर्वितिप्रकरणार्थं
मुपसंहरतितस्मादितिमद्भावभा
वितंममभावेनभजनेनैव
वासितम् २८

विशेषतोवान्यायनायुक्तेत्वाममार्गानुपरिग्रहस्याहस्त्रीणामितिश्चात्मवान्धीरः समूहेमेनिर्भयेदेशेविविक्तेविज
ने १४ एतदुपपादयतिनत्विति अयमर्थः यथातत्संगिसंगतः क्लेशोभवेन्न यथाचवैयोयोषित्संगतः तथाप्यसंग
तोनभवेन्नरति १० मांचिन्तयेदितिउक्तंतत्प्रकारंदर्शयति पश्चेतिध्यानांगप्रश्नः याहगिति ध्येयविशेषणप्रश्नः एतत्से
ध्यानेमेवक्तुमर्हसिइतिपाठः तत्रायमर्थः मुमुक्षत्वाय यथाध्यायेन तन्मेवक्तुमर्हसि जितात्मनः कथनायमेपुनर्देतत
त्वज्ञात्यमेवपुरुषार्थः नतुध्यानेनकृत्यमस्तीतितदुक्तं तथोपयुक्तस्तदपेक्ष्यादिति वक्तुमर्हसीतिपाठः सुगमः ११

स्त्रीणामस्त्रीसंगिनांसंगोयस्मात्सयततात्मवान् तेमेविविक्तआसीनस्त्रियं नयेमामनंतेजितः १४ ततथास्य
भवेत्क्लेशोयावेयस्त्रान्यसंगतः योषित्संगाद्यथापुंसोयथा तत्संगिसंगतः १० उद्धवउवाच यथात्वाम
रविंदाक्षयादृशंवायदात्मकं ध्यायेन्मुमुक्षुरेतन्मेध्यानमेवक्तुमर्हसि ११ श्रीभगवानुवाच समआस
नआसीनःसमकायोयथासुखं हस्तावुत्संगआधायस्वनासाग्रकृतेक्षणः १२ प्राणस्यशोधयेन्मार्गं
पूरकुंभकरेचकैः विपर्ययेणापिशनैरभ्यसेन्निर्जितेंद्रियः १३ हृद्यविच्छिन्नमोंकारंघंटानादंविसोर्णवत्
प्राणेनोदीर्यतत्राथपुनःसंवेशयेत्स्वरम् १४ एवंप्रणवसंयुक्तंप्राणमेवसमभ्यसेत् दशकृत्वस्त्रिषव
णंमासादर्वाक्जितानिलः १५

नत्वध्यानांगत्वेनासनप्राणायामप्रकारमाह समइतिचतुर्भिः समेतास्मिन्नुच्छ्रितेनातिनीचआसनेकेवलादौसमकायःस
मग्रासावस्थआसीनइतिनास्तिकस्वस्तिकादिनियमइत्युक्तंनासाग्रनिरीक्षणाद्विक्षिप्येपीयप्रतलंत्वावहिर्दृष्टिःस्थिरवि
तेःसुखंयत्तइतियोगफलमाक्षेः १२ विपर्ययेणरेचकपूरककुंभकक्रमेणापियदावामनाशाशयंतदक्षिणायान्येनेतत
यावाप्रतिनवामस्येवेलिपर्ययेणावयोक्तयोगो रद्दयाभवयक्षाप्युत्सनेत्यिगलयानत इतिनिर्जितेन्द्रियइतिप्रत्याहारमुक्तं
१३ प्राणायामोद्विविधः सगर्भोगर्भश्चेतितत्रयेष्वगर्भः तावगर्भमाहहृदीतिद्वाभ्यांमूलाधारादारभ्यआविच्छिन्नंसतंत
ंतानादनेनत्वमोंकारंहृदिसंस्थितप्राणेनोदीर्यऊर्ध्वमुद्धारप्राणगुलपर्यंतंनीत्वाकर्थविसोर्णवतकमलनालतंतुवत्तत्रमा
ंत्रानीते स्वरंपंचदशाविंदुसंवेशयेत् अथपुनर्विसर्गतवविंदुशिरस्केऊर्ध्वादित्यर्थः यद्वामूलाधारादारभ्यमूर्धपर्यंतं
विसंतंतुवत्सूक्ष्मसविच्छिन्नंसंतंहृदिसंस्थितप्राणेनोदीर्यामिव्यज्यअथपुनस्तमोंकारंयेननादंतत्स्वरमुद्दात्तनादंश्च

दीऊर्ध्वादिति ३४ मासासर्वोनितानिलोभवति ३५

श्रीः
भा० ११
टी०
९८

एवं ध्यानांगमुक्त्वा ध्यातव्यमित्यस्योत्तरं वक्तुं ध्येयपीठमाह हृत्पुंडरीकमिति सार्धेन अंतः स्वदेहांतर्वर्तिनि ऊर्ध्वनालमधो
मुखम् ... नलिनेव कदलीपुष्पसंकाशं यदस्ति तद्विपरीतं ध्यात्वेत्यर्थः ३६ न्यसेद्धित्वा येन विशेषेण ध्यानमाह वह्नि
मध्य इति वह्निः ध्यानमंगलं ध्यानस्य शुभं विषयं ३७ समं प्रशान्तं सुमुखं दीर्घाश्चारवश्चत्वारो भुजा यस्मिंस्तं तथा सु
चारुः सुंदरा ग्रीवा यस्य तम् ३८ समानयोः कर्णयोर्विन्यस्ते स्फुरती मकराकारे कुंडले यस्मिंस्तम् श्रीवत्सः श्रियो निकेतनं वक्षः

हृत्पुंडरीकमंतस्थमूर्ध्वनालमधोमुखं ध्यात्वोर्ध्वमुखमुन्निद्रमष्टपत्रं सकर्णिकम् ३६ कर्णिकायां न्यसे
त्सूर्यसोमाग्नीनुत्तरोत्तरं वह्निमध्ये स्मरेद्रूपं ममैतद्ध्यानमंगलं ३७ समं प्रशान्तं सुमुखं दीर्घचारुचतु
र्भुजं सुचारुसुंदरग्रीवं सुकपोलं शुचिस्मितं ३८ समानकर्णविन्यस्तस्फुरन्मकरकुंडलं हेमांबरं
घनश्यामं श्रीवत्सश्रीनिकेतनं ३९ शंखचक्रगदापद्मवनमालाविभूषितं नूपुरैर्विलसत्पादं कौ
स्तुभप्रभया युतं ४० द्युमत्किरीटकटककटिसूत्रांगदायुतं सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणं
सुकुमारमभिध्यायेत्सर्वांगेषु
मनो दधत्
४१

सितं हिरण्यवाससं ताभ्यां युक्तमित्यर्थः ३९ द्युमद्भिः किरीटादिभिः समेतं युतमलंकृतं प्रसादेन शोभ
मानेन सुखेनेक्षणं यस्मिन्नेवं तत् सुकुमार
मतिकोमलम् ॥
॥ ४० ॥
४१

९८

सविशेषणं ध्यानमुपसंहरति इंद्रियाणीति प्रकर्षेण नयेत् सर्वतः सर्वांगयुक्ते ४२ यादृशमिच्छ्योन्नरतयाशाणे
विशेषणाभावेन ध्यानमेवं समाधिपर्यंतमाह वृतितिविभिः एकत्रांगे प्रत्यंगानचिंतयेत् ४३ एकत्रेति मुखकेन
देवांगं दर्शयति सुस्मितमिति व्योम्नि सर्वकारणत्वेन तत्कारणमपि मत्कामत्वारोहः मयि शुद्धब्रह्मणि आरूढः स
न्किंचित्पृथग्विभागमपि चिंतयेत् ४४ मामेवात्मनि विचष्टे आत्मानं च मत्वात्मनि मयि संयुतं विचष्टे ज्योतिषि

इंद्रियाणींद्रियार्थेभ्यो मनसाकृष्य तन्मनः बुद्ध्या सारथिना धीरः प्रणयेन्मय सर्वतः ४२ तत्सर्वव्या
पकं चित्तमाकृष्यैकत्र धारयेत् नान्यानि चिंतयेद्भूयः सुस्मितं भावयेन्मुखम् ४३ तत्र लब्धपदं चि
त्तमाकृष्य व्योम्नि धारयेत् नान्यानि चिंतयेद्भूयः तच्च त्यक्त्वा मदारोहो न किंचिदपि चिंतयेत् ४४
एवं समाहितमतिर्मामेवात्मानमात्मनि विचष्टे मयि सर्वात्मन्ज्योतिर्ज्योतिषि संयुतम् ४५ ध्याने
नेत्थं सुतीव्रेण युंजतो योगिनो मनः संयास्यत्याशु निर्वाणं द्रव्यज्ञानक्रियाभ्रमः ४६ इति एकाद
शे चतुर्दशः १४ श्रीभगवानुवाच जितेंद्रियस्य युक्तस्य जितश्वासस्य योगिनः मयि धारयत
श्चेत उपतिष्ठंति सिद्धयः १ ॥

युक्तामिवेत्यन्वयः ४५ एवंभूतसमाधिपर्यंतस्य फलमाह ध्यानेनेति मनो युंजतः समादधतः द्रव्यज्ञानक्रि
याभ्रमः अधिभूताधिदैवाध्यात्मरूपः दृश्यद्रष्टृदर्शनरूपो वा भ्रमः निर्वाणं प्रशांतिं संगम्य संयास्यतीति तत्र यथाः
४६ इति भावार्थे चतुर्दशः १४ ततः पंचदशे प्रोक्ताः सिद्धयो धारणानुगाः श्रीविष्णुपदसंप्राप्तावंतराय
तया मताः एवं मनो युंजतो योगिनोऽणिमादिर्भवंत्यः सिद्धयो ध्यानांतरायभूता एव अतस्ताः परिहृत्य परमेश्वरंभ
जेदिति वक्तुं सिद्धीराह जितेंद्रियस्येति युक्तस्य स्थिरचित्तस्य १ इंद्रियाधिष्ठानत्वादधिदैवं इंद्रियमध्यात्मं विषयाधिभू ने १

श्री॰ भा॰ ए॰ टी॰ ७१

द्धिरिति विवेकः कास्वित् किंनामा कथं स्वित् कीदृशी वा धारणाश्च कति सन्तीत्येवं प्राहुः त्वमेवैतज्जानासि यतस्त्वंसि
द्धिदायकोयोगिनामिति २ धारणाश्चाष्टादशप्रोक्ताः योगपारगैरिति त्रिकालज्ञत्वादिद्वन्द्वसिद्धीरप्यभिप्रेत्य विज्ञा
नेनीतिभावः अष्टमेव प्रधानंमुख्याः स्वभावतः आश्रयोयासांतामत्स्वरूपप्राप्ते भुक्तिविघ्नानाभवंतीतिभावः सत्वोत्कर्ष
हेतवः ३ अणोस्वरूपेणापिदिव्यानित्यप्राणिमेतिमाद्यैः पंचभिः अणिमामहिमालघिमाप्राप्तीदेहस्यैतेत्रयः सिद्ध

उद्धवउवाच कयाधारणयाकास्वित्कथंवासिद्धिरच्युत कतिवासिद्धयोब्रूहियोगिनांसिद्धिदोभ
वान् २ श्रीभगवानुवाच सिद्धयोष्टादशप्रोक्ताधारणायोगपारगैः तासामष्टौमत्प्रधानादशैव
गुणहेतवः ३ अणिमामहिमामूर्तेर्लघिमाप्राप्तिरिन्द्रियैः प्राकाम्यंश्रुतदृष्टेषुशक्तिप्रेरणमी
शिता ४ गुणेष्वसंगोवशितायत्कामस्तदवस्यति एतामेसिद्धयःसौम्यअष्टावौत्पत्तिकामताः
॥ ५ ॥
राम

इन्द्रियैः प्राप्तिर्नामसिद्धिः सर्वप्राणिनामिन्द्रियैस्सह तत्तदधिष्ठातृदेवतारूपेणसंबंधः तथा श्रुतेदृष्टे पारलौकिके
दृश्ये दर्शनयोग्येष्वपि सर्वेषु भूविवरादिनिहितेष्वपि प्राकाम्यं भोगदर्शनसामर्थ्यं सिद्धिः शक्तीनां मायातत्कार्याणां प्रेरणा
नाम् ईशिता तत्र ईश्वरमायायाः प्रेरणं तत्तद्रूपाणां प्रेरणमीशिता नाम सिद्धिः ४ विषयभोगेष्वसंगो वशिता नाम सिद्धिः यत्कामः य
त्सुखं कामयते तदवस्यति तत्सुखस्य सीमानं प्राप्नोतीति सिद्धिः औत्पत्तिकाः
स्वभाविकोनिरतिशयाः श्रुत्यर्थः ५ ॥ राम

७१

गुणहेतवः सिद्धीराह अनूर्मिमत्त्वं द्वन्द्वानिपासादिरहितं तद्रूपप्राप्तिः परकायप्रवेशः ८ स्वेच्छामृत्युः अप्सरोभिः स
ह देवानां क्रीडसत्वासांयुद्दर्शिनप्राप्तिः संकल्पानुरूपा प्राप्तिः अप्रतिहतनाज्ञासर्वेनाहतिः यस्याः साज्ञाज्ञा
वेत्येनाहया ७ इतरसिद्धीश्चाह त्रिकालसत्वमिति अद्वंद्वशीतोष्णायनभावः अग्न्यादीनां संस्तंभनं ८ तथा
वेन्येनाहया ७ दूरसिद्धीश्चाह त्रिकालस्तत्वमिति ... यथेतियावत्समाप्तिः ९ भूतसूक्ष्मोपाधौ मयि तन्मात्रे भूतसूक्ष्माकारं स
र्वाणिभिः सह विशेषमाणिरूपयति यथेतियावत्समाप्तिः ९ भूतसूक्ष्मोपाधौ ...
तन्मात्रोपासकः ममम महिमाणिमानं १० ज्ञानशक्तिमहत्तत्वोपाधौ मयि यथा सर्वस्य महत्वाकारभूतानां चेनिषाका
प्रादिभूतोपाधौ च मयि मनो धारयन् तत्तद्भूतमहिमानं प्राप्नोतीत्यर्थः ११ वाय्वादिभूतानां यो परमाणवः
तन्मयेतदुपाधौ विमनसं धारयन् काया योगीकालसूक्ष्मार्थतां कालापरमोह उपाधिरूपनामितिलघुत्वविदर्णेन

श्रुंदर्शिमत्वे देहे सिद्धे दूरश्रवणदर्शनं मनोजवः कामरूपं परकायप्रवेशनम् ८ स्वच्छंदमृत्युर्देवा
नां सह क्रीडानुदर्शनं यथा संकल्पसंसिद्धिराज्ञाप्रतिहतागतिः ७ त्रिकालज्ञत्वमद्वंद्वं परचित्ताद्यभि
ज्ञता अग्न्यर्काम्बुविषादीनां प्रतिष्टंभोपराजयः ८ एताश्चोद्देशतः प्रोक्ता योगधारणसिद्धयः
यया धारणया या स्याद्यथा वा स्यान्निबोध मे ९ भूतसूक्ष्मात्मनि मयि तन्मात्रं धारयन्मनः अणिमानम
मो वाप्नोति तन्मात्रोपासको मम १० महत्यात्मनि मयि परे यथा संस्थं मनो दधत् महिमानमवाप्नोति भू
तानां च पृथक् पृथक् ११ परमाणुमये चित्तं भूतानां मयि रंजयन् कालसूक्ष्मार्थतां योगी लघिमानम
वाप्नुयात् १२ धारयन्मय्यहंतत्वे मनो वैकारिकेऽखिलम् सर्वेन्द्रियाणामात्मत्वं प्राप्तिं प्राप्नोति मन्मनाः
१३ महत्यात्मनि यः सूत्रे धारयेन्मयि मानसं प्राकाम्यं पारमेष्ठ्यं मे विंदतेऽव्यक्तजन्मनः १४ ॥ ॥

उक्तं स कालः परमाणुवयोः अंते परमाणूनामिति वैकारिकाहंकारोपाधौ मयि प्रत्तिलमेकाग्रमात्मत्वं अधिष्ठा
तृत्वं प्रवहेतः मन्मनाः मयि मनोधारणप्रभावादेव भवति तावतीव हेतुरग्र संयेयडतिभावः एवं महारणानुभावे
न मध्योगबलमाप्नुयादित्यादि उक्तो १२ क्रियाशक्तिप्रधानं महत्तत्त्वमेव सूत्रं तेन तदुपाधौ मयिसः पारमेष्ठ्यं संवेन
त्वसंप्राकाम्यं विंदते वयं भूतस्य अव्यक्तजन्मयस्यानस्य तदुपाधेर्ममेत्यर्थः १४ ॥ ॥

श्री·
भा· ए·
टी·
५८

त्र्यधीश्वरे त्रिगुणमायानियन्तरि अत एव कालविग्रहे प्रकालापि तद्रूपे अन्तर्यामिणि ईशित्वं विशिनष्टि क्षेत्रज्ञा।
नां जीवानां देहानां शरीराणां चक्षुरादीनां प्रेरणं न तु विश्वसृष्ट्यादिकं तस्य तु तल्लक्षणापि तत्त्वं १५ तुरीयाख्ये विरा
ट् हिरण्यगर्भ स्वकारणेभ्य एव परः ईशस्य यत्त्रिभिर्हीनं तुरीयं तत्प्रदेवि उरसि वं लक्षणे ऐश्वर्यस्य समग्रस्य धर्मस्य य
शसः श्रियः ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरिते तदिति भगवच्छब्दशब्दिते १६ यत्र परमानन्दरूपे सर्वोऽपि कामः
तदेकदेशभूतोऽवसीयते समाप्यते तत्र १७ अन्तःस्थे गुणा हेलकाः शुद्धे सत्त्वात्मिके षेन तत्त्वे शुद्धरूपतां १८ आकाशात्मा
पः प्राणः समष्टिरूपः तद्रूपे मयि मानसा घोषं नादं चिन्तयन् एवं अहं सोऽन्तर्जीवः तत्र आकाशे उपलब्धः ज्ञाना तत्र
तत्रस्याः विविधा वाचः प्राप्नोति यद्वा तत्र आवनतशे उपलब्धा अभिव्यक्ताया भूतानां वाचः तान् हंसः शृणोतीति

विष्णौ त्र्यधीश्वरे चित्तं धारयेत्कालविग्रहे स ईशित्वमवाप्नोति क्षेत्रज्ञक्षेत्रचोदिनां १५ नारायणे तुरी
याख्ये भगवच्छब्दशब्दिते मनो मय्यादधद्योगी मद्धर्मा वशितामियात् १६ निर्गुणे ब्रह्मणि मयि धारयन्वि
शदं मनः परमानन्दमाप्नोति यत्र कामोऽवसीयते १७ श्वेतद्वीपपतौ चित्तं शुद्धे धर्ममये मयि धारयञ्छ्वेत
तां याति षडूर्मिरहितो नरः १८ मय्याकाशात्मनि प्राणे मनसा घोषमुद्वहन् तत्रोपलब्धा भूतानां हं
सो वाचः शृणोत्यसौ १९ चक्षुस्त्वष्टरि संयोज्य त्वष्टारमपि चक्षुषि मां तत्र मनसा ध्यायन्विश्वं पश्य
ति सूक्ष्मदृक् २० मनो मयि सुसंयोज्य देहं तदनुवायुना मद्धारणानुभावेन तत्रात्मा यत्र वै मनः यदा म
न उपादाय यद्यद्रूपं बुभूषति तत्तद्भवेन्मनोरूपं मद्योगबलमाश्रयः २२ ॥

१९ त्वष्टाः आदित्यः तस्मिन् परिच्छिन्नं चक्षुः संयोज्य तं चक्षुषि संयोज्य तत्र उभयसंयोगे मां ध्यायन् विश्वं सूक्ष्मं दृ
ष्टः पश्यति २० मनो देहं च तदनुवर्तिना वायुना सह मयि सुसंयोज्य यावद्धारणा क्रियते तेन धारणायाः प्रभावेन यत्र
मनो याति तत्रात्मा देहो यातीत्यर्थः यद्वा मनः कर्तृ आत्मना वायुना सह मायापि सुसंयोज्य यत्र याति तत्र देहो या
तीति २१ मद उपादाय उपादानकारणं कृत्वा यद्देवादिरूपं भवितुमिच्छति तत्तन्मनोरूपं मनोऽभीष्टरूपं यो
गी भवेत् कुतः यतो मद्योगबले योऽहं मद्विन्त्यशक्तिर्नानाकारस्तस्मिन्मयि मनसो यो
गो धारणा तस्य बलं प्रभावः स एवाश्रयः कारणं २२ ॥

राम·
५८

यत्र भवति तत्र आत्मानं चिंतयेत् पिंडं स्वदेहं हित्वा प्राणः प्राणप्रधानलिंगशरीरोपाधिः वायुभूतः बाह्यवायौ भूतः प्रविशतेनेन्द्रियमार्गेणेत्यर्थः २३ पिंडं हित्वेत्युक्तं तत्प्रकारं कथयति स्वच्छंदमृत्युमाह पार्ष्णिना गुदं निरुध्य प्राणं प्राणोपाधिमात्मानं हृत्स्थं कंठमूर्ध्नि क्रमेणारोप्य ब्रह्मरंध्रेण ब्रह्मणि परमात्मनि नीत्वा २४ मत्स्थं सत्त्वं मम मूर्तिं शुद्धसत्त्वं विचिंतयेत् तदा सत्त्ववृत्तयः सत्त्वांशभूताः २५ यदा वा अप्राकाले पि यथा वा निर्णये पुरुषा वा केनापि प्रकारेण बुद्ध्या संकल्पयेत् यथा कामं मत्परो मयि विश्वासवान् भवति तथा तत्तद्रूपं सर्वं प्राप्नोतीत्यर्थः किं कुर्वन् सत्ये सत्यसंकल्पे मयि मनो युंजन् २६ मदिति ईश्वरकार्दं ममेत्यर्थः ईशितुः सर्वनियंतुः वशितुः स्वतं

परकायं विशन्सिद्ध आत्मानं तत्र भावयेत् पिंडं हित्वा विशेत्प्राणो वायुभूतः षडंघ्रिवत् २३ पार्ष्ण्यापीड्य गुदं प्राणं हृदुरःकंठमूर्धसु आरोप्य ब्रह्मरंध्रेण ब्रह्म नीत्वोत्सृजेत्तनुं २४ विहरिष्यन्सुराक्रीडे मत्स्थं सत्त्वं विभावयेत् विमानेनोपतिष्ठंति सत्त्ववृत्तीः सुरस्त्रियः २५ यदा संकल्पयेद्बुद्ध्या यथा वा मत्परः पुमान् मयि सत्ये मनो युंजंस्तथा तत्समुपाश्नुते २६ यो वै मद्भावमापन्नः ईशितुर्वशितुः पुमान् कुतश्चिन्न विहन्येत तस्य चाज्ञा यथा मम २७ मद्भक्त्या शुद्धसत्त्वस्य योगिनो धारणाविदः तस्य त्रैकालिकी बुद्धिर्जन्ममृत्यूपबृंहिता २८ अग्न्यादिभिर्न हन्येत मुनेर्योगमयं वपुः मद्योगशांतचित्तस्य यादसामुदकं यथा २९ मद्विभूतीरभिध्यायन् श्रीवत्सास्त्रविभूषिताः ध्वजातपत्रव्यजनैः स भवेदपराजितः ३० उपासकस्य मामेवं योगधारणया मुनेः सिद्धयः पूर्वकथिता उपतिष्ठंत्यशेषतः ३१ जितेंद्रियस्य दां

त्रस्य ममभावं स्वभावं प्राप्तः पताशतोहेतवः २७ अतः परं धारणाविद इति त्रिकालमेव धारणा सूचिता त्रिकालज्ञत्वं विषयास्तु जन्ममृत्युभ्यामुपबृंहिता तत्सहिता अतएव परचित्तज्ञाद्यभिज्ञतापि व्याख्याता २८ अग्न्यादिभिर्दीपवातशत्रौ भगवान् निरोधे भूतयोगमयं तेनाभिभूयते अत्र हेतुः मद्योगेति यादसा उदकं यथा भिद्यते तन्न भवति तथा यानसाद्यवश्योऽग्न्यादय इत्यर्थः अनयैवात्र हृत्तापि व्याख्याता २९ मद्विभूतीरभिध्यायन् ध्वजादिभिः सह ३० उपसंहरति उपासकस्येति एवं प्रत्यग्धारणाभिः ३१ यद्वा किं नानाधारणाभिर्यासनयैव सर्वाः सिद्धयो भवंतीत्याह जितेंद्रियस्य मद्धारणां नात्यनवयोगित्वात् यास्वत्र भास्यान्सा का न कापि सिद्धिरित्यर्थः ३२ ॥ ॥

श्री· भा· ए· टी ४९

यद्यप्येवं तथापि न प्रार्थ्या इत्याह अंतरायानिति ३३ तस्माद्दैवेंद्रकीयमेव धारणाकार्यो नान्यः काम्या इत्याह जन्मेति
ति जन्मनैव वाञ्छितसिद्धयो भवंति यथा देवानां यथा च यादसां शृङ्खलाभः पद्मादीनां खेचरत्वादि तद्वक्रेणाने जलो
त्तमोषधितपोमंत्रयोगः सिद्धय इति योगेन मद्धारणामित्युक्तेन योगगतिं मत्सालोक्यादिरूपं ३४ कुत इत्यत आह
सर्वासामिति येनाश्रयेणोपपादने हेतुः कारणं पतिः पालयिता चेति किं च न केवलं सिद्धीनामेव प्रभुः अपितु मोदा
दीनामपीत्याह अहमिति योगो मोक्षः सांख्यं तत्साधनं तस्य धर्मस्य तदुपदेष्टॄणां च ब्रह्मवादिनां च ३५ कुतस्तत्राह अह
मिति सर्वदेहिनां जीवानां आत्मा ईश्वरः यतः अंतः अंतर्यामी यथा तत्स्वात्मनेनयाम्यस्य तरतिस्थितेः तर्हि किं मे न वर्ति
त्वात् परिच्छिन्नः तुच्छः न बाह्यस्य व्यापकत्वात् न अंतर्हेतुः अनावृतः यतो दृष्टांतमाह भूतेषु तत्र विषयेषु महाभूता

अंतरायान्वदंत्येता युंजतो योगमुत्तमं मया संपद्यमानस्य कालक्षपणहेतवः ३३ जन्मौषधितपोमं
त्रैर्यावतीरिह सिद्धयः योगेनाप्नोति ताः सर्वा नान्यैर्योगगतिं व्रजेत् ३४ सर्वासामपि सिद्धीनां हेतुः पति
रहं प्रभुः अहं योगस्य सांख्यस्य धर्मस्य ब्रह्मवादिनां ३५ अहमात्मांतरो बाह्योऽनावृतः सर्वदेहिनां
यथा भूतानि भूतेषु बहिरंतः स्वयं तथा ३६ इति श्रीभागवते एकादशे पंचदशोऽध्या
यः १५ उद्धव उवाच त्वं ब्रह्म परमं साक्षादनाद्यंतमपावृतं सर्वेषामपि भावानां त्राणस्थित्यप्ययोद्भवः
१ ॥

नि यथा बहिरंतश्च भवंति स्वयमपि तथेत्यर्थः ३६ इति श्रीभावार्थदीपिकायां एकादशे पंचदशोऽध्यायः १५ षोडशेऽत्र हरे
विभोस्ता विभूतयः ज्ञानवीर्यप्रभावादिविशेषेणोपवर्ण्यंते अंतस्त्रिंशेन यद्भावमशावमहत्तात्मना अनंतलयो
यतो यत्साविभूत्यादिनिरूपणं पूर्वेणाध्यायेन योगानां महिम्ना निरूपिताः ब्रह्मवत्संभवेनात्मसममादिवत्सप्ते वंथ
मनो यत्निर्धारेमद्रन्योचु ततः परं शास्त्रदर्शनेन जरेव महत्तिन्यागव्यवस्थितो हेतुतां निरस्तनो योगनिष्ठा योगवर्ग्यादशो
त्रयः साधननिर्धारे ध्याने चैव वचन दृशो धारणासिद्धिभुङ्गीवशसंगेन निरूप्यते उद्धवः प्रश्नोत्तरं उत्तरं हरिणार्थि
ते षोडशे भूतिविस्तारे हयेविवर्णाश्रमत्वेन ज्ञानादिनिर्णये वाग्मीयमादीनां च निर्णये योगत्रयाधिकारे च विशेष
तद्वेनेतरे तत्वसंख्याविवादे च प्रकृत्योर्विवेचने जन्मभृत्युप्रकारे च तद्विशेषे तद्वनेनरे परापराधपठनेच्छतर्मि
रतद्वेनेतरे समविंशोक्रियायोगप्रश्नोत्तरदपवर्णने अष्टाविंशे ततः श्रोज्ञानयोगोपसंहृतिः १ ॥ ॥

राम· ४९

नदशान्याशनः ग्रथेभक्तियोगायसं
एवं प्रश्नोत्तरगणपवर्जक्रमेणोनानिविंशतिः संसारसंभवेषु ग्रेतन्मध्येदन्तगवरं
पवंप्रश्नोत्तरगणपवरक्रमेणोनानिविंशतिः संसारसंभवेषु प्रेमन्मध्ये... नदवभूतानि
हृतिः ग्रहमात्मानेशवाद्योनाहृनः सर्वदेहिनां यथाभूतानिभूतेषुवाहिरेनः स्वयंनयेम्नेके नदवभूतानि
धयाववकविन्केनविक्षणाविशेषेणोदिक्तानिवर्तेनेकविन्ताप्तामान्यरूपेणोवनयात्वमपिवाकथंवर्तसेइतिवंभूनीः
प्रश्नंप्रथमेनावदनक्रमेवसर्वात्मत्वमनुपपादयन्ननुवदतितिवसेति ग्रपाहनेनिशवरणास्वनेभवाग्रनपवशामपिज्ञाणं
दलणास्थितिनीवनेज्ञाणास्थितिसहितावत्मयोद्भवोवनयस्मात्सत्वमुपादानकारणमित्यर्थः १ अवसदावारंश
माणमाह यथानयोयथार्थत्वनसर्वभूतकारणोत्वोग्रमस्यणावेदनान्यथेविदः २ एवंकारणत्वेनसर्वात्मत्वमा
रूपविभूतीः हृक्कानि येषुवि उपासीनाः सेविमानाः ३ इतेयत्वमाह गूढः ग्रस्फुटः भूतानांप्राणिनां

उद्भावयेषुभूतेषु उत्तेयमहत्वात्मभिः उपासनेनोभगवन्ध्यानध्यानवाक्यणः २ येषुयेषुवभा
वेषुभक्त्यात्वपरमर्षयः उपासीनाः ग्रपद्यतेसंसिद्धिंनदद्समे ३ गूढस्वरसिभूतात्माभूतानांभून
भावन नत्वाप्रश्यानिभूतानिप्रयतेमोहितानिते ४ याः काश्चभूमौदिविवैरसायांविभूतयोदिव्य
महाविभूतीनामसत्माख्यास्तुभाविनास्ताभामितीध्यपदाग्रियद्यम् ५ श्रीभगवानुवाच एवमेत
दहेष्टयः ग्रन्नस्त्वविदोवर् युयुन्स्तनाविनशनेसंपतेत्विनेनत्वे ६ ज्ञात्वाज्ञानिवयंगर्हामथर्मेराज्य
हेवत्वं ननानिहृज्ञोहनाहेहृनायमितिलोकिवे मनदापरुषव्याघ्रोज्ञत्याम्प्रतिबोधितः सूर्य
भाषनमामेवयथान्तेरणभूर्धति ७ ग्रहमात्माहवामीषांभूतानांसहृदीश्वरः ग्रहंसर्वाणिभूतानिनि

नः ग्रवहेनः भूतानामात्माग्रंतर्यामी ग्रत्रापिहेतुः हेभूतभावनेतिनेत्वया ४ नोपतसावत्वेनहृकानि हेमहा
विभूतयाः काश्चिद्भूम्यादिषुतेविभूतयः रसायांरसातलेप्रभाविनाः त्वयैव वेनविहितानि विशेषेणसंयोजिताः
नीयानायदेत्वदंग्रियमेव ५ नरावताभूतान्नेनप्रससवादित्वान्नवायप्रश्नः साथीयानिनिनावदन्मादेन एवमि
निविभिःप्रश्नसंदोसपत्नेर्योत्तुमिच्छनाविनशानेमनरुदेवे ६ युयुन्सोविभूनिप्रश्नेकः प्रसंगः नवाहमात्मेति लो
विवकः प्राहतमतिः सन् ७ सवयदाननाज्ञानिवधान्निहनः नदामयाप्रतिबोधितः सन् यथात्वमपिभाषसेएवंस
ग्राणषुत्वोमामभ्यभाषत नहदेवनयाससर्वाविभूतयस्ताश्रुयासनार्थेकथाती यदीयवमीविभक्तिः काचिन्निर्धारण
सेवाधवेवसंवेधनेवक्रविद्याथायोगदृष्या ननश्रामीषोभूतानांग्रामोनिसहदिनिर्दिपरश्नवसमान्येनाहमुपा

गी० टी०
१२

२.

श्री·
भा·प·
टी·
५·

विशेषतोविष्णुर्नारायह कलयतांवशीकुर्वतांमध्ये गुणानांमध्ये गणितार्थमितिडीस्पत्निकः स्वभाविकोयोगुणःसोहं
१० स्वेवउत्पमकार्यमहात्महन्तेत्वस्त्वमापाधिन दुर्जेयत्वाज्जीवस्यसूक्ष्मत्वं वुद्धेर्गतानामगतोनैवैवबालाग्रमा
त्रोप्यवसेयिदस्युरतिमुनेः ११ वेदानांसर्वेषांतेषामध्यापकः पदानित्रिपदागायत्रीत्यर्थः १२ १३ हविर्धानीका
कामधेनुः १४ १५ नक्षत्रौषधीनामधिपंसोमं यक्षरक्षसामधिपंवैश्रवणमित्यर्थः १६ शृंगिणांदंष्ट्रिणांचमध्ये तेषा

महेगतिगतिमतांकालःकलयतामहं गुणानांवण्यहंसाम्यंगुणान्योन्यत्रिकोगुणः १ गुणानामप्य
हंसत्वेमहत्तत्वमहानहं सत्वानामप्यहंजीवोदुर्जेयानामहंमनः ११ हिरण्यगर्भोवेदानांमंत्राणां
प्रणवस्त्रिवृत् अक्षराणामकारोस्मिपदानिछंदसामहं १२ इंद्रोहंसर्वदेवानांवसूनामस्मिहव्यवाट्
आदित्यानामहंविष्णूरुद्राणांनीललोहितः १३ ब्रह्मर्षीणांभृगुरहंराजर्षीणामहंमनुः देवर्षीणांनारदो
हंहविर्धान्यस्मिधेनुषु १४ सिद्धेश्वराणांकपिलःसुपर्णोहंपतत्रिणां प्रजापतीनांदक्षोहंपितॄणाम
हमर्यमा १५ मांविद्धुद्धवदैत्यानांप्रह्लादमसुरेश्वरं सोमंनक्षत्रौषधीनांधनेशंयक्षरक्षसां १६ ऐरा
वतंगजेंद्राणांयादसांवरुणंप्रभुं तपतांद्युमतांसूर्यंमनुष्याणांचभूपतिं १७ उच्चैःश्रवास्तुरंगाणांधा
तूनामस्मिकांचनं यमःसंयमतांचाहंसर्पाणामस्मिवासुकिः १८ नागेंद्राणामनंतोहंमृगेंद्रःशृंगि
दंष्ट्रिणां आश्रमाणामहंतुर्यौवर्णानांप्रथमोनघ १९ तीर्थानांस्रोतसांगंगासमुद्रःसरसामहं आ
युधानांधनुरहंत्रिपुरघ्नोधनुष्मतां २० धिष्ण्यानामस्म्यहंमेरुर्गहनानांहिमालयः वनस्पतीनामश्व
त्थऔषधीनामहंयवः २१ पुरोधसांवसिष्ठोहंब्रह्मिष्ठानांबृहस्पतिः स्कंदोहंसर्वसेनान्यामग्रण्यां
भगवानजः २२ यज्ञानांब्रह्मयज्ञोहंव्रतानामविहिंसनं वाय्वग्न्यर्काम्बुवागात्माशुचीनामप्यहंशु

तुर्यौतुर्यः संन्यासःप्रथमाब्राह्मणः १९ स्रोतसांप्रवाहवतां सरसांस्थिरोदकाशयानां २० धिष्ण्यानांनिवा
सस्थानानांदुर्गमानां २१ ब्रह्मिष्ठानांवेदार्थनिष्ठानां सेनान्यांचमूपतीनांअग्रण्योसन्मार्गप्रवर्तकानां ब्रह्मा
सर्वेषांशोधकानामपिमार्जनजलदानाववर्षणादीनावाग्यादिरूपःशोधकोहं २२ ॥ ॥ यादसांप्रभुं तपतांप्रा
तापवतांद्युमतांदीप्तिमतांचमध्ये १७ संयमतांदंडयतामित्यर्थः १८ ॥

राम·
५०

योगानामष्टांगयोगानांमध्येआत्मसंरोधः समाधिरहं मंत्रोनीतिःकौशलानांविवेकादिनैपुण्यानांमध्येआन्वीक्षिकी
आत्मानात्मविवेकविद्या वाख्यातिः आख्यातिरन्यथाख्यातिः शून्यातिः असत्ख्यातिरनिर्वचनीयख्यातिवादिनां
एवमिदमेवेतियादृशोविकल्पः सोहमित्यर्थः २४ कुमारः सनत्कुमारः २५ संन्यासोभूतानामभयदानंक्षेमाणामभ
यस्थानानांमध्येअबहिर्मतिः अंतर्निष्ठा सूनृतंनप्रियवचनंमौनेनच नहिप्रियभाषणोमौनेनवगुह्यस्याभिप्रायोज्ञा
यते अजः प्रजापतिः अस्यदेहार्धाभ्यांमिथुनमभूत् सएवंशुद्धोमिथुनेअर्थात्रूपावयवात्मनोयत्नात्तीनिग्रहतेः २६
अनिमिषामप्रमत्तानांमध्येमधुमाधवौरसंतइत्यर्थः अभिजित् उत्तराषाढायास्तुर्यःपादः तथाचा
श्रुतिः अभिजिन्नामनक्षत्रमुपरिष्टादाषाढानामवस्तात्श्रोणायाइत्यादि २७ कृतंनयुगेदेवलः असितःअनीनां

[illegible]

योगानामात्मसंरोधोमंत्रोस्मिविजिगीषतां आन्वीक्षिकीकौशलानांविकल्पःख्यातिवादिनां २४
स्त्रीणांतुशतरूपाहंपुंसांस्वायंभुवोमनुः नारायणोमुनीनांचकुमारोब्रह्मचारिणां २५ धर्माणामस्मि
संन्यासःक्षेमाणामबहिर्मतिः गुह्यानांसूनृतंमौनंमिथुनानामजस्त्वहं २६ संवत्सरोस्म्यनिमिषामृतू
नांमधुमाधवौ मासानांमार्गशीर्षोहंनक्षत्राणांतथाभिजित् २७ अहंयुगानांचकृतंधीराणांदेवलोसि
तः द्वैपायनोस्मिव्यासानांकवीनांकाव्यआत्मवान् २८ वासुदेवोभगवतांत्वंतुभागवतेष्वहं किंपु
रुषाणांहनुमान्विद्याध्राणांसुदर्शनः २९ रत्नानांपद्मरागोस्मिपद्मकोशःसुपेशसां कुशोस्मिदर्भजाती
नांगव्यमाज्यंहविःष्वहं ३० व्यवसायिनामहंलक्ष्मीःकितवानांछलग्रहः तितिक्षास्मितितिक्षूणांसत्वं
सत्ववतामहं ३१ ओजःसहोबलवतांकर्माहंविद्धिसात्वतां सात्वतांनवमूर्तीनामादिमूर्तिरहंपरा

[illegible]

व्यासानांवेदविभागकर्तॄणांकवीनांविदुषांकाव्यःशुक्रः २८ भगवतोउत्पत्तिंप्रलयंचैवभूतानामागतिंगतिं वेत्ति
विद्यामविद्यांचसवाच्योभगवानितिदेवलक्षणानां २९ सुपेशसांसुंदराणांपेशलानांकोमलानांदर्भजातीनांकाशा
हवींषीनांहविःकल्पपुरोडाशादिषुहूयतेघृतंवा ३० लक्ष्मीःदनायनादिसेवनं ३१ बलवतांओजश्चसहश्चसात्वतां
भागवतानांभजनीयाःकर्माहमित्यर्थः तेषामेवनवमूर्तीनांवासुदेवसंकर्षणप्रद्युम्नानिरुद्धनारायणहयग्री
ववराहनृसिंहब्रह्माणइतियाः नवमूर्तयःतासांमध्येवासुदेवाख्या ३२ गंधर्वाणांविश्वावसुःअप्सरसांपूर्वचित्तिःगि
धमात्रिपविहितं ३३ धरमःसथुरःधराख्याःशत्रुः ३४ अर्जुनःपार्थः भूतानांप्राणिनांनिसंक्रमःप्रलयः ३५

श्री॰ भा॰ टी॰ स्कं॰ ११

अर्जुनः पार्थः गत्यादयः पंचकर्मेन्द्रियव्यापाराः स्पर्शादयो ज्ञानेन्द्रियव्यापाराः आनन्दलक्षणः स्पर्शः सर्वेन्द्रिया णामिन्द्रियं तत्तद्दर्शनग्रहणशक्तिरूपमहं ३६ तदेवं तत्त्वनिर्धारणेन ततत्त्वैर्वैधेन च विशेषवाविश्वतीमि रूपेशानी सामान्यतः सर्वाण्यपि निरूपयति पृथिवीति सार्थद्वयेन पृथिव्यादिशब्दैस्तन्मात्राणि विवक्षितानि अहंसः हंकारः मदात्महत्तत्त्वं एताः सप्त प्रकृतिविकृतयः विकाराः पंचमहाभूतानि एकादशेन्द्रियाणि चेत्ये वं षोडशसंख्याकः पुरुषो जीवः अव्यक्तं प्रकृतिः पंचपंचविंशतितत्त्वानि तदुक्तं मूलप्रकृतिरविकृतिर्महदा द्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः सत्त्वं रजः तमः इति प्रकृतेर्गुणाः अपरं

गुणानां सत्त्वं परमस्तेजिष्ठानां विभावसुः प्रभा सूर्येन्दुताराणां शब्दोऽहं नभसः परः ३४ ब्रह्मण्यानां ब
लिरहं वीराणामहमर्जुनः भूतानां स्थित्युत्पत्त्यप्ययोऽहं वै प्रतिसंक्रमः ३५ गत्युक्त्युत्सर्गोपादा
नमानन्दस्पर्शलक्षणं आस्वादश्रुत्यवघ्राणमहं सर्वेन्द्रियेन्द्रियं ३६ पृथिवी वायुराकाश आ
पो ज्योतिरहं महान् विकारः पुरुषोऽव्यक्तं रजः सत्त्वं तमः परम् अहमेतत्प्रसंख्यानं ज्ञानं तत्त्व
विनिश्चयः ३७ मयेश्वरेण जीवेन गुणेन गुणिना विना सर्वात्मनापि सर्वेण न भावो विद्यते
क्वचित् ३८ संख्यानं परमाणूनां कालेन क्रियते मया न तथा मे विभूतीनां सृजतोऽण्डानि कोटि
शः ३९ तेजः श्रीः कीर्तिरैश्वर्यं ह्रीस्त्यागः सौभगं भगः वीर्यं तितिक्षा विज्ञानं यत्र यत्र स मे अंशकः
४० एतास्ते कीर्तिताः सर्वाः संक्षेपेण विभूतयः मनोविकारा एवैते यथा वाचाभिधीयते ४१

रं प्रसवनं हेतत् सर्वमहमेव किंच एतत्प्रसंख्यानं तेषां परिगणनं एतेषां लक्षणतो ज्ञानं तत्फलं तत्त्वविनिश्चयश्चा हमेव ३७ एतदेव सत्त्वियाहमयेति जीवेश्वररूपादिविशेषभावः यश्च गुणगुणिरूपः यश्च देवसदेवरूपः सर्वो पि मया विना मद्व्यतिरेकेण नास्ति अहमेव सर्वमित्यर्थः ३८ ननु सामान्यतः विश्वं सत्त्विया कथयासि पूर्ववन् निर्धा रणं सर्वथाप्या विशेषतः सर्वाः कथयेति चेत्तत्राह संख्यानं पृथिव्यादिपरमाणूनां कालेन महता तदपि मयैव क्रि यते न तु त्वादृशेन शक्यते नथा से विभूतीनां संख्यानं केनापि न शक्यते कुतः इत्यत आह सृजतोऽण्डानीति यदा मया स्र ज्यमानानां ब्रह्माण्डानामेव नास्ति संख्या नास्ति तदा कुतस्तदन्तर्गतानां विभूतीनां संख्येत्यर्थः ३९ तथापि विशेषत एव सर्वाः संक्षेपतः कथयामीत्याह तेजः प्रभावः श्रीः संपत् सौभगं मनोनयनाह्लादकत्वं भगः भाग्यं वीर्यं बलं स मे अंशकः विभू ति ४० एतेषु विभूतिभेदाम इति चित्रावबोधकत्वं तासु आसक्ति अभिनिवेशः कर्तव्यः इत्याह मनोविकारा एवैत

म्रसंयच्छतेमुष्ठां न विन्देदात्ममाहन्त यद्गति असंयच्छन् नसंयच्छति ४५ परिसमाप्यते हन्त न हन्तात्मो भवतीत्यर्थः ४६ इति
श्रीभागवते एकादशे एकोनविंशोऽध्यायः १९ ततः समस्तदोषघ्नं स्वधर्मं भक्तिलक्षणं हंसोक्तं धर्ममन्वाह ब्रह्मचारिगृहस्थ
योः कर्त्तीहे विंशिसाविन्तामित्यत्रभक्त्याह तेव कर्मणोदसाधनेमहिश्रुतिरित्युक्तं भक्तिसाधनत्वे च कर्मणो मयोदितेष्वव
हितः स्वधर्मस्थित्यादिना तत्र तत्रोक्तं न च वर्णाश्रमाचाराणां भक्तिहेतुत्वेन स्फुटतयैव नियमस्त्वयेति सप्तभिः पूर्वं कलादौ त्वद्भ
क्तिलक्षणः त्वत्प्राप्तिसाधनमित्यर्थः वर्णाश्रमवतीनामपि द्विपदां नराणां १ यथा येन प्रकारेणानुष्ठीयमाने
न स्वधर्मेण २ तत्र संप्रदायादेव ज्ञास्यते किं वर्णनेनेत्याह त्रिभिरिति परमकं परमश्रेष्ठं सांकेतरखत्रूपेण तत्र यो हंस

यो वै वाङ्मनसी सम्यगसंयच्छन्धिया यतिः तस्य व्रतं तपो दानं स्रवत्यामघटाम्बुवत् ४५ तस्माद्वाचो मनः प्रा
णान्नियच्छेन्मत्परायणः मद्भक्तियुक्तया बुद्ध्या ततः परिसमाप्यते ४६ इति श्रीभागवते एकादशे महा
विभूत नामैकोनविंशोऽध्यायः १९ उद्धव उवाच यस्त्वयाभिहितः पूर्वं धर्मस्त्वद्भक्तिलक्षणः वर्णाश्रमाचा
रवतां सर्वेषां द्विपदामपि १ यथानुष्ठीयमानेन त्वयि भक्तिर्नृणां भवेत् स्वधर्मेणारविन्दाक्ष तन्ममा
ख्यातुमर्हसि २ पुरा किल महाबाहो धर्मं परमकं प्रभो यत्तेन हंसरूपेण ब्रह्मणेऽभ्यात्थ माधव ३
स इदानीं सुमहता कालेनामित्रकर्षण न प्रायो भविता मर्त्यलोके प्रागनुशासितः ४ वक्ता कर्ताविता ना
न्यो धर्मस्याच्युत ते भुवि सभायामपि वैरिञ्च्यां यत्र मूर्तिधराः कलाः ५ कर्त्राविता प्रवक्त्रा च भवता मधुसू
दन त्यक्ते महीतले देव विनष्टं कः प्रवक्ष्यति ६ तत्त्वं नः सर्वधर्मज्ञ धर्मस्त्वद्भक्तिलक्षणः यथा यस्य वि
धीयेत तथा वर्णय मे प्रभो ७ शुक उवाच इत्थं स्वभृत्यमुख्येन पृष्टः स भगवान्हरिः प्रीतः क्षेमाय मर्त्याना

रूपेण धर्मो युक्त एव तत्र योगमार्गं जानीत्रमागतं यस्ते युष्मद्धर्मं विवक्षये स्वमत्वात् ३ प्रागनुशासितोऽपि न भवि
तानेभविष्यति ४ तत्र हेतुमाह वक्तेति द्वाभ्यां तेनोन्यः कलावेदाद्याः तत्र स्मात्तः शुस्मावं मनुष्याणां मध्ये यस्य यथा
विधीयते ७ धर्माः धर्माद्दन पेतः तैः श्रेयस्करः सनातनः नेयमं निबोध ८ तत्रादौ महदुपासनालक्षणएव शुद्धो
धर्मः प्रागासीत् आचारलक्षणस्तु पश्चात् प्रवृत्तः स चैवमनुष्ठितो भक्तिहेतुरिति वर्णयितुमाह आदाविति कल्पादौ युग
न्तु नयुगे तस्मिन् नेवनदामाशुपासनपवके वलेनान्यन्तु वैति इतिवन्नेहतनयुगानाममणिकन्त्रिमाह कृततेहत्यादिना

२

श्री०
भा० पु०
टी०
५२

किंच विधेयकाभावादपि तदानीं त्वानानान्यत्कर्मास्तीत्याह वेद इति धर्मश्च मनोविषयोऽहमेव वृषरूपधृक् चतुष्पात्
तक्रियाविशेषोपलक्षणादिः अतस्तपोनिष्ठाः मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तप इति वचनादेकाग्रतया हंसं शुद्धं
मां ध्यायन्तीत्यर्थः ११ पश्चात् त्रेतायां वेदत्रयमभूदित्याह त्रेतामुख इति प्राणात् त्रिमिश्रात् हृदयादाकाशात् तस्याः त्रय्याः सकाशात् हो
त्राध्वर्यवौद्गात्रैः त्रिवृत् त्रिरूपः यज्ञोऽहमेवाविरासमिति शेषः ११ वर्णानामाश्रमाचारधर्मान् वक्तुं तेषामुत्पत्तिमाह द्वाभ्यां
विप्रेति आत्माचारः स्वधर्म एव लक्षणं ज्ञापकं येषां १२ मम वैराजरूपस्य हृदः वक्षसो मोक्षस्थानात् उरसो वनेस्थिकाभि

श्रीभगवानुवाच धर्म्य एष तव प्रश्नो नैःश्रेयसकरो नृणां वर्णाश्रमाचारवतां तमुद्धव निबोध मे ९ आद्यौ
कृते युगे वर्णो नृणां हंस इति स्मृतिः कृतकृत्याः प्रजा जात्या तस्मात्कृतयुगं विदुः १० वेदः प्रणव
एवाग्रे धर्मोऽहं वृषरूपधृक् उपासते तपोनिष्ठाः हंसं मां मुक्तकिल्बिषाः ११ त्रेतामुखे महाभाग प्राणा
न्मे हृदयात्त्रयी विद्या प्रादुरभून्तस्या अहमासं त्रिवृन्मखः १२ विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः
वैराजात्पुरुषाज्जाता य आत्माचारलक्षणाः १३ गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम वक्षःस्थलाद्वने
वासो न्यासः शीर्षणि संस्थितः १४ वर्णानामाश्रमाणां च जन्मभूम्यनुसारिणीः आसन्प्रकृतयो नृणां
नीचैर्नीचोत्तमोत्तमाः १५ शमो दमस्तपः शौचं संतोषः क्षान्तिरार्जवं मद्भक्तिश्च दया सत्यं ब्रह्मप्र
कृतयस्त्विमाः १६ तेजो बलं धृतिः शौर्यं तितिक्षौदार्यमुद्यमः स्थैर्यं ब्रह्मण्यमैश्वर्यं क्षत्रप्रकृतय
स्त्विमाः १७ आस्तिक्यं दाननिष्ठा च अदम्भो ब्रह्मसेवनं अतुष्टिरर्थोपचयैर्वैश्यप्रकृतयस्त्विमाः
१८ शुश्रूषणं द्विजगवां देवानां चाप्यमायया तत्र लब्धेन संतोषः शूद्रप्रकृतयस्त्विमाः १९ अशौच
मनृतं स्तेयं नास्तिक्यं शुष्कविग्रहः कामः क्रोधश्च तर्षश्च स्वभावोऽन्तेवसायिनां २० अहिंसा सत्यमस्ते

प्राप्ये १३ तेषामधिकारिविशेषेण स्वभावानाह वर्णानामिति त्रिभिः जन्मस्थानानुसारिणीः नीचैःस्थानाये अ
नीयमर्थः मद्राभिर्जन्मभूमितिः मद्रा उत्तमाभिरुत्तमाश्चेति १४ तत्र पश्चालोचने १५ तेजः प्रतापः एतैरेवाश्च
मस्वभावा प्रविवेत्तयाः १९ तदा त्रोतां स्वभावानाह अशौचमिति शुष्कः शुष्को विग्रहः निर्मूलकलहः तर्षः
तृष्णा २० तत्र तावत्सर्वसाधारणं धर्ममाह अहिंसेति वर्णाश्रमाणामुपलक्षणार्थम् २० ॥ ॥ ॥

एका०
५२

वर्णधर्मो गृहस्थस्य प्रकरणे वक्ष्यति प्रथमे तावदाश्रमे ब्रह्मचारिणो धर्मा वर्ण्यन्ते स च द्विविधः उपकुर्वाणो नैष्ठिकश्च तत्र
आद्यस्य धर्मानाह द्वितीयामिति नवभिः द्विजः त्रैवर्णिकः आनुपूर्व्यात् गर्भाधानादिसंस्कारक्रमेण द्वितीयमुपनयनाख्यं
जन्म प्राप्याचार्यगृहे ब्रह्म वेदमधीयेत वकारान्तरं देशं च विचारयेत् २० किंच मेखलादीन् धारयेत् अज
पाञ्चेनाक्षमालाकमण्डलुना जटिलः अनन्तरमविनाजानन्नटः तथा अधौतवासाः अरक्तपीठः देवेनस्ववासस्तद्वयासीन
यौ नानि नानि यस्यसः अधौतवासाः सचामावरक्तपीठश्च नवकौशेयादिनारक्तः पीठमासनं यस्य सः २१ जपस्तुत्याद्
मूत्रपुरीषोत्सर्गस्नानजपोच्चारेनास्मिन्नाम्यतः मौनी भवेत् २२ देवीबुद्धिपूर्वेनोपभुञ्जेन ब्रह्मचर्यव्रतधरः गृहस्थस्य स्वयमेकश्च

द्वितीयं प्राप्यानुपूर्व्या जन्मोपनयनं द्विजः वसेद्गुरुकुले दान्तो ब्रह्माधीयीत वाग्यतः २०
मेखलाजिनदण्डाक्षमालाकमण्डलून् जटी स्नातो धौतवासाः सोऽरक्तपीठः कुशान् दधत् २१
स्नानभोजनहोमेषु जपोच्चारे च वाग्यतः न छिन्द्यान्नखरोमाणि कक्षोपस्थगतान्यपि २२
नेन्नो नावि करेमानब्रह्मचर्यव्रतधरः स्वयं अवकीर्णो भवेत्
गत्वा स्नात्वा यथाशास्त्रं त्रिपदीं जपेत् २३ अन्यकार्यं गोविप्रगुरुवृद्धस्त्रातान्तपुविसमाहितमुपासीत
संध्ये वयनवाग्जपन् २४ आचार्यं मां विजानीयान्नावमन्येत कर्हिचित् न मर्त्यबुद्ध्यासूयेत सर्वदेवमयो गुरुः २५
सायं प्रातरुपानीय भैक्ष्यं तस्मै निवेदयेत् यच्चान्यदप्यनुज्ञातमुपभुञ्जीत संयतः २६
शुश्रूषमाणमाचार्यं सदोपासीत नीचवत् यानशय्यासनस्थानैर्नातिदूरे कृताञ्जलिः २७
एवं वृत्तो गुरुकुले वसेद्भोगविवर्जितः विद्या समाप्यते यावद्विभ्रद्व्रतमखण्डितम् २८
यद्यसौ छन्दसां लोकमारोक्ष्यन्ब्रह्मविष्ट

विरक्तचीर्णो गृह... स्नात्वा यथानास्तुः कृतप्राणायामः त्रिपदीं गायत्रीं जपेत् २३ संध्ये वाग्यतवाक् जपन्नुपासीत
मर्त्याकृतिः स्थानि मिश्रेण मान्नास्तीति द्विवत् २४ अन्यदपि यत्सेप्रामेन तस्मै निवेदयेत् तेनानुज्ञातमुपभुञ्जी
तेमर्थः २६ यानशय्यासनस्थानैर्यानं प्रस्थानं यानेन निद्रानं समशयनं तयाः समीपशायनेन विश्रान्तं पादसंवाहनादिभिः
समीपासनेन आसीनेन कृताञ्जलिः नियोगप्रतीक्षया नातिदूरेवस्थानेनेमर्थः २७ एवं भूतं व्रतमाचारो यस्य सः २८ य
द्यसौ कुर्वाणो लोकस्य धर्मानुष्ठानेन हि लोकस्यातिशुभधर्मेनाह यद्यसीतिषड्भिः असौ ब्रह्मचारी यदि छन्दसां लोकं महर
लोकं ततो ब्रह्मलोकं वारोढुं स्यात् स्यारोढुमिच्छेत् नैष्ठिकः यदा छन्दसां लोकमिति ब्रह्मलोकविशेषणं यत्र मूर्तिधरा
कलाश्छन्दांसि तत् महिमहद्व्रतः सन् व्रतं नैष्ठिकं व्रतं यस्य सः विन्यसेत् समर्पयेत् अधिकस्वाध्यायार्थेव अधीनतनिर

श्री॰ भा॰ ए॰ टी॰ ५२

ब्रह्मवर्चः वेदाभ्यासजं तेजः तद्वान् ३१ ३१ नैष्ठिकस्य तस्यापि साधारणधर्मानाह स्त्रीणामिति निरीक्षणं भावग
र्भं क्ष्वेलनं परिहासः एवमादिकं त्यजेत् मिथुनीभूतान् अगृहस्थो न पश्येत् इत्यर्थः ३२ नैष्ठिकस्य सर्वाश्रमसाधारणं धर्ममा
ह शौचमिति द्वाभ्यां निष्ठामनोऽभिव्यक्तं स्नानमाद्यफलमाह एवमिति अमलः निष्कामत्वेन दग्धः कर्माशयेन का
रणं यस्य तथाभूतः मद्भक्तो भवति ३५ उपकुर्वाणस्य समावर्तनं तत्फलं चाह अथेति अनन्तरं द्वितीयमाश्रममावेक्ष्य
न् प्रवेष्टुमिच्छन् यथावत् विचारितवेदार्थः स्नायात् अभ्यंगादिकं कृत्वा समावर्तेतेत्यर्थः ३६ तस्यापि अधिकाराण
रूपमाश्रमविकल्पसमुच्चयावाह गृहमिति सकामस्तु गृहे प्रविशेत् शुद्धान्तःकरणस्तु आदिर्वा वनं प्रविशे
त् शुद्धान्तःकरणः सन् द्विजोत्तमः ब्राह्मणस्तु प्रव्रजेदित्यर्थः यद्वा आश्रमादाश्रमं नानारंगेऽक्रमेण अन्यथा अन

अग्नौ गुरावात्मनि च सर्वभूतेषु मां परं अपृथग्धीरुपासीत ब्रह्मवर्चस्व्यकल्मषः ३१ स्त्रीणां निरीक्षणस्पर्श
संलापक्ष्वेलनादिकं प्राणिनो मिथुनीभूतानगृहस्थोग्रतस्त्यजेत् ३२ शौचमाचमनं स्नानं संध्योपा
सनमार्जवं तीर्थसेवा जपोऽस्पृश्याभक्ष्यासंभाष्यवर्जनं ३३ सर्वाश्रमप्रयुक्तोयं नियमः कुलनंदन म
द्भावः सर्वभूतेषु मनोवाक्कायसंयमः ३४ एवं बृहद्व्रतधरो ब्राह्मणोऽग्निरिव ज्वलन् मद्भक्तस्तीव्रत
पसा दग्धकर्माशयोमलः ३५ अथानंतरमावेक्ष्यन्यथाजिज्ञासितागमः गुरवे दक्षिणां दत्त्वा स्ना
याद्गुर्वनुमोदितः ३६ गृहं वनं वोपविशेत्प्रव्रजेद्वा द्विजोत्तमः आश्रमादाश्रमं गच्छेन्नान्यथा मत्प
रश्चरेत् ३७ गृहार्थी सदृशीं भार्यामुद्वहेदजुगुप्सितां यवीयसीं तु वयसा यां सवर्णामनुक्रमात् ३८
इज्याध्ययनदानानि सर्वेषां च द्विजन्मनां प्रतिग्रहोऽध्यापनं च ब्राह्मणस्यैव याजनं ३९ ॥ ॥

अपीड्यन्ति लोमं च ना वरेदित्यर्थः अमत्परः इति वा छेदः स्वभक्तस्याश्रमनियमाभावस्य वक्ष्यमाणत्वात् ३७ वि
विवाहनियमपूर्वकं वर्णधर्मं गृहस्थगृहधर्मानाह गृहार्थीति सदृशीं सवर्णां अजुगुप्सितां कुलेनोलक्षणेन सुं
निंदितां कामतस्तु यामन्यामुद्वहेत् तां सवर्णां आद्यतस्तामग्रेनन्तरं तत्रापि वर्णक्रमेण वहेदित्यर्थः निसोवर्णो
त्तरवर्णानुद्वहेत् नैकायथाक्रमं ब्राह्मणादेश्च यथा विप्रोभार्याः स्वाः शूद्र जन्मनो भिन्निस्तने इत्यादयः त्रैवर्णिका
नामावश्यका धर्माः प्रतिग्रहादित्रयेतद्वृत्तिः सा च ब्राह्मणस्यैव ३९ ॥ राम ॥
राम ॥ ॥

एका॰ ५२

नआपिशक्योभुंक्तुनमावान्योहृत्रिमाह प्रक्रिंगृह्यहमितितयोर्वा जनाध्यापनयोरपि कार्यैर्पएपादिदोषपश्यन् शिलैः
स्वामित्वक्लैः हेश्वपतितैः वंगाशेः ध॰ पवेहृत्रिकाश्र्यंब्रास्मणेनसोढव्यमित्याहब्रस्ससेति ध। कृत्रिनोमविष
एगादिपतितकणोपादानेनशिलहृत्रैकीकृतनयाञ्चहृविभ्रससमोदपलमाह शिलोञ्छेतिमदोनमालिख्यादिलत
णोविरंजेतिः कामेसेवमानः गृहपवगृहस्याश्रमपवनातिप्रसक्तः अतिशयेनविरागमकुर्वन् शान्तिप्रपेतिप्रशक्या
धिकारीभवति ध२ पवमदनस्यगृहस्थस्यमहत्फलप्रज्ञासयनस्याप्याहत्रिभिः सप्तद्वेषिदारिद्र्यान् उमारयेतिविषा
मिस्यपलद्दणामस्यरायणाकमपि ध३ राजस्त्वथावश्यकेमेनदिमाहसर्वाइति सर्वेषामापद्धेतीराह परोपविशिया

प्रमेगृहंमन्यमानस्तपस्तेजोयशोनुदं अन्याभ्यामेवजीवेनशिलेर्वादोषदत्क्रयोः ध॰ ब्राह्मणस्येवदे।
हीयंत्सद्दकामायनेष्याने हृकृत्यायतपसैवेहप्रेत्याने स्मस्रखायच ध। शिलोञ्छहव्याणिनिषुविनेयप
मंमहोनेविरजेच्चषाणाः सप्यापिनात्मागृहपवनिहृत्यातिगप्रसक्तः सप्तयेतिशीने ध१ सप्तद्वारितिये
विप्रसीदंनेमस्तरायणो नान्तूत्रिषेनविरादापद्यास्रोनौरिवाणिवान् ध॰ सर्वाःसप्तद्वरेमा ियनेवा।
ब्रासनात्पजाः आत्मानमात्मनार्थीतोयथागजपतिर्गजम् धध पवंविधोनरपतिर्विमानेनार्कवर्चसा
विधूहेयोहाम्नभंह्वन्त्वामिंद्रेणसहमोदते धप सीदन्निषोवणिग्व्यापपणैरैवापदंनरेन् खड्गेनवा
परार्क्रांतोनसूवृहस्याकर्षेवन ध८ वैश्यहस्मान्नराजन्योजीवेच्छृणययापदि चरेत्नाविप्रदृषेणानथव
त्याकर्षेवन ध॰ शूद्रहत्रिंभमेहेप्रषः शूद्रःकारुकटिः क्रियां हृकृत्यान्सक्रोनगर्होणाहृत्रिलिपैनकर्म

हैः नवनसराल्लवणाद्यैः नत्राध्यापदाकोनस्थेन् खड्गेनदत्रियहस्यायद्यपिगोनमोनरापापीयसीहृत्रिमानिहोन्
त्वक्रूधारणोपणपवक्रियाकृत्रेमन्यते नथापिहिंसानतोवणिग्वृत्तिरेवश्रेष्ठेतिभगवनोमतं न उपहस्यानीचसे
वयानीचोनामावेस्लवः ध९ नयाप्यापादिशुश्रूषयाविप्रटूपेणवाप्रव्याध्यायनादिना ध॰ कारवः प्रतिलोमजविशेषाः
पुरुडादयः नेषांहस्तिकदादिक्रियाआपदृष्ठीणस्तनाऽवकलोभनवेनाह हृकृत्यादिति धट नदेवहृत्रिव्यवस्याश्र
कापवनगृहस्थस्थावश्यकार्यवयत्सानाहवेदाध्ययनेनब्रह्मयत्नः नेनक्रषीन्स्वाहाकारेणदेवान् स्वधाकारेणापि
तॄन् बलिहरणेनभूतानि अन्नाद्येनोदकादिभिर्मनुष्यानितिनिसानवी यथाद्येविभवानुसारतः मेघईश्वरहा
स्त्रिविधिनेमहाहृपाणीति आवश्यकंधर्मप्रकाशजव्यउमारयमिमाह ध४ ॥ ॥

यदृच्छयेति उपर्मवित्तोपार्जितेनवाशुक्लेनसत्प्रत्यालब्धेनशुद्धेनधनेनैवाधर्म्यान् भृत्यान् ५० गृहस्थस्याप्यति
ह्यविनिष्ठामेवाह कुटुम्बेष्विति त्रिभिः नप्रमाद्येत् ईश्वराराधनप्रयत्नंनभवेत् तत्रहेतुःदृष्टसाध्यकर्मासक्तस्य
केऽप्यप्रमादः विवेकेनाह विपश्चिदिति ५१ तत्रापिहेतुः संसारसङ्गस्याधिकत्वान्नेषांनश्वरत्वंतत्प्रपञ्चयति पुत्रादी
नामेकत्रसंगमः पान्थानांप्रपायांसंगमइवअनुदेहंदेहः प्रतिदेहंतेवियन्तिनश्यन्ति निद्रानुवर्तिस्वप्नोनि
द्रापायेयथेति ५२ अतिथिवदुदासीनः ५३ अस्याश्रमविकल्पमाह कर्मभिरिति गृहाद्यासक्तोदोषमा

यदृच्छयोपपन्नेनशुक्लेनोपार्जितेनवा धनेनापीडयन्भृत्यान्न्यायेनैवाहरेत्क्रतून् ५० कुटुम्बेषुनसज्जे
तनप्रमाद्येत्कुटुम्ब्यपि विपश्चिन्नश्वरंपश्येददृष्टमपिदृष्टवत् ५१ पुत्रदाराप्तबन्धूनांसंगमःपान्थसंग
मः अनुदेहंवियन्त्येतेस्वप्नोनिद्रानुगोयथा ५२ इत्थंपरिमृशन्मुक्तोगृहेष्वतिथिवद्वसन् नगृहैर
नुबध्येतनिर्ममोनिरहंकृतः ५३ कर्मभिर्गृहमेधीयैरिष्ट्वामामेवभक्तिमान् तिष्ठेद्वनंवोपविशेत्प्रजा
वान्वापरिव्रजेत् ५४ यस्त्वासक्तमतिर्गेहेपुत्रवित्तैषणातुरः स्त्रैणःकृपणधीर्मूढोममाहमितिब
ध्यते ५५ अहोमेपितरौवृद्धौभार्याबालात्मजात्मजाः अनाथामामृतेदीनाःकथंजीवन्तिदुःखि
ताः ५६ एवंगृहाशयाक्षिप्तहृदयोमूढधीरयं अतृप्तस्ताननुध्यायन्मृतोऽन्धंविशतेतमः ५७ इति
श्रीभागवतेएकादशस्कन्धेसप्तदशोऽध्यायः १७ श्रीभगवानुवाच वनंविविक्षुःपुत्रेषुभार्यांन्यस्य
सहैववा वनएववसेच्छान्तस्तृतीयंभागमायुषः १ कन्दमूलफलैर्वन्यैर्मेध्यैर्वृत्तिंप्रकल्पयेत् वसीत

हे यस्त्वितिबन्धमेवाभिनयेद्दर्शयति अहोइतिबालाश्चात्मजाः यस्याः साआत्मजाद्यर्मांविनानाथःसन्तःकथंजी
विष्यन्तीति ५६ गृहेआशयेवासनातेनआक्षिप्तहृदयं यस्यसः अन्धंतमः अन्धतामिस्रंयोनिं ५७ इति
श्रीभावार्थदीपिकायामेकादशस्कन्धेसप्तदशः १७ अष्टादशेऽथवानस्थयतिगोचरे अधिकारिविशेषेणाविशेषवा
पिनहुतं क्रमप्राप्तान् वनस्थधर्मानाह वनमिति आयुषस्तृतीयभागेपञ्चसप्ततिवर्षपर्यन्तं ततःपरंदीक्षादि
यस्यबहिर्गमोऽपिसंन्यासाधिकारःस्यादिति भावः १ वसीतपरिदधीत २॥
२॥ राम

५४

दतः रंजात् तथा वेन तशोषयेन त्रिकालमस्नमनेनश्च स्नलवन् स्नायान् स्थंडिलेशयः भूमिशायी ३ तथैतयो
वासीन स्थैर्यता सहवनदिशमग्नी निधाय शिरसि पंचममग्निं गृहीत्वा न ग्रीष्मे वर्षमोदने च तर्षु अग्निशुश्रूषा स्थाभि
मुखं एकपादेन देहं हस्तेन गृहीत्वा तिष्ठेदित्यर्थः आसारषाड् आसारं धारसेयाते सहत इति तथा अभ्रावकाशेना
मवर्तनं चरेत् जले आकंठमग्नः उदकवासे वानामयूर्नेचरेत् ४ उलूखलेन वा अश्मना वा अकृष्टपातिं खंडयतीति वा दं
तायव उलूखलेयस्य सतथा ५ संचिनुयात् आहरेत् अन्यदा कालान्तरे आहृतं कालान्तरेनादद्यात् नग्रीयादित्य
र्थः लब्धेन वेन वैखानसशास्त्रेण तत्परिसंगेदिति वेदोक्तः ६ कालपोदितान् अग्रायणादीन् ७ किंच अग्निहो

केशरोमनखश्मश्रुमलानि बिभृयाद्दतः तथा वेदस्नमजेनत्रिकालं स्थंडिलेशयः ३ ग्रीष्मेत पेन
पंचाग्नीन् वर्षास्वासारसा जले आकंठमग्नः शिशिरे एवं वृत्त तपश्चरेत् ४ अग्निपक्वं समश्नीयात्का
लपक्वमथापि वा उलूखलाश्मकुट्टो वा दन्तोलूखलमेव वा ५ स्वयं संचिनुयात्सर्वमात्मनो वृत्तिकार
णं देशकालफलाभिज्ञो नाद्यादन्यदाहृतम् ६ वन्यैश्चरुपुरोडाशैर्निर्वपेत्कालचोदितान् न तु
श्रौतेन पशुना मां यजेत वनाश्रमी ७ अग्निहोत्रं च दर्शश्च पौर्णमासश्च पूर्ववत् चातुर्मास्यानि च
मुनेराम्नातानि च नैगमैः ८ एवं चीर्णेन तपसा मुनिर्धमनिसंततः मां तपोमयमाराध्य ऋषिलोकादि
पैति माम् ९ यस्त्वेतत्कृच्छ्रतश्चीर्णं तपो निःश्रेयसं महत् कामायाल्पीयसे युंज्याद्बालिशः कोऽपर
स्ततः १० यदासौ नियमेऽकल्पो जरया जातवेपथुः आत्मन्यग्नीन्समारोप्य मच्चित्तोऽग्निं समाविशेत् ११

त्रमितिमुनेश्च नैगमैर्वेदादिभिः ८ अस्यानिष्कामस्य फलमाह एवमिति धमनिभिः सिराभिः संततो व्याप्तः
यावज्जीवं हानेन तपसा श्रेयोभावः अंतःकरणशुद्धिभक्तिद्वारा तेनावश्यमाने प्रतिबंधकत्वाद्तुल्येनानेन
मेऽमुच्यत इति १९ सकामं निंदति यस्त्विति निःश्रेयसं मोक्षफलं अल्पीयसे अन्यल्पमेव आविर्भावाद्भुत
ल्पमत ए १९ एवं यावज्जीवं वर्तमानस्य मोक्षः तृतीयभागावसाने नमैदविरागापि संन्यासाधिकारः यदित
तेनो वीरागस्य धर्मा शक्तो भवेत् तदापि सम्यगविरक्तः चिरकालात्ताविरक्तस्य हृत्समारोपयेदिति जातवेपथुः

विधिंकथयन्नाहयदेति १२ तत्रादौकृत्यमाह यथोपदेशं गृह्यसूत्रोक्तं प्राजापत्येष्ट्या स्वप्राणेआत्मनि १३ संन्यासी विघ्नाभवंतीतितानविगणय्यसंन्यसेदित्याहश्रयेनाह विप्रस्येतिदेवाभिप्रायेणाक्रम्येतिनामाह अयमितिपरं ब्रह्म १४ एवंप्रव्रजितस्यधर्ममाह बिभृयाच्चेदिति परंकौपीनाच्छादनंवासोयदिधारयितुमिच्छति तर्हिकौपीनमाच्छादयेदेवावनानावस्त्रंधारयेदित्यर्थः त्यक्तंशेषाणांसर्वमेव अन्यत्किंचिदपिनबिभृयात् दंडपात्राभ्यामित्यत्रवणुककजलवपात्रादेवरूपलक्षणं १५ मनःपूतमिति मनसासम्यक् विचार्ययत्कर्तव्यंतदाचरेत् १६ मौनंवाचो दंडः अनीहाकाम्यकर्मत्यागोदेहस्यप्राणायामश्चेतसः एतेत्रयोदंडायस्यनसंति [illegible]

यदाकर्मविपाकेषुलोकेषुनिरयात्मसु विरागोजायतेसम्यग्न्यस्ताग्निःप्रव्रजेत्ततः १२ इष्ट्वायथोपदेशं मांदत्वासर्वस्वमृत्विजे अग्नीन्स्वप्राणआवेश्यनिरपेक्षःपरिव्रजेत् १३ विप्रस्यवैसंन्यसतोदेवादारादिरूपिणः विघ्नान्कुर्वन्त्ययंह्यस्मानाक्रम्यसमियात्परं १४ बिभृयाच्चेन्मुनिर्वासःकौपीनाच्छादनंपरं त्यक्तंनदंडपात्राभ्यामन्यत्किंचिदनापदि १५ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंपिबेज्जलं सत्यपूतांवदेद्वाचं मनःपूतंसमाचरेत् १६ मौनानीहानिलायामादंडावाग्देहचेतसां नह्येतेयस्यसंत्यंगवेणुभिर्नभवेद्यतिः १७ भिक्षांचतुर्षुवर्णेषुविगर्ह्यान्वर्जयंश्चरेत् १८ मौनानीहानिलायामादंडावाग्देहचेतसां नह्येतेयस्यसंत्यंगवेणुभिर्नभवेद्यतिः १७ भिक्षांचतुर्षुवर्णेषुविगर्ह्यान्वर्जयंश्चरेत् सप्तागारानसंक्लृप्तांस्तुष्येल्लब्धेनतावता १८ बहिर्जलाशयंगत्वातत्रोपस्पृश्यवाग्यतः विभज्यपावितंशेषंभु

भिक्षां १७ चतुर्ष्वितिब्राह्मणादिषुचतुर्भेदेनचतुर्विधेषुपूर्वपूर्वासंभवेवाविगर्ह्यानभिशस्तपतितान् असंक्लृप्तान् अत्रायंलाभोभविष्यतीतिपूर्वमचिंतितान् १८ बहिर्ग्रामात् पावितंशेषंजलादिभिःशोधितंविभज्यविष्णुब्रह्मार्कभूतेभ्यः अशेषमित्यधिकाहरणनिरस्तं याचितमितिपाठेमाधुकरेणयाचितमश्नीयात् नहिविभज्यभुंजीतेनतत्वयाचितादिभेदाचतस्यमित्यर्थः माधुकरेनैवेषभेदोनान्येषुविद्यते नैवेदितिकिंचिदपेदस्याचितेयभोजितंबहिरितिस्नानेः यद्यातदानींकेनापियाचितंचेत् तन्मध्येतस्मैकिंविशुद्धिभजदत्वेत्यर्थः १९ किंचग्रामान्ते वृक्षीडाकौतुकंयस्यसः मयिभावेनविमलयाशयोयस्यसः २१ बंधमोक्षइतिनानावाबेधइति २२ २३ ॥ ॥

विविक्तं विजनं देशं निर्भयं शरणं स्थानं यस्य सः मयि भावेन विमल आशयो यस्य सः २१ बंधमोक्षावाह इति
२२ २३ पुराणि बृहद्ग्रामादि संनिग्रामस्तद्रहिताः व्रजाः गोष्ठानि तान् सार्थान् यात्रिकजनसमूहान् २४ यतः शिलवृत्त्या प्रा
प्तेन उद्दीयेनांधसान्नेन शुद्धसत्त्वः सन्निवृत्तमोहः संसिध्यति शुध्यति २५ ननु मिष्टान्नं विहाय कथं शिलान्नेन पवित्रः स्या
दत आह एतद् दृश्यमानं मिष्टान्नादि वस्तुतया न पश्येत् यतो विनश्यति अत इहामुत्र च लोके यत्संक्रियते तेन सन् वि
कीर्षितादर्थक्रियाद्विरमेत २६ ननु तथापि यावद्देहनाशं स्वदेहे ममत्वाभिनिवेशनाद्वतः कुतो विरागः स्यात्तत्राह यदेतदिति
एतज्जगदात्मनि मनोवाक्प्राणैः संहतं संहितं यदहंकारोऽस्य देशरीरं सर्वं तज्जन्यं स्वदेहवच्च आत्मनि मायामात्रमिति
तर्केण समाधिदृष्टेन तत्त्यक्त्वा स्वस्थः आत्मनिष्ठः सन् पुनस्तन्न स्मरेत् न चिंतयेत् २७ एवं ब्रह्मचर्यादिधर्मोक्ता

विविक्तक्षेमशरणो मद्भावविमलाशयः आत्मानं चिंतयेदेकमभेदेन मया मुनिः २१ अन्वीक्षेतात्मनो
बंधं मोक्षं च ज्ञाननिष्ठया बंध इंद्रियविक्षेपो मोक्ष एषां च संयमः २२ तस्मान्नियम्य षड्वर्गं मद्भावेन चरे
न्मुनिः विरक्तः क्षुद्रकामेभ्यो लब्ध्वात्मनि सुखं महत् २३ पुरग्रामव्रजान्सार्थान्भिक्षार्थं प्रविशंश्चरेत्
पुण्यदेशसरिच्छैलवनाश्रमवतीं महीं २४ वानप्रस्थाश्रमपदेष्वभीक्ष्णं भैक्ष्यमाचरेत् संसिध्यत्याश्व
सम्मोहः शुद्धसत्त्वः शिलांधसा २५ नैतद्वस्तुतया पश्येद् दृश्यमानं विनश्यति असक्तचित्तो विरमेदिहामु
त्र चिकीर्षितात् २६ यदेतदात्मनि जगन्मनोवाक्प्राणसंहतं सर्वं मायेति तर्केण स्वस्थस्त्यक्त्वा न तत्स्मरे
त् २७ ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः सलिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः २८

त्यक्त्वा परमहंसधर्मानाह ज्ञाननिष्ठ इति बहिर्विरक्तो मुमुक्षुः सन् यो ज्ञाननिष्ठो वा मोक्षेप्यनपेक्षो मद्भक्तो वा सलिं
गान् त्रिदंडादिसहितान् आश्रमांस्तद्धर्मांस्त्यक्त्वा न दासद्वलिंगमनाय यथावित धर्मं चरेदित्यर्थः न पुनस्तेन त्या
ग एव विवक्षितः पुनर्धर्मविधानात् अलिंगत्वस्यात्र राजाद्येव दर्शनीयत्वाच्च नहि पूर्वस्मात्कोपि विशेषस्तमाह अवि
धिगोचरः विधिर्गोचरः विधिकिंकरता न स्यादित्यनदेवशक्तदीप विध्यंगो वमाचमने स्नानेन च शौच नयाचरेदित्या
दिना २८ तर्हि कथं चरेत् इत्याह बुधो विवेकवानपि बालवत् मानावमानविवेकशून्यः कुशलो निपुणोपि
जडवत् लाभसंपादनाभावेन विद्वान् पंडितोपि उन्मत्तवत् लोकरंजनाभावेन नैगमः वेदार्थनिष्ठोपि गोचर्या अनियता

वेदवादरतः कर्मकांडव्याख्याननिष्ठः हैतुकः केवलतर्कनिष्ठः शुष्कवादीति स्पष्टो जनो गोष्ठ्यां यो विवादस्त-
स्मिन् ३० अतिवादान्परुषाणि ३१ आत्मदृष्ट्यान्यद्वैकारणं नास्तीत्युक्तं एवं तर्हि देहद्वयोपि नास्तीत्याह भूतानि
वदेहाद्युपाधिकारणरूपेणैकात्मकानि ३२ दैवतंत्रितं दैवाधीनं यतः ३३ अलब्धे तर्हि भिक्षाप्रयत्नेनापि तत्राह आ-
हारमात्रार्थमेव समीहेत यतस्तस्य प्राणधारणं युक्तं कथं तेन प्राणधारणेन तत्त्वं विचार्यते नापि तदाह नहि स्वाये
ति नहि किं स्वश्रामोदिकमपि प्राप्यमेव केनैव सुन्नमित्याह यदृच्छयेति ३५ यथाहमीश्वरलीलयाचरामि तथा
ज्ञानेस्नानिष्ठः अनासक्तः कुर्यात् न तु विधिकिंकरत्वेन तस्य ज्ञाननिष्ठाविरोधादित्यर्थः ३६ उक्तो विधिविक-

वेदवादरतो न स्यान्न पाषंडी न हैतुकः शुष्कवादविवादे न कं चित्पक्षं समाश्रयेत् ३० नोद्विजेत जन-
ाद्धीरो जनं चोद्वेजयेन्न तु अतिवादांस्तितिक्षेत नावमन्येत कं चन ३१ देहमुद्दिश्य पशुवद्वैरं कुर्यान्न
केनचित् एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ३२ यथेंदुरुदपात्रेषु भूतान्येकात्मकानि च ३२
अलब्ध्वा न विषीदेत काले कालेशनं क्वचित् ३३ आहारार्थं समीहेत युक्तं तत्प्राणधारणं तत्त्वं विमृ-
श्यते तेन तद्विज्ञाय विमुच्यते ३४ यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरं तथा वासस्तथा शय्यां प्राप्तं
प्राप्तं भजेन्मुनिः ३५ शौचमाचमनं स्नानं न तु चोदनया चरेत् अन्यांश्च नियमाञ्ज्ञानी यथाहं लीलयेश्व-
रः ३६ नहि तस्य विकल्पाख्या या च मद्वीक्षया हता आदेहांतात्क्वचित्ख्यातिस्ततः संपद्यते मया ३७
दुःखोदर्केषु कामेषु जातनिर्वेद आत्मवान् अजिज्ञासितमद्धर्मो गुरुं मुनिमुपव्रजेत् ३८ तावत्परिचरे-
द्भक्तः श्रद्धावाननसूयकः यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ३९ यस्त्वसंयतषड्वर्गः प्रचंडेंद्रिय-

रत्वाभावः तस्य तत्राह नहि तस्य विकल्पाख्या भेदप्रतीतिः नन्वस्ति सा असंयग्वीक्षासीत्सापि मद्वीक्षया हन्यतेन हता
नात्तत्वनहता पुनर्हेयपनानन्तवान् तत्राह आदेहांतात् क्वचित्कदाचिद्विद्याधिनैव ख्यातिर्भवति ३७ नत्वेवं विरक्तस्य
परोक्षज्ञानवतः संन्यासेन तु मद्धर्मो ज्ञाकावकेवलं वैराग्यवतो विविदिषुसंन्यासमाह दुःखोदर्केष्विति निजिज्ञासितो मद्धर्मो
मत्प्राप्तिसाधनं येन सः ३८ मामेव मद्धैवाद्गुरुं परिचरेत् ततः परं कस्यचिदेहत्यागादिधर्मैर्वर्तन इत्यभावः अनधि-
कारिणः संन्यासं निंदति प्रचंडः अत्यासक्तः इंद्रियसारथिर्बुद्धिर्यस्य सः ४० ॥ ॥

सुरान्प्रवाच्य देवानुस्तानात्मनेवात्मस्थं मां च निह्नुते प्रचारयति निह्नवफलमाह अस्मादिति ४१ चतुर्णां प्रधानध
र्मानाह ४२ अन्यधर्मान्कांश्चिद्गृहस्थस्यापि तिदिशति ब्रह्मचर्यमिति शौचं रागादिराहित्यं ब्रह्मचर्यप्रकारमाह
ऋतौ गंतुरिति ४३ एवंभूतवर्णाश्रमधर्मफलमाह इति मामिति द्वाभ्यां मद्भक्तिं विंदते ४४ ततः किमत आह भ
क्त्येति महेश्वरत्वे हेतुः सर्वोत्पत्त्यप्ययं सर्वस्योत्पत्त्यप्ययौ यस्मात् अतएव तत्कारणं मां मोक्षस्वरूपं वैकुंठनिवासिनं यद्वा
ब्रह्मणो वेदस्य कारणं मोपयाति साम्येन प्राप्नोति ४५ सर्वथा चामोघत्वं पर्यवेत्याह इत्येवंभूतेन स्वधर्मेण निर्णिक्तं
शुद्धं सत्त्वं यस्य सः अतएव निर्ज्ञाता मम गतिरैश्वर्यं येन ४६ उक्तमर्थं संक्षिप्याह यथाश्रमाचारलक्षणः पितृलोका
प्राप्तिफलः मद्भक्तियुतः सर्वं प्राणेन कृतः यत्कृतापि श्रीहरिस्तार्पितं कुर्यात् ४७ प्रकरणार्थमुपसंहरति एतत्ते

सुरानात्मानमात्मस्थं निह्नुते मां च धर्महा अविपक्वकषायोऽस्मादमुष्माच्च विहीयते ४१ भिक्षोर्धर्मः
शमोऽहिंसा तप ईक्षा वनौकसः गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनं ४२ ब्रह्मचर्यं तपः शौचं संतो
षो भूतसौहृदं गृहस्थस्याप्यृतौ गंतुः सर्वेषां मदुपासनं ४३ इति मां यः स्वधर्मेण भजन्नित्यमनन्यभाक्
सर्वभूतेषु मद्भावो मद्भक्तिं विंदते दृढां ४४ भक्त्योद्धवानपायिन्या सर्वलोकमहेश्वरं सर्वोत्पत्त्यप्ययं
ब्रह्म कारणं मोपयाति सः ४५ इति स्वधर्मनिर्णिक्तसत्त्वो निर्ज्ञातमद्गतिः ज्ञानविज्ञानसंपन्नो न चिरात्स
मुपैति मां ४६ वर्णाश्रमवतां धर्म एष आचारलक्षणः स एव मद्भक्तियुतो निःश्रेयसकरः परः ४७
एतत्तेऽभिहितं साधो भवान्पृच्छति यच्च मां यथा स्वधर्मसंयुक्तो भक्तो मां समियात्परं ४८ इति श्रीभा
गवते एकादशेऽष्टादशः १८ श्रीभगवानुवाच यो विद्याश्रुतसंपन्न आत्मवान्नानुमानिकः मया

भिहिते यथा भक्तो भूत्वा मां परं प्राप्नुयादिति ४८ इति श्रीएकादशेऽष्टादशः १८ ज्ञानादेर्निर्णयः पूर्वोक्तो
त्याश्रमधर्मतः एकोनविंशतितमे ज्ञानादेस्त्याग उच्यते तदेवं तर्कितोऽपि बाधितोऽपि देहादिप्रपंचो यावदपरो
क्षानुभवं नहि मोहादिविना विलीयते तावज्ज्ञानाभ्यासः ततोऽपि स्थित्यर्थं ग्राह्या देहानात्मका विन्यस्यानि स्ततः संघा
युते मयेत्यादिना यस्य त्वपरोक्षानुभवेन प्रपंचो लीनप्रायः तस्य न किंचित्कृत्यमस्तीत्याह य इति विद्या अनुभवः तस्य
र्थेन श्रुतेन संपन्नः अतएवात्मवान् प्राप्तात्मतत्त्वः नानुमानिकः केवलपरोक्षज्ञानवान् न भवति अतएव कारपाठेपा
कृत्वेत्युक्तं तर्केनानिर्णीतस्यार्थः सद्गुरुदेवेन विहितानि साधनेच मयि मायामात्रमपि ज्ञात्वा ज्ञाने वत तत्साधने संन्यासे

यस्मादहमेव तस्येष्टः श्रेयोदितः स्वार्थफलेहेतुः ततत्प्राप्त्यैव समाप्तः स्वर्गः अभ्युदयश्च अपवर्गः संसारनिवृत्तिश्च अत
स्तस्य तत्प्राप्त्येहेतुत्वात् किंविद्धतीत्यर्थः अत्रविह अनुभवे प्रमाणमाह ज्ञानेति २ यथोक्तं ज्ञानिनमभिनेदर्शनोति ज्ञा
नीति यतोसौ ज्ञानेन मां धारयति ३ तस्य ज्ञानं स्तौति तप इति श्रुलमत्यर्थः ज्ञानस्य कलया लेशेन ४ उपसंहरति
ज्ञानेन सहितं तत्त्वयं तेयथा भवति तथा ज्ञात्वा तत्संपन्नः सन् मामेव भज अन्यत्सर्वं त्यजेत्यर्थः ५ तस्याउन्ययायांद्दृष्टेवेषां
हेयमाह ज्ञानेति मामेवं सिद्धिं प्रापुः ६ तदेवं ज्ञानं संक्षेपत उपदिशति त्वयीति त्रिविध आध्यात्मिकादिः समाया
नतुपरमार्थः यद्यस्मात् अंतराभ्युपपतति पतति रज्जौ सर्पादिमलादिवत् नाद्यपवर्गयोः तत्त्वादावंते अस्तित्वात्:

ज्ञानिनस्त्वहमेवेष्टः स्वार्थो हेतुश्च संमतः स्वर्गश्चैवापवर्गश्च नान्योर्थो मदृते प्रियः ज्ञानविज्ञानसंसि
द्धाः पदं श्रेष्ठं विदुर्मम ज्ञानी प्रियतमोतो मे ज्ञानेनासौ बिभर्ति मां ३ तपस्तीर्थं जपो दानं पवित्राणीत
राणि च नालं कुर्वंति तां सिद्धिं या ज्ञानकलया कृता ४ तस्माज्ज्ञानेन सहितं ज्ञात्वा स्वात्मानमुद्धव ज्ञान
विज्ञानसंपन्नो भज मां भक्तिभावितः ५ ज्ञानविज्ञानयज्ञेन मामिष्ट्वात्मानमात्मनि सर्वयज्ञपतिं मां वै संसि
द्धिं मुनयोगमन् ६ त्वय्युद्धवाश्रयति यस्त्रिविधो विकारो मायांतरापतति नाद्यपवर्गयोर्यत् जन्मादयो
स्य यदमी तव तस्य किं स्युराद्यंतयोर्यदसतोस्ति तदेव मध्ये ७ उद्धव उवाच ज्ञानं विशुद्धं विपुलं यथैतद्वैराग्य
विज्ञानयुतं पुराणं आख्याहि विश्वेश्वर विश्वमूर्ते त्वद्भक्तियोगं च महद्विमृग्यं ८ तापत्रयेणाभिहतस्य
घोरे संतप्यमानस्य भवाध्वनीश पश्यामि नान्यच्छरणं तवांघ्रिद्वंद्वातपत्रादमृताभिवर्षात् ९ ॥ ॥

यद्यदा यस्य विकारस्यासीज्जन्मादयः तदा तस्य तवाधिष्ठानभूतस्य किं न किंचिदित्यर्थः तस्यापि वस्तुतो न संतीत्य
सत्त्वादित्याह आद्यंतयोरिति असतः सर्पादेः आद्यंतयोर्यदस्ति रज्ज्वादि तदेव मध्ये ततः सर्पादिवदहंयं विकारो ना
स्तीत्याह यद्वा आद्यंतयोर्यदस्ति तन्मध्येप्यस्त्येव ततस्य जन्मादयः जननमरणादयो न संति अतस्त्वं निर्विकार एव
इति ज्ञात्वा तद्विशेषजिज्ञासुः पृच्छति ज्ञानमिति १ विशुद्धमेतज्ज्ञानं विपुलं निश्चितं यथा भवति तथा कथये
ति महद्भिः ब्रह्मादिभिर्विमृग्यमाणम् ८ महद्विमृग्यत्वमभिनयेनाह तापत्रयेणाभिहतो हतस्य अतः संतप्यमान
स्य कस्यचित् त्वदंघ्रिद्वंद्वमेवातपत्रं आतपात्त्रायते इति तस्मात् शैत्यसमानपदत्रात् किं च अमृत
मप्यभिवर्षतीति तत्तस्मात् ९ ॥

ग्रनिहतस्य मस्मादयत्राह दष्टमिति अस्मिन्बिले संसारकूपे पतितं नत्रच कालाहिना दष्टं एवमपि क्षुद्रसुखे
वुरुस्तर्षस्तृष्णा यस्य तं उद्धरस्व मानः कथं समुद्धरणीय इति वेत्तत्राह अपवर्ग्यैरपवर्गबोधकैः वाच
शृंगैरासिंचेति १० नहि शास्त्रार्थविदस्तव भार्यानिर्णीतमहं वक्ष्यामीत्याह ११ ज्ञानादिभिरुपबृंहितान् ता
नसहितानित्यर्थः १२ तत्र ज्ञानं कथयति नवेति प्रकृतिपुरुषमहदहंकारपंचतन्मात्राणि एकादशेंद्रियाणि पं
चमहाभूतानि त्रयो गुणाः एतांस्तत्त्वभावान् अष्टाविंशतितत्त्वानि भूतेषु ब्रह्मादिस्थावरांतेषु कार्येषु अनुगतत्वा
नियेन ज्ञानेन येन ईक्षेत अथ एषु विभावेषु एकं परमात्मतत्त्वं अनुगतं येन ईक्षेत कार्यकारणात्मकं जगत् पश्यन् प
रमकारणात्मकं पश्येत् तत् ज्ञानं ततः पृथगिति वेत्रे पश्येत् न ज्ञानमित्यर्थः १४ विज्ञानमाह एतदेवेति

दष्टं जनं संपतितं बिलेस्मिन् कालाहिना क्षुद्रसुखोरुतर्षम् समुद्धरैनं कृपयापवर्ग्यैर्वचोभिरा
सिंच महानुभाव १० श्रीभगवानुवाच इत्थमेतत्पुरा राजा भीष्मं धर्मभृतां वरं अजातशत्रुः पप्रच्छ
सर्वेषां नोनुशृण्वतां ११ निवृत्ते भारते युद्धे सुहृन्निधनविह्वलः श्रुत्वा धर्मान्बहून्पश्चान्मोक्षध
र्मानपृच्छत १२ तानहं तेभिधास्यामि देवव्रतमुखाच्छ्रुतान् ज्ञानविज्ञानवैराग्यश्रद्धाभक्त्युपबृंहि
तान् १३ नवैकादश पंच त्रीन्भावान्भूतेषु येन वै ईक्षेताथैकमप्येषु तज्ज्ञानं मम निश्चितं १४ एत
देव हि विज्ञानं न तथैकेन येन यत् स्थित्युत्पत्त्यप्ययान्पश्येद्भावानां त्रिगुणात्मनां १५ आदावंते
च मध्ये च सृज्यात्सृज्यं यदन्वियात् पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सत् १६ ॥ ॥

ज्ञानकाले येन यदा येन कोवा अगतानने कात्मवतान भावान्पूर्वमेव तानो स्तत्पश्चात्पूर्ववत् नेतेन किं न नेदं केवलं परमा
कारणं अस्येव तदा एव तदेव विज्ञानमुच्यते एतज्ज्ञं भवति यदा तत्प्रपंचस्य आदिमात्रादिषि विविवनिहत्यविभावात् न
दात्मकं जगत्स्पृश्यत्वात्मनः पृथक् सदिति न मन्येत अपरोक्षज्ञानेन बाधितमेव जीवन्मुक्तः संसारशेषं पश्यति
ततः परं पश्यति वस्तुतः परोक्षज्ञानेन ज्ञानं विज्ञानं शब्दाभ्यामुच्यते इति १५ एकमसर्वकार्याणामनुगतं नि का
र्याणां कारणात् पृथगसत्त्वात् पारयति साहं ननत्वंचादि तदा विदनीत्यंशे जगदित्यादिमतेनैव भावाना
मुत्पादयानस्तुः नहि कारणस्यैकस्याभावादेकात्मनामिथ्यात्वं तस्मात् प्रनेसिषावत्पयादीवसाधयति
स्थितीति त्रिगुणात्मनां सावयवानामित्यर्थः विमताभावाउत्पत्त्यादिमंतः सावयवत्वात् यदादि वदिति पश्ये
त् एवमादावंते मध्ये च परिणामेन रूपत्रो वकारणत्वेन मध्यचाप्यन्ततस्मात् सृज्यात् कार्यान्तरं कार्यांश ति
यादन्वियात् पुनः तत्प्रतिसंक्रामे यच्छिष्यते तदेव सदिति पश्यदित्यर्थः १६ ॥

श्री॰
भा॰ ए॰
टी॰
५८

वैराग्यमाह श्रुतिरिति नोहन्तानास्ति किं चेत्तस्मादिप्रमादेयपदादिकार्यं तन्मादिव्यतिरेकेणानदृश्यते चेतन्यव्याति
रेकेणाचनकिंचिदृश्यतेइति यतेहिमहाजनशसिद्धिः अनुमाने विमते मिथ्यादृश्यत्वात् शुक्तिरजतवदित्या
दि एवं प्रमाणानवस्थानात् यतेर्बाधितत्वात् स एवं सर्वानुगते सत्यमात्मतेजःपश्यति निर्विकल्प
स्वमिथ्यात्वात्ततो विरज्यते विरक्तो भवतीत्यर्थः १७ न च वेदोक्तस्वर्गादिसुखलोभो न विरज्यते त्याह कर्मणा
मिति आविरिंचात् ब्रह्मलोकपर्यन्तं अदृष्टमपि सुखं अमंगलं दुःखरूपं नश्वरं च पश्येत् १८ भक्तियोगं सकामा
णामाह भक्तियोगः पूर्वमुक्त एव तथापि तस्मिन् प्रीतिं प्राप्तवते तुभ्यं पुनश्च कथयिष्यामि १९ श्रद्धा श्रवणा

श्रुतिःप्रत्यक्षमैतिह्यमनुमानं चतुष्टयं प्रमाणेष्वनवस्थानाद्विकल्पात्सविरज्यते १७ कर्मणां प
रिणामित्वादाविरिंचादमंगलं विपश्चिन्नश्वरं पश्येददृष्टमपि दृष्टवत् १८ भक्तियोगः पुरा प्रोक्तः
प्रीयमाणाय तेनघ पुनश्च कथयिष्यामि मद्भक्तेः कारणं परं १९ श्रद्धामृतकथायां मे शश्वन्मदनु
कीर्तनं परिनिष्ठा च पूजायां स्तुतिभिः स्तवनं मम २० आदरः परिचर्यायां सर्वांगैरभिवंदनं मद्भक्त
पूजाभ्यधिका सर्वभूतेषु मन्मतिः २१ मदर्थेष्वंगचेष्टा च वचसा मद्गुणेरणं मय्यर्पणं च मनसः
सर्वकामविवर्जनं २२ मदर्थेर्थपरित्यागो भोगस्य च सुखस्य च इष्टं दत्तं हुतं जप्तं मदर्थं यद्व्रतं
तपः २३ एवं धर्मैर्मनुष्याणामुद्धवात्मनिवेदिनां मयि संजायते भक्तिः कोन्योर्थोस्यावशिष्यते
२४ यदात्मन्यर्पितं चित्तं शांतं सत्त्वोपबृंहितं धर्मं ज्ञानं सवैराग्यमैश्वर्यं चाभिपद्यते २५ यदर्
पितं तद्विकल्पे इंद्रियैः परिधावति रजस्वलं चासन्निष्ठं चित्तं विद्धि विपर्ययं २६ ॥ ॥

दरः आश्वदिति सर्वात्मत्वेन मदनुकीर्तनं श्रवणानन्तरं मत्कथाव्याख्यानमित्यर्थः २० अंगचेष्टा लौकिक
क्रिया च वचसा लौकिकेनापि मद्गुणानामीरणं कथनं २२ मदर्थं मद्भजनार्थं तद्विरोधिनोर्थस्य परित्यागः भोग
स्य तत्साधनस्य चन्दनादेः सुखस्य पुत्रोपलालनादेः इष्टादि वैदिकं यत्कर्म तदपि मदर्थं कृतं भक्तेः कारणमि
त्यर्थः २३ भक्तिः प्रेम तल्लक्षणो संजायते अस्य भक्तस्यान्यः कोर्थः साधनरूपः साध्यरूपो वावशिष्यते सर्वोपि
स्वत एव भवतीत्यर्थः २४ तदेवाह यदेति किं बहुना चित्तमेव तत्र बहिर्निर्गमयोर्नयोः कारणमित्याह यदात्म
नीति द्वाभ्यां यदा आत्मनि मयि ईश्वरे चित्तमर्पितं तदा प्रमाणं धर्मादीन्प्राप्नोत्येव २५ एतदेव व्यतिरेकेणाह तदा
यति यदा तु विकल्पे देहगृहादौ अर्पितं सत् परिधावति तदादिके रजस्वलमसन्निष्ठं च भवति तत्र विपर्ययं

रामः
५८

स्वाभिप्रेतांधर्मादीन् याचष्टे धर्मोमद्भक्तिकृत्त्वनयतः सर्वयोक्तः प्रकृष्टउक्तः गुणेषु २७ धर्मादीनांमहाजनप्रसिद्धा
नामन्यथाव्याख्यानंत्वायमादिविविधिसंख्यानः स्वरूपनोवाकिंचिद्देलक्षणस्यादितिसंभावनयातद्विशेषजि
ज्ञासुः पृच्छति यमइतिपंचभिः २८ इष्टमभ्याहितंधनेचाकिं २९ परांनिविद्यादीनांविशेषणे ३० ३१ प्रशान्त्य
ष्टानर्थान् विपरीतान् प्रशमादीन् ३२ यमनियमानमाह अहिंसेतित्रिभिः असंगसनस्यापिपरस्यानग्रहणं आस्तिक्यं
धर्मविश्वासः ३३ शौचंबाह्यमाभ्यंतरंचेतिद्वयं एतेद्वादशनियमाः श्रद्धाधर्मादरः ३४ उभयोस्त्रोकयोः येसंत्ताः
येयमानियमाश्च यद्वाउभयोः प्रवृत्तिनिवृत्तयोः अनुष्ठेयमानमुख्याः सकामस्यानियमाःमुख्याः स्वसंत्यर्थं अत्र
हेतुमाह हियस्मात् उपासिताः सेविताः संतः पुंसोनिवृत्तानांप्रवृत्तानांचयथाकामंकामानुसारेणमोक्षमप्य

[illegible] धर्मोमद्भक्तिकृत्प्रोक्तोज्ञानंचैकात्म्यदर्शनं गुणेष्वसंगोवैराग्यमैश्वर्यंचाणिमादयः २७ उद्धवउवाच [illegible]
किंदानंकिंतपःशौर्यंकिंसत्यमृतमुच्यते कस्त्यागःकिंधनंचेष्टंकोयज्ञःकाचदक्षिणा २८ यमःक
तिविधःप्रोक्तोनियमोवारिकर्षण कःशमःकोदमःकृष्णकातितिक्षाधृतिःप्रभो २९ पुंसःकिंस्वि
त्श्रीमन्भगोलाभश्चकेशव काविद्याह्रीःपराकाश्रीः किंसुखंदुःखमेवच ३० पंडितःकश्च
मूर्खः कःपंथाउत्पथश्चकः कःस्वर्गोनरकःकःस्वित्कोबंधुरुतकिंगृहं ३१ कआढ्यःकोद
रिद्रोवाकृपणःकःकईश्वरः एतान्प्रश्नान्ममब्रूहिविपरीतांश्चसत्पते ३२ श्रीभगवानुवाच अहिं
सासत्यमस्तेयमसंगोह्रीरसंचयः आस्तिक्यंब्रह्मचर्यंचमौनंस्थैर्यंक्षमाभयं ३३ शौचंजपस्तपो
होमःश्रद्धातिथ्यंमदर्चनं तीर्थाटनंपरार्थेहातुष्टिराचार्यसेवनं ३४ एतेयमाःसनियमाउभयोर्द्वा
दशस्मृताः पुंसामुपासितास्तातयथाकामंदुहंतिहि ३५ शमोमन्निष्ठताबुद्धेर्दमइंद्रियसंयमः

दुग्धयुदुहंतीति ३५ अनुष्ठेयत्वात्उपादेयान् शमादीन् हेयांश्चदुःखादीन् महाजनप्रसिद्धेभ्योविलक्षणानाह शा
महत्यादिनायावत्समाप्ति एतेनेवतद्विपरीतानामशमादीनामपिज्ञेयाः शमोमन्निष्ठत्वंबुद्धेः नतुशांतिमात्रं दमइंद्रि
यसंयमः नचाक्षविदमनंतितिक्षाविहितदुःखस्यसंमर्षः सहनंनभारादेः जिह्वोपस्थजयोवेगधारणंधृतिः नतन्
वेगमात्रं ३६ दंडन्यासःद्रोहः नसत्यागोदानं नयनार्हणं कामत्यागःभोगापेक्षानतपः नकृच्छ्रादि स्वभावावास
नानांजयःशौर्यंः शौर्यंनविक्रांतिः समेवब्रह्मतत्त्वदर्शनंप्रलोचनेसत्यं नयथार्थभाषणमात्रं ३७ ॥ ॥

श्री० भा० प० टी० ४८

अतास्तु ऋतंतुसूनृतंसम्यक्प्रियावाक् एवमृतसत्ययोः स्फुटएवविवेकः क्रमप्राप्तंत्यागंव्याख्यातुमादौ ततोभेदेनशौ
चमाचष्टे नतस्यापिमलत्यागरूपत्वेनत्यागभेदत्वमितिः कर्मस्वसंगमः अनासक्तिः शौचंत्यागस्तुसंन्यास इतितयोर्भेदकथ
नं ३८ नृणामिष्टधनंधर्मः नपश्वादिसाधारणः भगवत्तमः परमैश्वर्योहमेवयज्ञः मदुद्दायतः मदुद्दायतोनुरोधः
नक्रियाद्रव्योस्यर्थः यज्ञार्थदानंदक्षिणासाचज्ञानोपदेशः नहिरण्यादिदानेनेनहियज्ञरूपोविधीयते इदंमनेवा
लेनसूक्ष्मनोदमनेहेतुत्वात्प्राणायाम इति ३९ दयालोकप्रसिद्धैवाभिमता अधुनालाभेव्याविद्योस्तः प्रथमंभगत
तोभेदेनव्याचष्टे लोकतयोर्भेदप्रसिद्धिः भगोभाग्यं तच्चमेपैश्वरोभावोमद्यैश्वर्यादिषाड्गुण्यमित्यर्थः उत्तमा
लाभस्तमद्भक्तिः नपुत्रादिः विद्याचात्मनिप्रतीतस्यभेदस्यबाधः नतुज्ञानमात्रं अकर्मसुजुगुप्साहेयत्वदर्शनेह्रीः न
तुलज्जामात्रं ४० गुणाएवश्रीर्मंडलनकिरीटादिः दुःखसुखयोरित्यर्थः अतिक्रमः अननुसंधानं सुखंनभोगः वि

ऋतंचसूनृतावाणीकविभिःपरिकीर्तिता कर्मस्वसंगमःशौचंत्यागःसंन्यासउच्यते ३८ धर्मइष्टधनं
नृणांयज्ञोहंभगवत्तमः दक्षिणाज्ञानसंदेशःप्राणायामःपरंबलं ३९ भगोमऐश्वरोभावोलाभोमद्भ
क्तिरुत्तमा विद्यात्मनिभिदाबाधोजुगुप्साह्रीरकर्मसु ४० श्रीर्गुणानैरपेक्ष्याद्याःसुखंदुःखसुखात्ययः
दुःखंकामसुखापेक्षापंडितोबंधमोक्षवित् ४१ मूर्खोदेहाद्यहंबुद्धिःपंथामन्निगमःस्मृतः उत्प
थश्चित्तविक्षेपःस्वर्गःसत्वगुणोदयः ४२ नरकस्तमउन्नाहोबंधुर्गुरुरहंसखे गृहंशरीरंमानुष्यंगुणा
ढ्योह्याढ्यउच्यते ४३ दरिद्रोयस्त्वसंतुष्टःकृपणोयोजितेंद्रियः गुणेष्वसक्तधीरीशोगुणसंगोविपर्ययः

विषयभोगापेक्षैवदुःखंतेनाग्निनादाहादिकंधर्मोक्तेदुःखंवाबाधौवातस्यपंडितः नविज्ञानमात्रे ४१ अहंबुद्धिरस्यपलव
लोर्थदेहगेहादिषु अहंममेत्यभिमानवान्मूर्खः इत्यर्थः मन्निगमः मांनिगमयतिप्रापयतियोनिगमःसमार्गःस
न्पंथाः सन्मार्गः नकंटकादिशून्यः चित्तविक्षेपः प्रवृत्तिमार्गः सउत्पथः कुमार्गः नतुचोरपाशाकुलः सत्वगुणो
दयः उद्रेकः स्वर्गः नेंद्रादिलोकः ४२ तमसमउन्नाहः उद्रेकः नरकः नतामिस्रादिः गुरुरेवबंधुः नभ्रात्रादिः स
खाहमेवयथाहमुपकृतः एकएवयथैवोबंधुर्विषमेसमुपस्थिते गुरुः सकलधर्मात्मायत्राकिंचनगोहृतिः इतिसमा
धनभोगायतनंगृहंनतुमानुष्यमानुष्यरूपंशरीरमेव नहर्म्यादिगुणैः संपन्नः आढ्य उच्यते नधनी ४३ असंतोषा
यः सदरिद्रः सकृपणः शोच्यः नदीनः विषयेष्वनासक्तधीयः विषयेष्वनासक्तधीयः विषयेष्वनासक्तदीयः सई
शः स्वतंत्रः नराजादिः गुणसंगः गुणेषुसंगोयस्यसः विपर्ययः अनीशः एतच्छमादिविपर्ययोपलक्षणार्थं ४४

राम ४८

श्रुत्यासूक्तं नेस्तुतं नेत्यास्त्रियावत्वात् एवं श्रुतसत्ययोः स्फुट एव विवेकः क्रमशास्त्रेत्यागेण व्याख्यानमा] उपसंहरति
साधु मां त्वा पृष्टा गतिनया एतत्सर्वं गुणदोषयोर्विवेकायोद्धवेन पृष्टमिति तयोः संक्षेपतो लक्षणमाह किं बहुना
वर्णितेन गुणदोषयोर्लक्षणमेतावदेव न दाहगुणदोषयोर्दृशिर्दर्शनं दोषः गुणस्तूभयदर्शनवर्जितः
स्वभावइति ४५ इति श्रीभावार्थे एकादशे एकोनविंशः १९ विधिर्योगत्रये प्रोक्ते भक्तिज्ञानक्रियात्मके गुणदो
षव्यवस्थायैमधिकारविभागतः गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः इत्युक्तं नरादिपतिविधिस्तेनिषेधाभिः
विधिप्रतिषेधरूपं त्वनीश्वरस्य तव निगमरूपं साक्षात्पोवेदः सच विधेयानां प्रतिषेध्यानां च कर्मणां दोषगुणावपेक्ष्य
प्रवर्तते २ उत्तमाधमभावेन तदधिकारिणां वर्णानामाश्रमाणां विकल्पभेदं च गुणदोषरूपमेवापेक्षते प्र
तिलोमानुलोमजं गुणदोषरूपमेवापेक्षते प्रतिलोमजाः उत्तमवर्णास्त्रीषु वर्णेभ्यः उत्कृष्टेभ्यो जाताः

एतऽउद्धवेन पृष्टाः सर्व साधु निरूपिताः किं वर्णितेन बहुना लक्षणं गुणदोषयोः गुणदोषदृ
शिर्दोषो गुणस्तूभयवर्जितः ४५ इति श्रीभागवते एकादशस्कंधे एकोनविंशोध्यायः १९
उद्धव उवाच विधिश्च प्रतिषेधश्च निगमो हीश्वरस्य ते अवेक्षतेरविंदाक्ष गुणदोषं च कर्मणां १ व
र्णाश्रमविकल्पं च प्रतिलोमानुलोमजं द्रव्यदेशवयःकालान् स्वर्गं नरकमेव च २ गुणदोषभि
दादृष्टिमंतरेण वचस्तव निःश्रेयसं कथं नृणां निषेधविधिलक्षणं ३ पितृदेवमनुष्याणां वे
दश्चक्षुस्तवेश्वर श्रेयस्त्वनुपलब्धेर्थे साध्यसाधनयोरपि ४

स्तनवेदेहकादयः अनुलोमजा उत्तमवर्णेभ्यः पुरुषेभ्यो हीनवर्णास्त्रीषु जाताः मूर्धावसिक्ताम्बष्ठादयः अ
सत्तेनस्त्वविज्ञेयाः प्रतिलोमानुलोमजा इति गुणदोषो द्रव्यादीन् कर्मार्हानार्हनाम्नः स्वर्गनरकं च तत्फल
तया गुणदोषरूपमेवावदते एतच्चोत्तराध्याये शपवविध्यते २ तथापि प्रस्तुते किमायातं तत्राह गुण
दोषइति गुणदोषदृशिर्दोषइति निराकृतत्वात् गुणदोषभिदादृष्टिमंतरेण ताविना निषेधविधिलक्षणं कर्म
कांडं तव वचः कथं नृणां निःश्रेयसकरं स्यात् न तावत्प्रवृत्त्यादिसाधनविधेः नान्यथा
पवक्तुं शक्यान्याचोविलापं न हिनस्त्यादि निषेधस्यावश्यं वत्वादिति भावः यद्वा गुणदोषभिदादृ
ष्टिमंतरेण निषेधविधिलक्षणं तव वचो विनेति समानाधिकार्यमेवास्तु यद्वा गुणदोषभिदादृष्टिमंतरेण निषेध

श्री॰
भा॰ टी॰
टी॰
९॰

पलक्षणमपिवचः कथंतुतन्नमस्यादिवाक्यवत् निःश्रेयसपरंस्यात् सर्वस्यवेदस्यमन्त्रस्तवांगीकारादित्यर्थः
१ तत्रापिनरोदेवाश्चसर्वज्ञः शक्यदेनोरथामत्रैवाभाः कथयिष्यतीतित्याह पित्रादेनांसर्वेषांतवत्वदाक्यंतु
योवेदस्तस्यसाधनमित्यत्रापितदेवगुणदोषदृश्याभावेनिःश्रेयसंनयाहतं ४ किंवशास्त्रेणैवविहितोभेदइति
नस्मिन्नेवविषयशास्त्रेकर्मसंनिवर्तयेदित्याह नेतिगम्मात् प्रत्याहुताहेशादेवनहिस्रनः यस्माद्दशाप्रश्नेवना
निवर्तते हस्युदश्रमोभवतिनेननिवर्तयेतिशेषः ५ विषयाभेदेप्यधिकारिभेदेनाविरोधंवक्तुंप्रथमंयोगत्र
यमाह योगइतिद्वियोगः मिलनेउपायाः श्रेयस्कर्मदेवानाकांक्षेः प्रोक्तः कर्मचानिःकामश्रेयोविधित्सयामोक्ष
साधनेच्छयानन्यउपायोनास्तीतिकाम्यवर्मादिकेषामवर्तयतितथाचोत्तराध्यायेस्फुटीकरिष्यतियदुनाथि
न्यादिना ६ तेषामधिकारिभेदमाह निर्विण्णानामितिद्वाभ्यां इहएषामध्येकर्मसुनिर्विण्णानांदुःखबुद्ध्यातत्

गुणदोषभिदादृष्टिर्निगमात्तेनहिस्वतः निगमेनापवादश्चभिदाया इतिहभ्रमः ५ श्रीभग
वानुवाच योगास्त्रयोमयाप्रोक्ता नृणांश्रेयोविधित्सया ज्ञानंकर्मचभक्तिश्चनोपायोन्योस्तिकुत्र
चित् ६ निर्विण्णानांज्ञानयोगोन्यासिनामिहकर्मसु तेष्वनिर्विण्णचित्तानांकर्मयोगस्तुकामि
नां ७ यदृच्छयामत्कथादौजातश्रद्धस्तुयःपुमान् ननिर्विण्णोनातिसक्तोभक्तियोगोस्यसि
द्धिदः ८ तावत्कर्माणिकुर्वीतननिर्विद्येतयावता मत्कथाश्रवणादौवाश्रद्धायावन्नजायते
९ ॥

तेषुविरक्तानामतएवततत्साधनंकर्मन्यासिनांज्ञानयोगः सिद्धिदइत्युत्तरेणान्वयः अनिर्विण्णानांदुःख
बुद्धिरहितानां अतः कामिनो अतःकामिनांतत्तत्फलेष्वविरक्तानामित्यर्थः ७ यदृच्छयाकेनापिभाग्योदयेनतत्
काम्यकर्मसुप्रवर्तमानस्यसर्वात्मनाविपिशतिषेधाधिकारइत्युत्तराध्यायेवक्ष्यति निष्कामकर्माधिकारेणतु
यथाशक्तिसर्वज्ञानभक्तियोगाधिकारः प्रागेव तदधिकारतयस्वस्थाः नात्यासिद्धानामिनंकिंचिदिति
८ सावधिकंकर्मयोगमाह तावदितिनवभिः कर्माणिनित्यनैमित्तिकानि यावतायावद्यत् ९ ॥ राम॰
९॰

कर्मयोगिनो ज्ञानोक्तिभूमिकारोहप्रकारमाह स्वधर्मस्थ इति अनाशीः कामः अफलकामः अन्यन्निषिद्धं नरकया नहि देवविहितानि क्रियमाणानिषिद्धाचरणाद्वा अतः स्वधर्मस्थत्वान्निषिद्धवर्जनाच्च नरकेन याति अफलकाम त्वात्स्वर्गमपि नेत्यर्थः १० किंच अस्मिन् लोके अस्मिन्नेव शरीरे अनघः निषिद्धत्यागी अतः शुचिः निर्हतरागादिरेव मलः यदृच्छयेति केवलज्ञानादपि भक्तिं दुर्लभां तेयान्नयाति ११ अनेन प्रकारेण ज्ञानभक्तिसाधनत्वान्नरदेहस्याति स्वर्गिणोपीति निरयिण इति दृष्टान्तत्वेनोक्तं ज्ञानभक्त्योः नत्प्रभयं स्वर्गिनारकिशरीरम् १२ अतो नरः स्वर्गतिं नकां क्षेत् नारकीमिति दृष्टान्तः यद्वा स्वयं स्वर्गनरकसाधनकर्माणि कुर्यादित्यर्थः अस्यातिश्रेष्ठत्वात्तु नरयोनिर्वा प्यभवेयमिति पिनकांक्षेत् यतो देहावेशात् देहभङ्गात्स्वार्थप्रमाद्याति अवधानशून्योभवति १३ अपिच

स्वधर्मस्थो यजन्यज्ञैरनाशीःकाम उद्धव। नयाति स्वर्गनरकौ यद्यन्यन्न समाचरेत् १० अस्मिँल्लोके वर्त मानः स्वधर्मस्थोनघः शुचिः। ज्ञानं विशुद्धमाप्नोति मद्भक्तिं वा यदृच्छया ११ स्वर्गिणोप्येतमिच्छन्ति लो कं निरयिणस्तथा। साधकं ज्ञानभक्तिभ्यामुभयं तद्‌असाधकं १२ ननरः स्वर्गतिं कांक्षेन्नारकीं वा विचक्ष णः। नेमं लोकं च कांक्षेत देहावेशात्प्रमाद्यति १३ एतद्विद्वान्पुरा मृत्योरभवाय घटेत सः। अप्रम त्त इदं ज्ञात्वा मर्त्यमप्यर्थसिद्धिदं १४ छिद्यमानं यमैरेतैः कृतनीडं वनस्पतिं। खगः स्वकेतमुत्सृज्य क्षेमं याति ह्यलंपटः १५ अहोरात्रैश्छिद्यमानं बुद्ध्वायुर्भयवेपथुः। मुक्तसंगः परं बुद्ध्वा निरीह उपशाम्य ति १६ नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारं। मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं

एतदेहं साधिकमिति विद्वान् नश्चार्थसिद्धिदमपि मर्त्यं ज्ञात्वा अप्रमत्तः अनासक्तः सन् मृत्योः मोक्षाय घटेत यत्नेन यत्नं कुर्यात् १४ अप्रमत्तोऽसक्तसंगः स्वतेन प्रमोतीत्यत्र खगदृष्टान्तः छिद्यमानमिति यमैः यमवन्निर्दये यैः पुरुषैः कृतनीडं यस्मिन् स्वकेतं स्वस्याश्रयं अलंपटः अनासक्तः दृष्टान्तिकमाह अहोरात्रैश्छिद्यमानमायुर्बु द्ध्वा भयेन वेपथुः कंपो यस्य सः १६ एवं अप्रमत्तमानं प्रमत्तं निंदति नृदेहमिति सर्वेषां फलानां कारणं येन वा र्धिं न तरेत्स आत्महा नरदेहेन वा आद्यं सर्वफलानां मूलं एतत् उपार्जितकर्मभिः सर्वप्राप्तेः किंच सुदुर्लभं उद्यम कोटिभिरपि प्राप्तमशक्यं नयापि न सुदुर्लभं यदृच्छया लब्धत्वात् नेव सुकल्पं दृढतरं किंच गुरुर्मे जीवादेशो क्षि नमा ज्ञनवकर्णधारो नेता यस्मिन् मयाव सानुकूलेन नभस्वता मारुतेन ब्रवकूलं मात्नेनप्रेरिते २० ॥ ॥

श्री॰
भा॰ ए॰
टी॰
६१

एवं नात्यंतविरक्तस्य वैराग्यद्वारा ज्ञानभक्तिसाधकं कर्मयोगमुक्त्वेदानीं सम्यग्विरक्तस्य ज्ञानयोगं तस्य च ज्ञानयोगेप्य
र्वाक् किंचित्कर्म नैव वर्जनीयं इत्याह सार्धैर्नवभिः यदा त्वारंभेषु कर्मसु निर्विण्णो दुःखदर्शनेनोद्विग्नः तत्फलेषु विरक्ता
श्च नितरां संयतेंद्रियः सन् आत्मनोभ्यासेन आत्मविषयज्ञानसंततस्य विस्तार्य अचलं यथा भवति तथा मनो धारयेत् १८
न च प्रथममेवात्यंतधारणासंभवात् तत्स्वभावानुसारेण वशीकरणमाह यर्हि आशु भ्राम्यत् परिभ्रमत् अनव
स्थितं भवति तदनुरोधेन किंचिदपेक्षापूरणद्वारेण १९ ननु तर्हि यथापूर्वमेव स्यात्तत्राह मनोगतिं न विसृजेत्
नोपेक्षेत किं त्वप्रमत्तः सन् आत्मवशं नयेत् आत्मानं लक्षयेदित्यर्थः २० अनुरोधमार्गं सदृष्टांतेनाह एषः अनुरु
द्धिमार्गेण मनसः संग्रहः परमयोगः तत्साधनत्वात् उपचारेण तन्निर्दयाद्यांतस्य दमनीयस्य अर्वतः अश्वस्य

यदारंभेषु निर्विण्णो विरक्तः संयतेंद्रियः अभ्यासेनात्मनो योगी धारयेदचलं मनः १८ धार्यमाणं म
नो यर्हि भ्राम्यदाश्वनवस्थितं अतंद्रितोनुरोधेन मार्गेणात्मवशं नयेत् १९ मनोगतिं न विसृजेज्जित
प्राणो जितेंद्रियः सत्त्वसंपन्नया बुद्ध्या मन आत्मवशं नयेत् २० एष वै परमो योगो मनसः संग्रहः स्मृ
तः हृदयज्ञत्वमन्विच्छन् दम्यस्येवार्वतो मुहुः २१ सांख्येन सर्वभावानां प्रतिलोमानुलोमतः भवाप्यया
वनुध्यायेन्मनो यावत्प्रसीदति २२ निर्विण्णस्य विरक्तस्य पुरुषस्योक्तवेदिनः मनस्त्यजति दौरात्म्यं
चिंतितस्यानुचिंतया २३ ॥ ॥

हृदयज्ञत्वं साधिप्रायेण गतिमन्विच्छन् अपेक्षमाणः अश्वधारकः प्रथमं किंचित्तत्कालं अनुवर्तेत तदा वश्यं मना
नेधून्वे वगच्छति न त्वपेक्षेतैव तद्वदित्यर्थः २१ एवमीषद्वशीकृतस्य मनसः अत्यंतनिश्चलोपायानाह सांख्येनेति द्वि
भिः सांख्येन तत्त्वविवेकेन सर्वभागावानां महदादिदेहानां नानाप्रतिलोमतः प्रकृत्यादिक्रमेण भवं पृथिव्यादि
क्रमेणाप्ययं च अनुध्यायन् प्रसीदति निश्चलं भवति निश्चलं भवति २२ ननूपायसहस्रेणापि मनो विषयाकारतां
न त्यजति किं पुनर्योगोपदेशेनेति चेत् तत्राह निर्विण्णस्येति न तस्य योगमायापि विषुनेषु अवधि धूनात्मदर्शना
त् नरविकारापन्नसंसारचक्रे निर्विण्णस्य अतो विरक्तस्य उक्तवेदिनः गुरूपदिष्टार्थालोचकस्य तेनैव गुरूपदिष्टस्यैव
चिंतितस्य पुनः पुनरनुचिंतया दौरात्म्यं देहाद्यभिमानं त्यजति २३ ॥ ॥

राम॰
६१

यमादिभिर्योगमार्गैः आन्वीक्षिक्या पदार्थद्वयशोधनेन मयार्चनध्यानादिभिर्वा वाशब्देनास्य पदस्य स्वातंत्र्यं दर्शयति एवं एतैरुपायैः योग्यं परमात्मनि मनः स्मरेत् नान्यैः अन्नोन्यनऊर्ध्वादित्यर्थः २४ ननु नान्यैरिति कथं योगिभिः प्रमादाद्विकल्पप्राप्तौ पापापनुत्तये प्रायश्चित्तं कार्यमेव तत्राह यदीति योगेन ज्ञानाभ्यासेनैव पतनं भङ्गस्यापि नामकीर्तनाद्युपलक्षणार्थं नान्यत् कृच्छ्रादि २५ ननु नित्यनैमित्तिककर्म सर्वशोधकत्वाद्गुणः हिंसादिकं न शुद्धिहेतुत्वाद्दोषः न च वतन्निवर्तकत्वात् कृच्छ्रादिप्रायश्चित्तं गुण इति प्रतिषेधाभ्यां प्रसक्तत्वात् प्रायश्चित्तं विनायोगेनैव कथं पापं हरेत् न चाह स्वे स्वे इति सार्धेन स एव गुणः नेतरः नतूपपादयति यस्मात् विधिनिषेधाभ्यामनेन गुणदोषविधानेन कर्मणां नियमः संकोचः कृतः कुत एतत्तत्राह जात्याद्युत्पन्ने वाऽशुद्धानां शमनेनात्मा

यमादिभिर्योगपथैरान्वीक्षिक्या च विद्यया ममार्चोपासनाभिर्वा नान्यैर्योग्यं स्मरेन्मनः २४ यदि कुर्यात्प्रमादेन योगी कर्म विगर्हितं योगेनैव दहेदंहो नान्यत्तत्र कदाचन २५ स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः कर्मणां जात्यशुद्धानामनेन नियमः कृतः २६ गुणदोषविधानेन सङ्गानां त्याजनेच्छया २६ जातश्रद्धो मत्कथासु निर्विण्णः सर्वकर्मसु वेद दुःखात्मकान्कामान् परित्यागेऽप्यनीश्वरः २७ ततो भजेत मां प्रीतः श्रद्धालुर्दृढनिश्चयः जुषमाणश्च तान्कामान् दुःखोदर्कांश्च गर्हयन् २८ प्रोक्तेन भक्तियोगेन भजतो मासकृन्मुनेः कामा हृदय्या नश्यन्ति सर्वे मयि हृदि

संगानां त्याजनेच्छया अयं भावः पुरुषस्याशुद्धिर्वासनया प्रवृत्तेरन्यास्ति स्वाभाविकप्रवृत्तेश्चैव तस्य मलिनत्वात् न च सहसा सर्वतो निवर्तितुं शक्नोति अतः इदं न कर्तव्यं इदमेव कर्तव्यमित्येवं स्वाभाविकप्रवृत्तिसंकोचद्वारेण निवृत्तिरेव क्रियते तथा च न प्रवृत्तिपरो वेदः तथा चैकविंशाध्याये वक्ष्यामः ऽस्मिन्नेव हि कामेभ्य इत्यादिना अतो योगिनः स्वाभाविकप्रवृत्त्यभावान्न प्रायश्चित्तादिविधिगौरवेणेति २६ भक्त्यधिकारिणां भक्तियोगमाह जातश्रद्ध इति त्रिभिः मत्कथासु जातश्रद्धः अत एवान्यकर्मसूद्वेगी न तु तत्फलेषु विरक्तः तदाह वेद दुःखात्मकानिति यद्यपि वेद तथापि तत्परित्यागेऽप्यनीश्वरः अशक्तः २७ एवंभूतो यः सश्रद्धालुः भक्त्यैव सर्वं भविष्यतीति दृढनिश्चयः सन् ततस्तदनन्तरं मां प्रीत्या भजेत विषयांस्तु सेवमानोऽपि न तेषु प्रीतिं कुर्यादित्याह २८ कथं भजेत किं वा ततो भवति तदाह प्रोक्तेनेति द्वाभ्यां श्रद्धामृतकथायां मे शश्वन्मदनुकीर्तनमित्यादिना

हृदयमेवग्रंथिः अहंकारोमीत्यहंकारः तत्सर्वकार्यस्सर्वेसंशयाः असंभावनादयः कर्माण्यनारब्धफलानिसंर
सारहेतुभूतानि ३० तदेवंव्यवस्थितयाधिकारत्रयमुक्तं तत्रभक्तेरन्यनिरपेक्षत्वादन्यस्यचतत्सापेक्षत्वाद्भक्तियो
गएवश्रेष्ठ इत्युपसंहरतितस्मादितित्रिभिः मदात्मनः मयिआत्माचित्तंयस्यतस्यश्रेयः साधने ३१ तत्रहेतुः
यत्कर्मभिरित्यादिद्वाभ्यां इतरैरपितीर्थयात्राव्रतादिभिः श्रेयः साधनैः यत्प्राप्यंसत्वशुद्ध्यादितत्सर्वं ३२ अंजसाअ
नायासेनैव स्वर्गमपवर्गंमद्धामवैकुंठंलभतएव ३३ वांछनंनास्तीत्युक्तं यदिवांछतीति ३४ तत्रहेतुमाह
नकिंचिदिति धीराः धीमंतः यतोममएकांतिनः मय्येववशीतियुक्ताः अतोमयादत्तमपिकैवल्यं तदुपपादयति
नैरपेक्ष्यमेवपरंश्रेयःअनल्पकंमहदाहुः श्रेयसंतस्मात्तेनसाधनंचप्राहुः मेभक्तिर्निराशिषः प्रार्थनाशून्य

भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्माणिमयिदृष्टेखिलात्मनि ३० तस्मान्मद्
भक्तियुक्तस्ययोगिनोवैमदात्मनः नज्ञानंनचवैराग्यंप्रायःश्रेयोभवेदिह ३१ यत्कर्मभिर्यत्तपसाज्ञा
नवैराग्यतश्चयत् योगेनदानधर्मेणश्रेयोभिरितरैरपि ३२ सर्वंमद्भक्तियोगेनमद्भक्तोलभतेंज
सा स्वर्गापवर्गंमद्धामकथंचिद्यदिवांछति ३३ नकिंचित्साधवोधीराभक्ताह्येकांतिनोमम
वांछंत्यपिमयादत्तंकैवल्यमपुनर्भवं ३४ नैरपेक्ष्यंपरंप्राहुर्निःश्रेयसमनल्पकं तस्मान्निराशि
षोभक्तिर्निरपेक्षस्यमेभवेत् ३५ नमय्येकांतभक्तानांगुणदोषोद्भवागुणाः साधूनांसमचित्तानां
बुद्धेःपरमुपेयुषां ३६ एवमेतान्मयादिष्टाननुतिष्ठंतिमेपथः क्षेमंविंदंतिमत्स्थानंयद्ब्रह्मपर
मंविदुः ३७ इतिश्रीभागवतेमहापुराणेएकादशेविंशोध्यायः २० ॥

स्वर्गाद्यनाकांक्षणात् भक्तानिरपेक्षतारहितस्यतुसाभवेत् यद्वामेनिरपेक्षस्ययाभक्तिःसानिराशिषोभवेदित्यर्थः
३५ अनेनचप्रकारेणसिद्धानांनगुणदोषाइतिविरोधपरिहारमुपसंहरति नमयीति गुणदोषैर्विहितप्रति
षिद्धैरुद्भवायेषांतेगुणाः पुण्यपापादयः साधूनांनिरस्तरागादीनांअतःसमचित्तानांअतएवबुद्धेः
परमीश्वरंप्राप्तानां ३६ काम्यकर्मनिष्ठानांनिषिद्धत्यागेनात्रिमार्गीमुपसंहरति एवमिति पथः मत्प्राप्त्युपायान्
येऽनुतिष्ठंति तेदेशकालमायादिरहितंममलोकंविंदंति तत्परमंब्रह्मस्थानंविदुः ३७ इतिश्रीभावार्थदी
पिकायामेकादशस्कंधेविंशोध्यायः २० ॥

नयनिस्ववरानंदः परानंदः नृकेसरी यत्कृपालवलेशेन श्रीधरः सत्कविर्हि नी ईशानामिह यासेनः त्वं
नाममस्मारहसं मयाहिस्वीयबोधायपकृतेमेन तु सर्वतः एकविंशे क्रियाज्ञानभक्तिष्वनधिकारिणां कामिनां
इष्यते प्राग्गुणदोषाः प्रपंचिताः न देवं गुणदोषव्यवस्थार्थयोगत्रयप्रस्तुतेन त्रय ज्ञानभक्तिसिद्धानां नहि
विद्गुणदोषौ न साधकानां तत्र प्रथमतो निष्ठा तु कर्मनिष्ठानां यथाशक्ति नित्यनैमित्तिकं कर्म सत्वशोधकत्वा
द्गुणः तदकरणं निषिद्धकरणं च तत्र मलीनसकरणत्वाद्दोषः नत्रिवर्णकाम्यप्रायश्चित्तं गुणः विशुद्धसत्वा
नां ज्ञाननिष्ठानां ज्ञानाभ्यास एव सिद्धिहेतुत्वाद्गुणः भक्तिनिष्ठानां तु पुनः श्रवणकीर्तनादिभक्तिरेव गुणः त
द्विरुद्धं सर्वमुभयेषां दोषः एतत्कृदं नीयेत्तन सिद्धाः न साधकाः किंतु केवलं काम्यकर्मप्रधाना तेषां स्व

श्रीभगवानुवाच य एतान्मत्पथो हित्वा भक्तिज्ञानक्रियात्मकान् क्षुद्रान्कामांश्चलैः प्राणै
र्जुषंतः संसरंति ते १ स्वे स्वेधिकारे या निष्ठा स गुणः परिकीर्तितः विपर्ययस्तु दोषः स्यादुभयो
रेष निश्चयः २ शुद्ध्यशुद्धी विधीयेते समानेष्वपि वस्तुषु द्रव्यस्य विचिकित्सार्थं गुणदोषौ शु
शेषपापार्थादि इत्यादिभेदैः पीडांवदंति दैवज्ञः नतुशरीरकोणादिस्थितस्यतद्दृष्टागोचरस्यग्रहगतोवपीडा
उतग्रात्मनोदेहोनस्याभिमानाद्भवति अतः पुरुषस्ततोग्रहात् देहाच्च अन्यः कस्मैकुप्येत् ५४ कर्महेतुश्चेत्

आत्मायदिस्यात्सुखदुःखहेतुः किमन्यतस्तत्रनिजः स्वभावः नह्यात्मनोन्यद्यदितन्मृषास्यात्क्रु
ध्येतकस्मान्नसुखंनदुःखं ५३ ग्रहानिमित्तंसुखदुःखयोश्चेत्किमात्मनोजस्यजनस्यतेवै ग्रहैर्ग्र
हस्यैववदंतिपीडांक्रुध्येतकस्मैपुरुषस्ततोन्यः ५४ कर्मास्तुहेतुः सुखदुःखयोश्चेत्किमात्मनस्तद्धि
जडाजडत्वे`` देहस्त्वचित्पुरुषोयंसुपर्णः क्रुध्येतकस्मैनहिकर्ममूलं ५५ कालस्तुहेतुः सुखदुःख
योश्चेत्किमात्मनस्तत्रतदात्मकोसौ नाग्नेर्हितापोनहिमस्यतत्स्यात्क्रुध्येतकस्मैनपरस्यद्वंद्वम् ५६

अस्त्वितिअभ्युपगमः कर्मैवनास्तिकुतस्तस्यहेतुत्वमितितदाह हियस्मात् तत्कर्मएवकस्यजडाजडत्वेसति
स्यात् जडत्वाद्विकारोपपत्तेः अजडत्वाद्धिनात्रसंस्थानतः प्रवृत्त्यसंभवात् अचित् जडोदेहः अतस्तस्यप्रवृ
त्तिर्नसंभवति पुरुषस्तुसुपर्णः शुद्धज्ञानस्वरूपः अतः कस्मैक्रुध्येतयतः सुखदुःखयोर्मूलभूतंकर्मैवनास्तीति
५५ नत्वकालपक्षेपिआत्मनः किंयतोसौकालात्मएवअस्यांशत्वात् स्वांशस्यस्वतः पीडानास्तीत्यत्रदृष्टान्तः
नास्त्यग्निहेतोस्तदंशस्यज्वालादेस्तापोदाहेनानाशोस्ति नतोपाधिभूतकाष्ठांशादाहान्नाशः स्यादितिदृष्टान्ता
न्तरमाहहिमस्यात् शीतंतदंशस्यतुषारादेःनाशकंनस्यादित्यर्थः किंचआसतामेतान्येवस्वतः परएवा
येनवपरस्यदेहेसुखदुःखादिकमस्तीति ५६ ॥

नदेवंमेदेनेदेनवः प्रसिद्धमिदस्तायदिकश्चिद्देवेनतरगुज्ञावयेन्नदपिवस्तमहिमापेक्षायोनसंभवंतीत्याहनकेनविदितिनवध
तोवः कथमपहूयतेतत्राहयथेतिसंसृतिमविद्यमानामेवतूपयतिप्रकाशयतीतितथातस्याहमः अहंकारस्ययथास्यात्
ननत्थापवतः प्रकृतेः परस्मात्मनाहंदसंबंधः अहंकारानिमित्तोमेनवास्तवइत्यर्थः एवंप्रबुद्धोयः संभूतेः कृतानविभेति ५७
यतोहमथैतेपवपरमात्मनिष्ट्यानवीष्यामीत्याहएनामितिमोहमिनवयः नविषयनिष्टैवचकथंभवेत्तदाहमुक्तेदेति ५८
प्रसावेनमहगायाथ्यैसंदेपतोदर्शयतिहाभ्यामित्यनयद्रविणमिविद्यागतक्रमः मनुप्रयोगपर्यंतत्रमाद्धिनिराकृतोपि

देकेनविल्काधिकथंवनासंदेहोपरामः परतः परस्य यथाहमः संसृतिरूपिणः स्यादेवप्रबुद्धोनविभेतिभू
तैः ५७ एतोमस्राम्यायपरात्मनिष्ठामथापितोस्वेनमेमेहर्षिभिः अहंतरिष्यामिदुरंतपारंतमोमुकुंदांघ्रि
निषेवयेव ५८ श्रीभगवानुवाच निर्विद्यनष्टद्रविणोगतक्लमः प्रव्रज्यगांपर्यटमानइत्थं निराकृतोसद्भिर
पिस्वधर्मादकंपितोमुमुनिराहगाथां ५९ सुखदुःखप्रदोनान्यः पुरुषस्यात्मविभ्रमः मित्रोदासीनरिपवःसं
सारस्तमसःकृतः ६० तस्मात्सर्वात्मनातातनिगृहाणमनोधिया मय्यावेशितयायुक्त एतावान्योगसंग्रहः
६१ यएतांभिक्षुणागीतांब्रह्मनिष्ठांसमाहितः धारयन्श्रावयन्श्रृण्वन्द्वंद्वैर्नैवाभिभूयते ६२ इति भा व
तेएका शस्कंधे गवड वसंवा भिक्षुगीतायांत्रयोवि ध्यायः २३ श्रीभगवानुवाच अथतेसंप्रवक्ष्यामि
सांख्यंपूर्वैर्विनिश्चितं यद्विज्ञायपुमान्सद्योजह्याद्वैकल्पिकंभ्रमं १ आसीज्ज्ञानमथोह्यर्थएकमेवाविकल्पि
ते यदाविवेकनिपुणाआदौकृतयुगेयुगे २ ॥

स्वधर्मोस्थितेपितः सन्मुनिरमुंगाथामगायदित्यन्वयः ५९ मित्रोदासीनरिपवः सर्वोपिसंसारः नमसः अज्ञानात् आत्मनोम
नसोविभ्रममात्रः ततात्स्विकरत्यर्थः ६० उक्तेदंहसहनोपायमुपसंहरतितस्मादिति ६१ मनोनिग्रहाशक्तोपिनत्कुवरणादि
तिष्ठः तत्फलमाहयोनीमामदयतीतिद्वंद्वैः सुखदुःखादिभिः भिक्षुगीतेनिभंकृहाभक्तिचित्तगनेहरिः मोहंनिग्रहंविहायविषयमा
नेदत्तुयतः ६२ भा पं योविंशोध्यायः २३ वृत्तर्विंशेत्वसांख्येनमनोमोहोनिवार्यते आत्मनः सर्वभावानामायमाया
यदिवतया स्वपरद्वेहभक्तानामुद्देशायमयमः विनस्याक्षोपुनः क्लेशः सांख्यमग्राहतन्कुने अद्वितीयात्परमात्मनोमायया
प्रकृतिपुरुषद्वारासर्वहेतनमुत्पतिपुनस्तत्रैवलीयनइत्यनुसंदधानस्यद्वैतभ्रमोनिवर्ततेइतिवक्तुंसांख्यमस्याश्रयोतिपर्वं क

श्री॰
भा॰ ए॰
टी॰
७५

अथो अर्थः कोऽर्थः ज्ञानं द्रष्टा तेन दृश्यः कृत्स्नस्तोऽप्यर्थः अविकल्पितं विकल्पशून्यमेकमेव ब्रह्मण्यवलीनमासीदित्या
र्थः कदेत्यपेक्षायामाह अयुगेयुगेभ्यः पूर्वं प्रलय इत्यर्थः तथाऽऽद्ये यत्कृतयुगं तस्मिंश्च अन्यदापि यदा विवेकनिपु
णा जना भवंति तदापि तेषां भेदास्फूर्तेः २ तद्दृक्दृश्यं वाङ्मनोगोचरं यथा भवति तथा मायाया दृश्यफलेन तत्प्रकाशकस्व
रूपेण मायाविलासरूपेण च द्विधाऽभूत् ३ तयोर्द्विधाभूतयोर्मध्ये उभयात्मिका कार्यकारणरूपिणी अभवत् ततः
वत् अभिव्यक्ता बभूव ४ मया परमेश्वरेण जीवादृष्टोपयुक्तत्वात् स्वेच्छः पुरुषानुमतेन च यद्वा स्वस्यैव प्रकृतिः
ईक्षणरूपाया पुरुषावस्थानद्वमतेन तद्द्वारेणेत्यर्थः ५ सूत्रं क्रियाशक्तिमान् प्रथमो विकारः ततो महान् ज्ञान
शक्तिः नन्वयं महानेव प्रथमो विकारः प्रसिद्धः तत्राह स च ज्ञानक्रियागर्भत्वात्सूत्रेण संयुतः तत्प्रायोगिकमेव तत्त्वं

तन्मायाफलरूपेण केवलं निर्विकल्पितं वाङ्मनोगोचरं सत्यं द्विधा समभवद्बृहत् ३ तयोरेकतरो ह्य
र्थः प्रकृतिः सोभयात्मिका ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते ४ तमो रजः सत्त्वमिति प्रकृतेरभ
वन्गुणाः मया प्रक्षोभ्यमाणायाः पुरुषानुमतेन च ५ तेभ्यः समभवत्सूत्रं महान्सूत्रेण संयुतः ततो विकु
र्वतो जातो योऽहंकारो विमोहनः ६ वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिवृत् तन्मात्रेंद्रियमनसां कार
णं चिदचिन्मयः ७ ॥

क्रियाज्ञानशक्तिभ्यां द्वैधोच्यत इत्यर्थः विमोहनः जीवस्य भ्रमहेतुः संज्ञातः ६ यतस्तन्मात्रादीनां कारणमतः शब्दे
नेदैवानामप्युलदशा चिदचिन्मयः चिदाभासव्याप्तत्वादुभयग्रथितरूप इति जीवोपाधित्वे दर्शिते यद्यपि तत्साक्षादेतो
स्मादात्मनः आकाशः संभूत इत्यादिश्रुतेः अन्नमयं सौम्य मन इत्यादिश्रुतेश्च प्रथमं भूतानि जायंते तेभ्यः चापंचीकृ
तेभ्यः प्राणादिक्रमेण सप्तदशात्मकं लिंगशरीरं पंचीकृतेभ्यश्च ब्रह्मांडं तस्मिन्वैराजस्तदंतर्यामी लीलाविग्रहः क्षीराब्धि
शायी श्रीनारायणः तत्राभिमानी वैराजस्य भोगार्थी विग्रहः स्वतंत्राननः ततो यथावसरमन्येषां जीवानामाविर्भाव इ
ति प्रक्रिया तथापि विज्ञाभिव्यक्तः पूर्वं कोऽहंकारस्ततो भूतेंद्रियादिव्यवहार इत्येतां महदादिक्रमेण सृष्टिरुच्यते तथा
चोक्तं शलोहविस्फुलिंगाद्यैः सृष्टिर्याचात्रिधेति तान्यथा उपायः सोऽवतारायनास्तिभेदः कथंचनेति ७ ॥ ॥

राम ॥ राम ॥

राम॰
७५

तस्मात्त्रिविधात्त्रिविधोत्पत्तिं दर्शयति अर्थ इति तन्मात्रिकात् शब्दादितन्मात्रकारणात् तामसादहंकारात् महाभूतरूपो जज्ञे तथैव
भूतभूतानामावरणसंभावनात् इंद्रियाणि दश तैजसाद्राजसान्मात्रेषां प्रवृत्तिसंभावनात् दैवतानां सात्विकाद्वैकृतात् दिग्वातार्क-
प्रचेतोऽश्विवह्नीन्द्रोपेन्द्रमित्रकाः चंद्रश्चेत्येकादशैव शब्दात्मनस्तेषां प्रकाशसंभावनात् ८ मयैवेरिता नियमिताः ९
सलिले संस्थितिर्यस्य तत्सलिलेस्थितिः तस्मिन् सलिलसंस्थितौ अंडे श्रीनारायणरूपो लीलाविग्रहेण समभवं स्थित इत्यर्थः
विश्वाख्ये लोककारणभूते तत्र चात्मभूः स्वयंभूः वैराजरूपभोगविग्रहेण पुनर्वैराजरूपतस्मिन्नाविर्भूत इत्यर्थः १० रजसायु-
क्तो मदनुग्रहात् तपसासृजत्प्रभुः अतलादिसहिता भुवः अंतरिक्षलोकः स्वः स्वर्गः महर्लोकादेरप्युपलक्षणं ११ लो

याणि च तैजसाद्देवता आसन्नेकादश च वैकृतात् ८ मया संचोदि-
अर्थस्तन्मात्रिकाज्जज्ञे तामसादिंद्रि—
ता भावाः सर्वे संहत्यकारिणः अंडमुत्पादयामासुर्ममायतनमुत्तमम् ९ तस्मिन्नहं समभवमंडे सलिल-
संस्थितौ मम नाभ्यामभूत्पद्मं विश्वाख्यं तत्र चात्मभूः १० सोऽसृजत्तपसा युक्तो रजसा मदनुग्रहात् लो-
कान्सपालान्विश्वात्मा भूर्भुवः स्वरिति त्रिधा ११ देवानामोक आसीत्स्वर्भूतानां च भुवः पदं मर्त्यादीनां च भूर्लोकः
सिद्धानां त्रितयात्परं १२ अधोऽसुराणां नागानां भूमेरोकोऽसृजत्प्रभुः १२ त्रिलोक्यां गतयः सर्वाः कर्मणां त्रि-
गुणात्मनां योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः महर्जनस्तपः सत्यं भक्तियोगस्य मद्गतिः १३ म-
या कालात्मना धात्रा कर्मयुक्तमिदं जगत् गुणप्रवाह एतस्मिन्नुन्मज्जति निमज्जति १४ अणुर्बृ-
हत्कृशः स्थूलो यो यो भावः प्रसिध्यति सर्वोऽप्युभयसंयुक्तः प्रकृत्या पुरुषेण च १५ ॥

कस्मिन्प्रयोजनमाह देवानामिति सार्द्धेन ओको निवासः पदं स्थानं त्रितयात्परं महर्लोकादि भूमेरधः अतलादि
१२ एवंविधस्यास्य कारणमाह सार्धेन त्रिलोकं पातालादिसहितां योगादिना तन्मध्ये न यथान्तरं महर्लोकाद
यः मद्गतिर्वैकुंठलोकः १३ तत्र तत्र मद्गतिव्यतिरेकेण गतयश्चंचला इत्याह वैराग्यार्थं मया कालशक्ति-
ना धात्रा परमेश्वरेण कर्मफलप्रदेन हेतुभूतेन गुणप्रवाहे संसारे उन्मज्जति सत्यलोकमुन्नतागतीः प्राप्नोति पुनर्नि-
मज्जति निम्नाः स्थावरजीवागतीः प्राप्नोति १४ सृष्टिनिरूपणस्याद्वितीयात्मप्रतिपाद्यत्वात् तत्प्रतिपादनाय ॥
कारणकार्यस्य व्याप्तिमाह अणुरिति उभयेन संयुक्तो यावान् न देवाह प्रकृत्येति १५ ॥

इदानीं कार्यस्य कारणानन्यत्वं दर्शयति यस्येति यस्यादिः कारणमन्तः लयस्थानं च तत्सत्यं मध्यं मध्यावस्थायि स एव प्रसि
द्धं हि स्वर्णादिषु सत्तयैवाव्यभिचारित्वात् स एव सत्य इतरः असत्यस्तर्हि मिथ्याभूतकार्यस्य स्यात्तत्राह विकार इति
तैजसाः कटककुण्डलादयः पार्थिवाः घटशरावादयश्च यथेति १६ नन्वेवं तर्हि स्वकार्यं प्रति महदादीनामप्याद्यन्त
रूपत्वात् सत्यत्वं स्यात्तत्राह यदुपादायेति यद्रूपमुपादाय उपादानकारणतया स्वीकृत्य पूर्वः कारणरूपो महदादि
भावः परमहंकारादिकं भावं विकुरुते सृजति यथा पिंडो मृदमुपादाय स्वयं निमित्तभूतो घटं सृजति तद्वत्स एव
सत्यमिति पूर्वस्य पूर्वस्यानुगमः कथं तर्हि श्रुतिरेकमेव सत्यमित्यादिश्रुतिस्तत्राह आदिरिति यदा यस्यादिरन्तश्च
विवक्ष्यते तत्तस्य सत्यमभिधीयते अतः परमकारणस्यात्मनः सत्यविवक्षयेत्यर्थः १७ ननु तथापि सर्वविकारमिथ्या
त्वे प्रकृतिमहापुरुषाकालानामकार्यभूतानामभिन्नत्वात् कथमद्वितीयत्वं तत्राह प्रकृतिरिति अस्य सतः कार्य

यस्तु यस्यादिरंतश्च स वै मध्यं च तस्य सत् विकारो व्यवहारार्थो यथा तैजसपार्थिवाः १६ यदुपा
दाय पूर्वस्तु भावो विकुरुतेऽपरं आदिरंतो यदा यस्य तत्सत्यमभिधीयते १७ प्रकृतिर्यस्योपादानमा
धारः पुरुषः परः सतोऽभिव्यंजकः कालो ब्रह्म तत्त्रितयं त्वहं १८ सर्गः प्रवर्तते तावत्पौर्वापर्ये
णनित्यशः महान्गुणविसर्गार्थः स्थित्यंतो यावदीक्षणं १९ ॥

स्योपादानं या प्रकृतिः प्रसिद्धा यश्च तस्याः आधारः पुरुषः यश्च गुणक्षोभेणाभिव्यंजकः कालः तत्त्रितयं ब्रह्मैव इत्याह
मेवं न तु पृथक् प्रकृतेः शक्तित्वात्पुरुषकालयोरंशत्वात् १८ एवं तावत्कालत्रयेऽप्यव्यभिचारित्वात्
ब्रह्मैव सत्यं इति वक्तुं तस्य सृष्टिकारणत्वेनादौ सत्त्वमुक्त्वा मध्येऽपि तस्यैव सत्त्वमुपपादयितुं प्रलयावधित्वेन सत्त्वं द
र्शयिष्यन् सर्गप्रवाहरूपायाः स्थितेरवधिमाह सर्गः सर्ग इति महानबहुलः पौर्वापर्येण पितृपुत्रादिरूपेणानित्य
शश्चाविच्छेदेन किमर्थं प्रवर्तते तदाह गुणेषु देवेषु विविधतया सृज्यते इति गुणविसर्गो जीवः तदर्थः तद्भोगप्र
योजनः किं पर्यन्तं प्रवर्तते यावत्स्थितिः स्थितेरन्तः सोऽपि किमवधिस्तदाह यावदीक्षणं परमेश्व
रस्य तावत् प्रलयं निरूपयति १९ ॥ ॥

प्रलयं नित्रूपयन्निविराड्ब्रह्मसोऽहं मयाकालात्मनाग्रासाद्यमानः व्याप्यमानः लोकानां महद्भूतः कल्पसंक्षिप्तलयाविवि
प्रलयं निरूपयति विराड्ब्रह्मणोऽहं मयाकालात्मनाग्रस्यमानः लोकानां महासुरः कल्पसृष्टिप्रलयविवि
धाः कल्पनेयस्मिन्नानात्वास्तस्मिन्विकल्पयतीति तथा सनथा भूतोपि पंचत्वरूपाय विशेषाय विभागाय कल्पते योग्यो
भवति पंचानां भूतानामेकरूपः तेषां पृथक्भावाय पंचत्वायतनप्रयतीत्यर्थः २ तत्र तस्मादात्मनस्त्वाकाशा
द्याः संभूतः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नमन्नात्पुरुष इति
श्रुत्युक्तः सृष्टिक्रमः प्रातिलोम्येन प्रलयमाह अग्रेइति भर्तृशरीरं योनोपधिनेतस्मिन्नेश्वरतवर्षाणामनावृष्ट्यादीनि
सनिनत्वेवलीयत इत्यर्थः अन्नंप्रानास्तबीजमात्रावशेषं भवतीत्यर्थः प्रानाभूमावुप्तानप्ररोहन्तीत्यर्थः भूमिर्गंधेसर्वे
सति नवेवलीयत इत्यर्थः अन्नं धानास्तबीजमात्रावशेषं भवतीत्यर्थः धानाभूमावुप्तानप्ररोहन्तीत्यर्थः भूमिर्गंधे सर्वेत
कादित्यशोषितो संकर्षणास्त्वाग्निनादग्धावसनीभूतस्तद्रूपगंधमात्रावशेषा भवति २१ अप्सुगंधः शतवर्षा

विराणप्यासाद्यमानो लोककल्पविकल्पकः पंचत्वायविशेषाय कल्पते भूतैः सह २० अग्रेप्रलीय
नेमर्त्येमन्नेधानास्तलीयते धानाभूमौ प्रलीयते भूमिर्गंधे प्रलीयते २१ अप्सु प्रलीयते गंधः अपश्चस्वगुणे =
रसे लीयते ज्योतिषि रसो ज्योती रूपे प्रलीयते २२ रूपं वायौ स च स्पर्शे लीयते सोऽपि चांबरे २३ अंबरं शब्द दु
भूतेन मात्रे इंद्रियाणि स्वयोनिषु २४ यानि वैकारिके सोऽपि लीयते मनसीश्वरे शब्दो भूतादिमप्येति भूता
दिर्महति प्रभुः २५ स लीयते महान्स्वेषु गुणेषु गुणवत्तमः तेऽव्यक्ते संप्रलीयन्ते तत्काले लीयते व्यये
२६

कृष्णा साध्यमानो प्रलीयत एवमेवापस्तु ज्योतिषा शोष्यमाणा रसमात्रावशेषा भवति ततो रसोऽपि तस्मिंल्लीयते २२
ज्योतिश्च वायुनाभिभूयमानं सत् तस्मिंल्लीयते वायुश्च कालप्रेरितेनांबरेण ग्रस्तः स्पर्शमात्रः सन्तस्मिन् अंबरं भूतादि
नाहंकारेणग्रस्यमानं शब्दतन्मात्रे तदेव २३ तामसाहंकार्यस्याकारस्य शब्दपर्यन्ते लयः सकाराजसाहंकारकार्यस्या
प्याह इंद्रियाणि स्वयोनि नि स्वस्वधर्मक देवतास्तेषां शब्दा स्वभावत्वात् अहं तेषु देवताधीनत्वात्तास्तु लय इति
वाचोयुक्तिः वस्तुतस्तु स्वकारणे राजसाहंकारे लयोऽभिप्रेतः २२ यानि रश्मि देवतागतत्वादेकत्वमविविदितं येनयो
देवतास्तु मनसि तत्र ईश्वरे नियन्तरि मनोवचसा भवतः तस्माद्देवा इत्युक्तत्वात् इंद्रियलयोऽन्यथा अप्यभिप्रायः मनस्तु
देवताभिः सह वैकारिके अहंकारे इत्यर्थः तामसाहंकारकार्यावशेषस्य शब्दस्य शब्दभूतादिनामसाहंकारेऽप्यनित
स्मिंल्लीयते इत्यर्थः भूतादिरिति पलक्षणं त्रिविधोऽप्यहंकारो महति ज्ञानक्रियाशक्तिमात्ररूपो भवति कथंभू
तः प्रभुः समर्थः सर्वजगन्मोहकत्वात् २४ स च महान्स्वकारणेषु गुणेषु ज्ञानक्रियाशक्तिमत्त्वात् गुणवत्तमः तस्मात् ज्ञावि

श्री॰
भा॰ए॰
टी॰
११

हायगुणसाम्यमात्ररूपाभवतितेव्यक्तेप्रकृतौसाम्यावस्थागतेतीत्यर्थः तदव्यक्तंकालेकालाधीनत्वात्तेनैकीभूया
वतिष्ठतेअव्ययेउपरतवृत्तौ २५ मायामयेमायाप्रवर्तकेज्ञानमयेवाअतएवजीवयतीवस्तस्मिन्महापुरुषेअयंभावः
विश्वस्यसूक्ष्ममहापुरुषस्योपकरणरूपः कालोहंत्रैशेवस्वरूपस्थअतस्तदात्मनावतिष्ठतइति तदुक्तंसमयेकालेव
रतेसृजतीत्याद्युक्तंप्रधानपुंसोनरदेवसत्वहृदिति दृशमेव योयंकालस्तस्यतेव्यक्तैवेयोः चेष्टामाहुः चेष्टतेयेन
विश्वंनिमेषादिवत्सरांतोमहीयानस्तवेशानेदांमथामप्रपद्येइति जीवआत्मनिप्रकृतेलीनत्वेनशक्तियोगाभावात् प
रिशिष्टेनसद्रूपेणावतिष्ठते आत्मात्वात्मस्थएवनान्यत्रलीयतेयतः केवलोनिरुपाधिः अत्रहेतुः विकल्पापाय
भ्यांविश्वोत्पत्तिलयाभ्यांलक्षणे अधिष्ठानत्वेनावधितेनवर्ततत्यासः २७ अस्यकथनस्यफलंतेनोपयोगमाह एव
मितिमनसःकथंभेदनिमित्तोभ्रमः स्यात् जातोवाकथंहृदितिष्ठेति २८ उपसंहरतिएषइतिशब्दमेवयेनेदं

कालोमायामयेजीवेजीवआत्मनिमय्यजे आत्माकेवलआत्मस्थोविकल्पापायलक्षणः २७ एवम
न्वीक्षमाणस्यकथंवैकल्पिकोभ्रमः मनसोहृदितिष्ठेतव्योम्नीवार्कोदयेतमः २८ एषसांख्यविधिः
प्रोक्तःसंशयग्रंथिभेदनः प्रतिलोमानुलोमाभ्यांपरावरदृशामया २९ इतिश्रीभागवतेएकाद
शेभगवदुद्धवसंवादे ख्या॰ यतेनामचतुर्विंशः २४ श्रीभगवानुवाच गुणानामसंमिश्राणांपुमा
न्येनयथाभवेत् तन्मेपुरुषवर्येदमुपधारयशंसतः १ शमोदमस्तितिक्षेक्षातपःसत्यंदयास्मृति
स्तुष्टिस्त्यागोस्पृहाश्रद्धाह्रीर्दयादिःस्वनिर्वृतिः २

दर्शितंतत्त्वमात्मनः सांख्यंप्रख्योतनतस्मैहरयेगुरवेनमः २९ इतिश्रीभावार्थेएकादशेचतुर्विंशः २४ पंचविं
शस्तुनैर्गुण्यप्रतिपत्तयेनिरूप्यते चित्तप्रभवसत्वादिगुणवृत्तिरनेकधा प्रकृतिपुरुषविवेकज्ञानवतोपियावत्सत्वा
त्वविशेषणगुणायवृत्तिजयोनस्यात्तावद्बह्वाहोपरमः अतस्तज्जयोपायकथनायगुणवृत्तिनिरूपणार्थमाहगुणा
नामितिसहमिश्रीभूयवर्तमानाः संमिश्राः नसंमिश्राः तेषांविभक्तानांगुणानांमध्येयेनगुणेनयथायादृशोभवेत्
तदिदंकथयतोममजानीहीत्यर्थः १ तत्रसत्ववृत्तीराह शमइतिईक्षाविवेकः तपः स्वधर्मवार्तितंस्मृतिः पूर्वापरा
नुसंधानंतुष्टिर्यथालाभसंतोषः त्यागः व्ययशीलत्वंअस्पृहावैराग्यंश्रद्धाआस्तिक्यंह्रीःगुरुचित्तेकर्मणिलज्जादया
दीनेष्वनिरपेक्षाणपतिस्मरणात् आदिग्रहणेनार्जवविनयादिस्वनिर्वृतिः आत्मरति २ ॥ ॥ राम॰
११

ईहाव्यापारः मदोदर्पः न्नसालाभेसत्यपसंतोषः स्लभोगर्वः आशीधनाद्यभिला
रजसोद्भवीत्याहकामोभिलाषः ईहाव्यापारः मदोदर्पः उत्साहः स्वविषयभोगः मदोत्साहः मदेनयुद्धाद्यभिनिवेशः य
थैणाद्देवनादिशार्थनंयाञ्चाभिदाहमन्यइतिभेदबुद्धिः सर्वविषयभोगः मदोत्साहः मदेनयुद्धाद्यभिनिवेशः य
थाः प्रीतिस्वानिप्रियनाहास्यमुपहासः वीर्यप्रभावाविष्कारः बलेनोद्यमः न्यायेनोद्यमः सात्त्विकएव ३ तमोद्भवीत
हक्रोधइतिक्रोधोसहिष्णुतालोभोव्ययपरमोमुखेन अन्नतसशास्त्रप्रभावप्राणोहिंसाद्रोहः याञ्चाप्रार्थनादंभोधर्मध्व
जित्वंक्लमःश्रमःकलिकलहः शोकमोहोमुक्तशोचनेविषादधीनीडः स्वदैन्यंचनिद्रातंद्रीयाशेवेमेभविष्यतीत्यन्वीक्षा
भीर्भयमन्युयमोङात्ताः ४ अतुपूर्वशः क्रमेणैताः श्लोकत्रयोक्ताः वर्णितप्रायाः अन्याअप्यत्रत्रयायान्नप्राह्याइतिभा
वः ५ भक्तानांगुणानांत्रयोवर्णिताः मिश्राणामाहसन्निपातइतित्रिभिः अहंममेतिचमतावुन्नसर्वहन्निसाधथिक
रणदर्शनात्संनिपातनत्वंदर्शनत्वमहंशानः कामीक्रोधीत्यादिनयामसंशानिर्लिकामः क्रोधइत्यादिस्वयंनस्व

कामईहामदमति लोभसंभआशीर्भिदासुखं मदोत्साहोयशःप्रीतिर्हास्यंवीर्यबलोद्यमः ३ क्रोधोलो
भोनृतंहिंसायाञ्चादंभःक्लमःकलिः शोकमोहौविषादर्तीनिद्राशाभीरनुद्यमः ४ सत्त्वस्यरजसस्तमो
नासत्त्वमसङ्ख्यातुपूर्वशः वृत्तयोवर्णितप्रायाःसन्निपातमथोशृणु ५ सन्निपातस्त्वहमितिममेत्युद्धव ५
यामतिः व्यवहारःसन्निपातोमनोमात्रेंद्रियासुभिः ६ धर्मेचार्थेचकामेचयदासौपरिनिष्ठितः
गुणानांसंनिकर्षोयंश्रद्धारतिधनावहः ७ प्रवृत्तिलक्षणेनिष्ठापुमान्यर्हिगृहाश्रमे स्वधर्मेचानुति
ष्ठेतगुणानांसमितिर्हिसा ८ पुरुषंसत्त्वसंयुक्तमनुमीयाच्छमादिभिः कामादिभीरजोयुक्तंक्रोधाद्यैस्त

र्वकः सर्वोव्यवहारश्चसन्निपातिकार्यमित्याहव्यवहारइतिअहंहेमः मनश्चमात्राणिचइंद्रियाणिचप्राणाश्चतैः सन
आदीनांसात्त्विकानामसराजसत्वादेवव्यवहारः सन्निपातजइतिभावः ६ असौपुरुषोधर्मादिषुपरिनिष्ठितोभवतितदा
यंनिपुणिष्ठोनृपः सन्निकर्षः सन्निपातकार्यधर्मादीनांसत्त्वतमोरजःकार्यत्वादितिभावः सन्निपातजत्वमुक्त्वाफलतश्चनो
यानिपुणिष्ठोनृपः सत्त्वरजस्तममयान्यावनीतितथा ७ धर्मनिष्ठायामेवसंनिपातेदर्शयतिप्रवृत्ति
यात्मात्मा श्रद्धारतिधनानिसत्त्वरजस्तममयान्यावहतीतितथा ७ धर्मनिष्ठायामेवसंनिपातंदर्शयतिप्रवृत्तिल
क्षणेकाम्यधर्मेयदापुमानिष्ठाभवतिअथचानिष्ठोनिष्ठितः तथापुमान् यदागृहाश्रमएवासक्तः निष्ठेदनुपश्चात्स
धर्मंचनित्यनैमित्तिकंनिष्ठेतगुणानांसापिसमितिः सन्निपातःहियस्मात्काम्यधर्मगृहासक्तिस्वधर्मास्सत्वरजस्तममया
इत्यर्थः ८ तदेवंमिश्राणांगुणानांवृत्तिंदर्शयित्वेदानींपुमान्येनयथाभवेदितिगुणयुक्तंतद्दर्शयतिपुरुषमितित्रिभिः ९

हिंसाद्यातुमरणादिकमाशास्यद्योभजेन्नेनामसंविषात् यजैर्गुणैरेवंभूतोभवतीति तात्पर्यार्थः ११ ननुनवापिगु
णवशेनकर्तृत्वाविशेषान्केनविशेषेणत्वसेव्योजीवस्तुसेवकइतिनियमः यतोमांभजेदिनिवारंवारश्चानेनत्राह स
स्वमितिजीवस्यैवत्वमेवुतः यतः चित्तत्वाजीवोपायोचितेनभिव्यज्यतेश्रुतोपैः सचवस्तुतकीदृशः भूतानांदेहद्वा
राणांत्रुन्येषांचमध्येसजमानः अहंत्वतासजमाणोगुणानिर्यन्तृत्वेनस्थाद्यादिकर्तापिनित्यशुद्धः अतोमहान् वि
शेषइतिभावः यद्वाभूतानामपंचीकृतानांनायत्कार्यभूतेचित्तमममयंहिंसाम्यमनइतिश्रुतेः तत्प्रभावाः अतोभू
तोपहितस्यजीवस्यैवेति मन्यत्समाने १२ नदेवंमिश्रामि अगुणाकार्याणांशब्देदानीमेकैकगुणोद्रेककार्याणि
दर्शयति यदेतिसमदशभिः यदेनरोगुणोजयेत् अभिभवेत् भास्वरंविप्रकाशकंविशुदंस्वच्छंशिवशांतंशिवत्वाव

यदाभजतिमांभक्त्यानिरपेक्षःस्वकर्मभिः तंसत्वप्रकृतिंविद्यात्पुरुषंस्त्रियमेववा १४ यदाआशि
षआशास्यमांभजेतस्वकर्मभिः तंरजःप्रकृतिंविद्याद्धिंसामाशास्यतामसं १५ सत्वंरजस्तमइति
गुणाजीवस्यनैवमे चित्तजायैस्तुभूतानांसजमानोनिबध्यते १६ यदेतरौजयेत्सत्वंभास्वरंविशदं
शिवं तदासुखेनयुज्येतधर्मज्ञानादिभिःपुमान् १७ यदाजयेत्तमःसत्वंरजःसंगभिदाबलं तदा
दुःखेनयुज्येतकर्मणायशसाश्रिया १८ यदाजयेद्रजःसत्वंतमोमूढंलयंजडं युज्येतशोकमोहा
भ्यांनिद्रयाहिंसयाशया १९ यदाचित्तंप्रसीदेतइंद्रियाणांचनिर्वृतिः देहेऽभयंमनोसंगंतत्सत्वंविद्धि
मत्पदं २०

प्रादत्वभास्वरत्वानां यथाक्रमंसुखधर्मज्ञानहेतुत्वात्तदातैर्युज्येतै आदिशब्दाच्छमदमादिभिश्च १३ तमःसत्वंचक
र्मभूतेनत्व रजःकर्तृसंगसंगहेतुः भिदाभेदहेतुःबलंप्रहृत्तिस्वभावंयतःसंगहेतुत्वात् यशसाश्रियावयुज्ये
ततत्वतमः पुमांभवतीत्यर्थः भिदाहेतुत्वात् दुःखेनयुज्येतद्वितीयाद्वैभयंभवतीतिश्रुतेर्बलत्वात्कर्मणा
वयुज्यते १४ यदारजःसत्वंचकर्मभूतंतमः कर्तृजयेत् मूढंविवेकभ्रंशंलयंआवरणात्मकंजडंप्रत्युषमात्म
कम्भूतोमूढत्वाच्छोकमोहहिंसाभिलंयत्वान्निद्रयाजडत्वात्तुद्यमाभावेनकेवलंआशयायुज्येतेति दृढेवंजनइ
लियाठलयात्मकत्वमेवनिद्राशयोर्हेतु १५ किंचयदाचित्तंप्रसीदेतस्वच्छंभवेन्निर्वृतिरुपरतिस्तत्तदामत्पदं
मदुपलब्धस्थानंसत्वंप्रसिद्धिमत्पदं १६ ॥

यदापुनःक्रिययाविकुर्वन्विकारंप्राप्नुवन् अधीर्भवतिः असमंनाहितधीर्यस्यसः चेतसांबुद्धीन्द्रियाणामनिवृत्तिः
गात्राणिकर्मेन्द्रियाणितेषामस्वास्थ्यंविकारित्वंमनोभ्रान्तंचंचलंरजउत्कटंनिशामयजानीहि १७ यदासीदत्
नवेभवत् चेतसोग्रहणेविषयाकारपरिणामेऽक्षमंसच्चित्तंविलीयेतमनोऽपिसंकल्पात्मकंनष्टंलीनंतमोऽज्ञानेग्ला
निर्विषादश्चभवति तंतदातमउत्कटंउपधारयविद्धिः १८ किंचएधमानइति इंद्रियाण्येवनिवृत्तानिप्रवृत्तानिमोहःस्वभा
वादिदैवासुररक्षांसिपदार्थसंगाद्याधिदैवविकारान्गुणानांउत्कर्षकार्याण्यानीतिज्ञेये गुणोत्कर्षेणावस्थाभेदंदश
यतिसत्त्वादिति प्रसंगान्निर्गुणावस्थामाह तुरीयंचतुर्थंअवस्थान्तरंनामत्रिषुजागरणादिषुसंततंसमेकरूपमात्मतत्त्व
मेवेत्यर्थः २० गुणोत्कर्षद्वारेणतत्कर्मफलनिष्ठांदर्शयति उपर्युपरीतिब्राह्मणाएवद्वार्यीजुष्टानातिप्रज्ञाः आत्र

विकुर्वन्क्रिययाचाधीरनिवृत्तिश्चचेतसां गात्रास्वास्थ्यंमनोभ्रान्तंरजएतैर्निशामय १७ सीदच्चित्तंवि
लीयेतचेतसोग्रहणेऽक्षमे मनोनष्टंतमोग्लानिः तमस्तदुपधारय १८ एधमानेगुणेसत्त्वेदेवानांबल
मेधते असुराणांचरजसितमस्युद्धवरक्षसां १९ सत्त्वाज्जागरणंविद्याद्रजसास्वप्नमादिशेत् प्रस्वा
पंतमसाजन्तोस्तुरीयंत्रिषुसंततं २० उपर्युपरिगच्छन्तिसत्त्वेनब्राह्मणाजनाः तमसाधोधआमुख्या
द्रजसान्तरचारिणः २१ सत्त्वेप्रलीनाःस्वर्यान्तिनरलोकंरजोलयाः तमोलयास्तुनिरयंयान्तिमामेवनि
र्गुणाः २२ मदर्पणंनिष्फलंवासात्त्विकंनिजकर्मतत् राजसंफलसंकल्पंहिंसाप्रायादितामसं २३
कैवल्यंसात्त्विकंज्ञानंरजोवैकल्पिकंचयत् प्राकृतंतामसंज्ञानंमन्निष्ठंनिर्गुणंस्मृतं २४ ॥

मुख्याइतिपाठेब्रह्मलोकमभिव्याप्येत्यर्थः आमुख्यात्स्थावरानभिव्याप्य अंतरचारिणोमनुष्याएवभवंति २१ देहा
न्तकालीनगुणोत्कर्षफलमाह सत्त्वेप्रवृद्धेसतिप्रलीनामृताः रजोलयाः रजसिप्रवृद्धेसतिलयोयेषांतेएवंतमो
लयस्यापिनिर्गुणाइत्यत्रतल्लयाशंक्यानपादानाजीवेनापिनिर्गुणत्वंमामेवयान्तीत्यर्थः २२ इदागुणोत्कर्षकृतमेवत
त्रफलसाधनकर्मत्रैविध्यमाह मदर्पणंमत्प्रीत्युद्देशेनकृतंनिष्फलंकेवलंदासभावेनैवकृतंनिजकर्मनित्यादि तत्सा
त्त्विकंफलसंकल्पात्तुयत्स्यात् हिंसाप्रायंहिंसोद्देशेनकृतंनहिंसावहंलेव आदिपदाद्दम्भमात्सर्यादिकृतंतेनइदा
नीसगुणनिर्गुणभेदेनज्ञानादीनांत्रैविध्यमाह कैवल्यमिति २३ कैवल्यंदेहादिव्यतिरिक्तात्मविषयंवैकल्पिकं
देहादिविषयंयत्तत्राजसंप्राकृतंबालमूकादिज्ञानंतत् मन्निष्ठंपरमेश्वरविषयं २४ ॥ ॥

श्री
भा॰ द॰
टी॰
१६

वनंविविक्तत्वात्सात्विकोवासः भगवन्निकेतंतुसाक्षात्तदाविर्भावान्निर्गुणंस्थानं २५ कारकः कर्ताअसंगीअनासक्तः
रागांधः अत्यभिनिवेशवान् स्मृतिविभ्रष्टः अनुसंधानशून्यः मदपाश्रयः मदेकशरणः सहितोनिरहंकारत्वान्निर्गुणः २६
अधर्मेधर्मइतियाश्रद्धा २७ पथ्यंहितंपरिणामसुखकरंपूतंशुद्धंअनायस्तंअनायासेनप्राप्तं आहार्यंभक्ष्यभोज्यादि
इंद्रियाणांप्रेष्ठंकटुम्ललवणादि आर्तिदाअशुचिदैन्यकर्मअशुद्धंच वशात्मात्मन्निवेदितेननिर्गुणमित्यभिप्रेतं २८ आत्मोत्थं
सुखंमदपाश्रयमितिविपिनतदाश्रितविषयत्वेनज्ञानन्हेवडहृष्ये उक्तंसंसारहेतुभूतंत्रैगुण्यमुपसंहरतिद्वाभ्यां २९
द्रव्यंपथ्यपूतानादिदेशोवनग्रामादि फलंसात्विकंसुखमित्यादिकालः यदाभजेतदाभक्तायदेयंनरोजपेदित्यादिकारकः सा

वनंतुसात्विकोवासो ग्रामोवैकलितंचयेन् प्राहृतंतामसी ग्रामो ग्रामोराजसउच्यते तामसंद्यूतसदनंमन्नि
केतंतुनिर्गुणं २५ सात्विकः कारकोसंगीरागांधोराजसः स्मृतः तामसः स्मृतिविभ्रष्टोनिर्गुणोमदपाश्र
यः २६ सात्विक्याध्यात्मिकीश्रद्धाकर्मश्रद्धातुराजसी तामस्यधर्मेयाश्रद्धामत्सेवायांतुनिर्गुणा २७ प
थ्यंपूतमनायस्तमाहार्यंसात्विकंस्मृतं राजसंचेंद्रियप्रेष्ठंतामसंचार्तिदाशुचि २८ सात्विकंसुखमात्मो
त्थंविषयोत्थंतुराजसं तामसंमोहदैन्योत्थंनिर्गुणंमदपाश्रयम् २९ द्रव्यंदेशःफलंकालोज्ञानंकर्मच
कारकः श्रद्धावस्थाकृतिर्निष्ठात्रैगुण्यःसर्वएवहि ३० सर्वेगुणमयाभावाःपुरुषाव्यक्तधिष्ठिताः
दृष्टंश्रुतमनुध्यातंबुद्ध्यावापुरुषर्षभ ३१ एताःसंसृतयःपुंसोगुणकर्मनिबंधनाः येनामीनिर्जिताःसौ
म्यगुणाजीवेनचित्तजाः भक्तियोगेनमन्निष्ठोमद्भावायप्रपद्यते ३२ ॥ ॥

त्विकःकारकोसंगीत्यादि श्रद्धासात्विकीआध्यात्मिकीत्यादिअवस्थासत्वाज्जागरणमित्यादि आकृतिरुपर्युपरि
गंतृनीत्यादिनोक्तादेवत्वादिरूपानिष्ठासन्नेवलीनाः स्वयांतिइत्यादिनोक्तःस्वर्गादिः एवंसर्वोप्ययंभावःत्रैगुण्यत्रिगु
णात्मकः ३० नकेवलमेषएवकिंतुयावंतःपुरुषाव्यक्तयोधिष्ठिताःअधिष्ठिताःतेसर्वेभावगुणमयाएवतत्वा
दृष्टंदृष्टमिति ३१ इदानीमुक्तंत्रैगुण्यंसंसारहेतुत्वमत्रवदंस्तन्निर्जयान्मोक्षइत्याह एताइतिसार्द्धेनयेवर्जिताः
सम्यग्गाढविदितमितेनभवक्तियोगेनसन्निष्ठाःसन्मद्भावायमोक्षायप्रपद्यतेयोग्योभवति ३२ ॥ ॥
राम ॥ राम ॥

तस्माद्विवेकिनामिदमेवयुक्तमित्याह तस्मादितिज्ञानविज्ञानमयोः संभवोयस्मिंस्तमिमंनरदेहं ३२ भजनप्रका
रमाह निःसंगइतिसार्धेन सत्त्वसंसेवया सात्त्विकान्येव सेवेत पुमान्सत्त्वविवृद्धये इतिप्रागुक्तयानैरपेक्ष्येण उपशान्तात्म
केनसत्त्वेनैव ३४ एवंसति मांप्राप्नोतीत्याह संपद्यतइति जीवं जीवत्वकारणं लिंगशरीरं संप्राप्य न पुनः संसारइत्या
हजीवइति ३५ नवहिर्विषयभोगेन नान्तरः नान्तःस्मरणेन ३६ गुणाहृतानां गुणानां संसाराणां प्रथममतिन पुण्यकथाक
पत्न्यादिभिः पतनभांक्रिरसेनविवेकिनोनहिपुनः सुलभंजनरीदृशं ३७ इतिश्रीभावार्थेएकादशेपंचविंशः २५
षड्गुणोयोगनिष्ठायाविघ्नोदुःसंगतः साधुसंगेन तन्निषेधपरकाहैलेनिवर्ण्यते योगिनोयोगविभ्रंशः संयतः
संभवेदिति सर्वेषांसन्निहितत्वार्धमैलगीतंविनिरूप्यते निःसंगोवाभजेद्विद्वानप्रमत्तोजितेन्द्रियः इत्युक्तं नचविषा

तस्माद्देहमिमंलब्ध्वाज्ञानविज्ञानसंभवं गुणसंगंविनिर्धूयमांभजंतुविचक्षणाः ३२ निःसंगोमां
भजेद्विद्वानप्रमत्तोजितेन्द्रियः रजस्तमश्चाभिजयेत्सत्त्वसंसेवयामुनिः ३३ सत्त्वंचाभिजयेद्युक्तोनै
रपेक्ष्येणशान्तधीः संपद्यतेगुणैर्मुक्तोजीवोजीवंविहायमां ३४ जीवोजीवविनिर्मुक्तोगुणैश्चाशय
संभवैः मयैवब्रह्मणापूर्णोनबहिर्नान्तरश्चरेत् ३५ इतिश्रीभागवतेएकादशस्कंधेपंचविंशः २५
श्रीभगवानुवाच मल्लक्षणमिमंकायंलब्ध्वामद्धर्मआस्थितः आनंदंपरमात्मानमात्मस्थंसमुपैतिमां
१ गुणमय्याजीवयोन्याविमुक्तोज्ञाननिष्ठया गुणेषुमायामात्रेषुदृश्यमानेष्ववस्तुतः वर्तमानोपि
नपुमान्युज्यतेवस्तुभिर्गुणैः २ संगंनकुर्यादसतांशिश्नोदरतृपांक्वचित् तस्यानुगस्तमस्यंधेपत

हेनार्थंकथयिष्यन् जीवन्मुक्तस्यापिनहिसंगोदुर्निवारइत्यर्थः स्यादित्याशंक्योक्तानुवादपूर्वकंपरिहरतिसा
र्द्धाभ्यां मल्लक्षणंसत्स्वरूपंलक्ष्यतेयेनतमिमंनरदेहंलब्ध्वामद्धर्मेभक्तिलक्षणेआस्थितः आत्मस्थमात्मन्येवनिर्वृ
त्तेनमल्लक्षणस्थितंपरमानंदरूपात्मानंमांसमुपैतिसम्यक्प्राप्नोतीतिनन्वेवंभूतस्यविषयसंगोनास्तीत्याह गुणा
नयांति १ गुणमयीयाजीवयोनिः जीवोपाधिकल्पयाविमुक्तः गुणेषुवर्तमानोपितेनयुज्यतेसंगंनप्राप्नोति य
त्रहेन अवस्तुभिरप्यनेनयुज्यमानंदृश्यतेतत्राह अवस्तुतेनदृश्यमानेषु २ तथापिसंगंवर्जयेदित्याह संगमिति
असतांलक्षणमाह शिश्नोदरेणतर्प्यंतीतिशिश्नोदरतृपस्तेषांक्वविदाविदपि आसक्तानांवदृक्तानासंगः किंततस्यैकस्या

श्री॰
भा॰ए॰
टी॰
८

अथेतिहासमाह ऐलः पुरूरवाः सम्राट् चक्रवर्ती बृहच्छ्रवाः कीर्तिर्यस्य सः उर्वशीविरहात्प्रथममुन्मत्तः पश्चात्
कुरुक्षेत्रे तेन समागम्य गांधर्वदत्तेनाग्निनाभीष्टयागानिष्ट्वा पुनरुर्वशीलोकं प्राप्य शोकसंयमे शोकापगमे सति तेन ते निर्विण्णः स
न् इमां गाथामगायदिति तेन नवमस्कंधे अनुसारेण द्रष्टव्यं ४ प्राक्तनीं मोहावस्थामाह त्यक्त्वेति अन्यानेत्य त्यक्त्वा अथ
वा आत्मानं त्यक्त्वा व्रजन्तीमिति मन्वगात् घोरे तिष्ठेति हे जाये मनसा तिष्ठ हे घोरे एवं वचांसि श्राव्य क्षणं वा न हेतन नौ
मेघा ग्रउद्रितासपत्नेमयस्वकरत्यन रेवनाहाश्चित्तेवे मनै विलपन्न ५ वैक्लव्ये कारणमाह कामानिति निवृत्तानामा
मिनीः रात्रीर्यान्तीः आयान्तीः आगामिनीः आकृष्टापेनना यस्य सः ६ न स्वर्गे पर्वलोके प्राप्तस्य बहुकालमुर्वशी मो

ऐलस्सम्राडिमां गाथामगायत बृहच्छ्रवाः उर्वशीविरहान्मुह्यन्निर्विण्णः शोकसंयमे ४ त्यक्त्वात्मानं
व्रजन्तीं तां नग्न उन्मत्तवन्नृपः विलपन्नन्वगाज्जाये घोरे तिष्ठेति विक्लवः ५ कामानतृप्तोऽनुजुषन्क्षुल्लकान्
वर्षयामिनीः न वेद यान्तीर्नायान्तीरुर्वश्याकृष्टचेतनः ६ ऐल उवाच अहो मे मोहविस्तारः का
मकश्मलचेतसः देव्या गृहीतकण्ठस्य नायुःखण्डा इमे स्मृताः ७ नाहं वेदाभिनिर्मुक्तः सूर्यो वाभ्युदितोऽमुया
मुषितो वर्षपूगानां बताहानि गतान्युत ८ अहो मे आत्मसंमोहो येनात्मा योषितां कृतः क्रीडामृगश्चक्र
वर्ती नरदेवशिखामणिः ९ सपरिच्छदमात्मानं हित्वा तृणमिवेश्वरं यान्तीं स्त्रियं चान्वगमं नग्न उन्मत्तवद्रु
दन् १० कुतस्तस्यानुभावः स्यात्तेज ईशत्वमेव वा योऽन्वगच्छं स्त्रियं यान्तीं खरवत्पादताडितः ११

गानं नरं निविश्य गाथया माहात्म्यादृशाभिः न ज्ञाताभिः अनुतापः प्रपंचयति अहो इति यतो मया इमे अहोरात्ररूपा
आयुःखंडा न स्मृताः ७ न वेद नाहमिति अभिनिर्मुक्तः मयि रममाणे अस्तंगतः अभ्युदितो वा सूर्य इति अमुया उ
र्वश्या वंचितः वनखंडे न अपि वर्षपूगानामपि गतान्यहानि न वेदेति ८ येन संमोहेन आत्मा देहः क्रीडामृगवद
धीनः ९ ननु प्रणयकुपितायाः अनुनयार्थमधीनता युक्तैव सत्यं न तु ज्ञातदासीत्याह सपरिच्छदं राज्यादिसहितं ये
श्वरं चक्रवर्तिनं तृणमिव त्यक्त्वा यान्तीमपि अनुगतमनुगतोऽस्मि १० किंच मम प्रभावो वा यदभिमानो वेत्याह कुतः तस्य
मेते जो बलं खरो यथा पादताडितोऽपि खरीमन्वगच्छति तद्वत् ११ ॥

॥ राम॰
८॰

एवंभूतस्य सर्वसाधनमित्याह व्यर्थं किमिति त्यागेन संन्यासेन विविक्तेन एकान्तसेवया मौनेन वाङ्नियमेन १२ अत्रा
त्मनः स्वात्मानं निंदति द्वाभ्यां स्वार्थस्य निश्रेयसस्य अकोविदमज्ञानं गोखरवत् गोखरा इवेति १३ अधरासवं सेवमा
नस्यात्मभूर्मनसिजः पुनरुद्भवत् १४ एवमष्टभिर्निर्वेदो निरूपितः इदानीं तस्य विवेकमाह द्वाभ्यां पुंश्चल्या
निश्चये भावः कर्मभिर्देवानिष्टाद्दुःखमेव प्राप्तोस्मि अतः परमेश्वरमेव भजेयमिति १५ परमेश्वरप्रसादं विना देवैक
पथिष्ठादपि देवीवाक्यान्मोहो न निवर्तत इत्याह बोधितस्यापीति देव्या उर्वश्या सूक्तवाक्येन यथार्थवचनेन पुरूरवो मा मृ
थाः मा नु त्वा वृका अशिवास उक्षन् न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता इत्यनेन १६
पूर्वं पुंश्चल्यापहृतं चित्तमित्यादिना तस्या अपकारो दर्शितः १६ इदानीं ममैवायमपराध इत्याह किमेतयेति तत्रः

किं विद्यया किं तपसा किं त्यागेन श्रुतेन वा किं विविक्तेन मौनेन स्त्रीभिर्यस्य मनो हृतं १२ स्वार्थस्याको
विदं धिङ्मां मूर्खं पंडितमानिनं योहमीश्वरतां प्राप्य स्त्रीभिर्गोखरवज्जितः १३ सेवतो वर्षपूगान्मे उ
र्वश्या अधरासवं न तृप्यत्यात्मभूः कामो वह्निराहुतिभिर्यथा १४ पुंश्चल्यापहृतं चित्तं को न्वन्यो मोचि
तुं प्रभुः आत्मारामेश्वरमृते भगवंतमधोक्षजं १५ बोधितस्यापि देव्या मे सूक्तवाक्येन दुर्मतेः मनोगतो
महामोहो नापयात्यजितात्मनः १६ किमेतया नोपकृतं रज्ज्वा वा सर्पचेतसः रज्जुस्वरूपाविदुषो योहं
यदजितेन्द्रियः १७ क्वायं मलीमसः कायो दौर्गन्ध्याद्यात्मकोशुचिः क्व गुणाः सौमनस्याद्या ह्यध्यासो विद्य
याकृतः १८ पित्रोः किं स्वं नु भार्यायाः स्वामिनोग्नेः श्वगृध्रयोः किमात्मनः किं सुहृदामिति यो नावसीयते

अस्याः केकामिनां पतयो किमपकृतं न किंचिदपि यथा रज्ज्वा स्वरूपाविदुषो रज्जुदृष्टः पुंसः सत्यां सर्पविकल्पनया विद्यया
नोपि रज्ज्वा किमपि नापकृतं तद्वत् यद्यस्मात् योहमेवंभूतः स एवाजितेन्द्रियत्वादपराधीत्यर्थः १७ नन्वनयापि सौन्द
र्यप्रेमादिः गुणाः संमोहमूलमित्याशंक्य तेपि स्वपरिकल्पिता एवेत्याह क्वेति द्वाभ्यां कायमिति मलीमसः अतिमला
नः स्वमनसा कृतमात्मानामिव गन्धसौकुमार्यादि सौमनस्यं शोभनमनोभवो वा १८ ममत्वमपि तस्मिन्परिकल्पि
तमेवेत्याह पित्रोः किं स्वं कायः जनकत्वात् उत वितर्कं भार्याया वा भोगप्रदत्वात् अथवानुपयुक्तमयोत स्वामिनस्त्व
त्वात् उक्तं स्वामिनो वाधीनत्वात् अग्नेर्वा तेषां तदाहुतित्वात् श्वगृध्रयोर्वा भक्ष्यत्वात् किं वात्मनस्तत्कृतशुभा ॥
शुभभोगित्वात् सुहृदां वा उपकारित्वात् एवं योनावसीयते १९ ॥

श्री॰ भा॰ पु॰ टी॰ ८८

नतत्कावलमिविक्लसत्क्वलत्वणानिर्हांतोयस्थितस्मिन्कायेकलेवरेप्रियत्वेनगृहीतीभिषंगमेवाह अहोइतिस्त्वनसंशोभ
नानासिके २० अनेगुणारोपेणरममाणाः माहशाः हृमिसमाहइत्याहत्वगादिसंस्कृतोनतस्यानेदेहेविंमूत्रा
दिसंहतोरमतांकृमीणांवा २१ यद्यपिवंबीभत्सितायवस्त्रियः अथापिनोपसजेतअवलोकनादिनापिसंगंनकु
र्यात् अर्थवित् विवेकीअत्रहेतुः विषयेति २२ ननुकथंचित्सीलितमपनादेरपिमनः क्षोभोदृश्यतेसत्यंसो
पिश्रवंदर्शनादिकंविनानभवतीत्याह अदृष्टादितिभावात्पदार्थान् भावोमनःक्षोभः अतःप्राणानिंद्रियाणि
असंप्रयुंजतः नियच्छतः [illegible] २३ इंद्रियैः कृताअविस्रब्धः अविश्वसनीयः माहशासविवेकि

नामस्मिन्नुलेवेस्मापेनतत्कनिहिविषज्ञाने अहासम्भइंस्त्रतंसंसास्मिंनेवसत्वेस्त्रियः २०
त्वङ्मांसरुधिरस्नायुमेदोमज्जास्थिसंहतौ विंमूत्रपूयेरमतांकृमीणांकियदंतरं २१ अथापिनोपसजेतस्त्रीषुस्त्रैणेषुचार्थवित् विषयेंद्रियसंयोगान्मनःक्षुभ्यतिनान्यथा २२ अदृष्टादश्रुताद्भावान्नभावउपजायते असंप्रयुंजतःप्राणान् शाम्यतिस्तिमितंमनः २३ तस्मात्संगोनकर्तव्यःस्त्रीषुस्त्रैणेषुचेंद्रियैः विदुषामप्यविस्रब्धःषड्वर्गःकिमुमादृशां २४ श्रीभगवानुवाच एवंप्रगायन्नृपदेवदेवःसउर्वशीलोकमथोविहाय आत्मानमात्मन्यवगम्यमांवैउपारमज्ज्ञानविधूतमोहः २५ ततोदुःसंगमुत्सृज्यसत्सुसज्जेतबुद्धिमान् संतएवास्यछिंदंतिमनोव्यासंगमुक्तिभिः २६ संतोनपेक्षामच्चित्ताःप्रशांताःसमदर्शिनः निर्ममानिरहंकारानिर्द्वंद्वानिष्परिग्रहाः २७ तेषुनित्यंमहाभागमहाभागेषुमत्कथाः संभवंतिहितानृणां २८ तायेशृण्वंतिगायंतिह्यनुमोदंतिचादृताः मत्पराःश्रद्दधानाश्चभक्तिंविंदंतितेमयि २९ भक्तिंलब्धवतःसाधोःकिमन्यदवशिष्यते मय्यनंतगुणेब्रह्मण्यानंदानुभवात्मनि ३० ॥

न

नो २४ फलितमाहत्राभ्यांएवमितिनृपेषुदेवेषुचदेव्यनीतितया २५ उक्तिभिर्हितोपदेशैरितितीर्थसेवादिसंग
दपिसत्संगःश्रेयानितिदर्शयति २६ सतांलक्षणमाह संतइतिविशेषणाष्टकस्यपूर्वस्येहेतुहेतुमद्भावः
२७ नचतेषूपदेशापेक्षापितत्केवलंततंनिधिरेवनाशयतीत्याहतेष्विति मत्कथाभिःश्रवणादिभिरेवमन्य

२५ श्रीभागवते एकादशस्कंधे टीकायां ८८

विभावसुमग्निंसेवमानस्ययथातेनशीतंतथाकर्मादिजाड्यंआगामिसंसारभयंउन्मूलनमज्जानंचनश्यतीत्यर्थः
३१ निमज्ज्योन्मज्जतांउच्चावचयोनीर्गच्छतांपरमायणंपरमाश्रयः ३२ किंचयथान्नमेवप्राणिनांजीवनमहमेवय
थाशरणंधर्मएवचयथाप्रेत्यपरलोकवित्तंतथासंतएकाकिसंसारपातादिभ्यभ्यतःशरणंशरणं ३३ किंचसं
तश्चक्षूंषिसम्यग्ज्ञानानिज्ञानानिप्रयच्छंतिसमुत्थितोपिबहिरर्कएकमेवचक्षुर्ददातीत्यर्थः ३४ अध्यायार्थमुपसं
हरतिवैतसेनइतिउत्तमभावेनउपावर्तनंप्रविष्टस्यवीतसनासीभावेशमायस्यततस्तुश्रेवेनसेनःपुरूरवाएवमुक्त
प्रकारेणोर्वश्यालोकस्यानादरेणलोकत्रयाहानिस्पृहस्ततोपिसत्संगादपिहेतोर्मुक्तसंगःसम्यगात्मारामोभूत्वायथे
ष्टंचचारेति ३५ इतिश्रीभावार्थदीपिकायामेकादशस्कंधेषड्विंशोऽध्यायः २६ सप्तविंशेक्रियायोगःसप्रपंचोनिरूप्यते

यथोपाश्रयमाणस्यभगवंतंविभावसुं शीतंभयंतमोप्येतिसाधून्संसेवतस्तथा ३१ निमज्ज्योन्मज्जतां
घोरेभवाब्धौपरमायणं संतोब्रह्मविदःशांतानौर्दृढेवाप्सुमज्जतां ३२ अन्नंहिप्राणिनांप्राणआर्ता
नांशरणंत्वहं धर्मोवित्तंनृणांप्रेत्यसंतोर्वाग्बिभ्यतोरणं ३३ संतोदिशंतिचक्षूंषिबहिरर्कःसमुत्थि
तः देवताबांधवाःसंतःसंतआत्माहमेवच ३४ वैतसेनस्ततोप्येवमुर्वश्यालोकनिस्पृहा मुक्त
संगोमहीमेतामात्मारामश्चचारह ३५ इतिश्रीभागवतेएकादशेउद्धवगीतेनामषड्विंशः २६
श्रीउद्धवउवाच क्रियायोगंसमाचक्ष्वभवदाराधनंप्रभो यस्मात्त्वांयेयथार्चंतिसात्वताःसात्वतर्षभ १
एतद्वदंतिमुनयोमुहुर्निःश्रेयसंनृणां नारदोभगवान्व्यासआचार्योंगिरसःसुतः २ निःसृतंते
मुखांभोजाद्यदाहभगवानजः पुत्रेभ्योभृगुमुख्येभ्योदेव्यैचभगवान्भवः ३ एतद्वैसर्ववर्णानामाश्र
माणांचसंमतं श्रेयसामुत्तमंमन्येस्त्रीशूद्राणांचमानद ४ एतत्कमलपत्राक्षकर्मबंधविमोच

कः सर्वकामान्विहायत्वत्सेवनःशोकःसमासतःरागाद्याकुलचित्तानांजनोसंगादिसंभवः इतिक्रमार्चनंभद्रम
नुस्मरतांत्वात्पृच्छति क्रियायोगमितिभवदाराधनरूपंपंचरात्रादिनिरूपणकरणादिस्थानादिप्रश्नःसर्वकारकानांमि
लितस्याविशिष्टत्वात् यथेतिकस्मिन्नधिष्ठानादौकेनप्रकारेणेतिप्रश्नः येयदधिकारिणःसात्वताभक्ताः १ अस्य
पुनर्विशेषतःप्रश्नकारणमाहएतदितिनिःश्रेयसकरंवदंति आंगिरसःसुतोबृहस्पतिः २ निःसृतं
त्वयोपदिष्टमित्यर्थः देव्यैपार्वत्यै ३ सर्ववर्णानांसर्वाश्रमिणां ४ विश्वेश्वराणांब्रह्मादीनामीश्वरः ५ ॥ ॥

कर्मकांडस्य पूजाविधानस्य नास्त्यंतो ग्रंथतः पारं चानुष्ठानतो यस्य तस्य ६ वैदिकः प्रधानमंत्रो वैदिकान्येवांगानि यस्मिन्कर्मणि स वैदिकः एवं तांत्रिकोऽपि मिश्र उभयात्मकः मखः पूजा ७ यदा त्रैवर्णिकाय जनं तदा विशेषमाह गर्भाष्टमैकादशद्वादशाद्यादिकाले स्वनिगमेन स्वाधिकारशास्त्रेण वेदेनोक्तं द्विजत्वमुपनयनं ८ अर्चायां प्रतिमादौ ९ स्नानविशेषमाह उभयैर्वैदिकैस्तांत्रिकैश्च मंत्रैः १० किं वा संध्योपासनादीनि कर्माणि वेदचोदितानि साकल्येन विहितानि नियम्यानि तैः सह मे पूजां कुर्यात् न तानि परित्यजेदित्यर्थः सम्यक्संकल्प ईश्वरविषय एव संकल्पो यस्य तथाभूतः सन् कर्मपावनीं कर्माणि निर्हारिणीं ११ अर्चाभेदानाह सार्द्धेन शैली शिलामयी लौही सुवर्णादिमयी लेप्या मृच्चंदनादिमयी हृदि पूजायां मनोमयी १२ प्रकर्षेण तिष्ठत्यस्यामिति प्रतिष्ठाप्रति

श्रीभगवानुवाच नह्यंतोनंतपारस्य कर्मकांडस्य चोद्धव संक्षिप्तं वर्णयिष्यामि यथावदनुपूर्वशः ६
वैदिकस्तांत्रिको मिश्र इति मे त्रिविधो मखः त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ७ यदा स्वनिगमेनोक्तं द्विजत्वं प्राप्य पूरुषः यथा यजेत मां भक्त्या श्रद्धया तन्निबोध मे ८ अर्चायां स्थंडिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे द्रव्येण भक्तियुक्तोऽर्चेत्स्वगुरुं माममायया ९ पूर्वं स्नानं प्रकुर्वीत धौतदंतोंऽगशुद्धये उभयैरपि च स्नानं मंत्रैर्मृद्ग्रहणादिना १० संध्योपास्त्यादिकर्माणि वेदेनाचोदितानि मे पूजां तैः कल्पयेत्सम्यक्संकल्पः कर्मपावनीं ११ शैली दारुमयी लौही लेप्या लेख्या च सैकती मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता १२ चलाचलेति द्विविधा प्रतिष्ठा जीवमंदिरं उद्वासावाहने न स्तः स्थिरायामुद्धवार्चने १३ अस्थिरायां विकल्पः स्यात्स्थंडिले तु भवेद्द्वयं स्नपनं त्वविलेप्यायामन्यत्र परिमार्जनं १४

ष्ठा प्रतिमैव जीवस्य भगवतो मंदिरं स्थानं प्रतिष्ठया कलान्यासेन भगवन्मंदिरं भवतीति प्रतिमाभेदेन विशेषमाह सार्द्धेन उद्वासो विसर्जनं १३ अस्थिरायां ध्रुवेन विकल्पः सालग्रामे न कुर्यात् सैकतायां कुर्यात् अन्यत्र कुर्याद्वा न वेति अविलेप्यायां मृन्मयलेख्यव्यतिरिक्तायां अन्यत्र विलेप्यायां च परिमार्जनमेव १४ इदानीं सकामनिष्कामभेदेन विशेषमाह द्रव्यैरिति प्रकर्षेण प्रसिद्धैः सुशोभनैः अमायिनो निष्कामस्य भक्तस्य तु यथालब्धैः नवेद्यनादिभिः सर्वाभावे नलम्भेनेन तु हृदि भावेन भावनया यद्वा हृदि चेन्मद्यागस्तदा भावेन मनोमयैर्द्रव्यैरित्यर्थः १५ ॥ ॥

अधिष्ठानभेदेन प्रधानोपचारमाह सार्धेन स्नानेति तत्त्वविन्यासः यथास्वस्थाने मङ्गप्रधानदेवतानां तत्त्वमंत्रैः स्थापनं
अभ्यर्हणमुपस्थानार्घ्यादिभिः सलिलतर्पणादिना यजनं १८ सर्वत्र साधारणमाह श्रद्धयेति १९ एवमधिकारादिव
स्याश्रयत्वादिदानीं पूजाप्रकारमाह शुचिरिति संभृताः संभाराः पूजासाधनानि येन प्रागग्रैर्दर्भैः यद्वा प्रागेव संभृतसं
भारः सन्नासीनः सम्यक्स्थानं तत्संभारार्थं वा रवा उदङ्दिङ्मुखः प्रागुदङ्मुखो वा आसीनः अर्चायां तु स्थिरायां सम्मु
खः अर्चाभिमुख एवोपविष्टः सन् २१ अंगन्यासं गुर्वादिनमस्कारपूर्वकं यथोपदेशं तस्मिन् कृतन्यासः कृतो मूलमंत्रन्या
सो यस्यां तां मदर्चां निर्माल्यापकर्षणादिना शोधयेत् कलशं कुम्भं प्रोक्षणीयं प्रोक्षणार्थमुदकपात्रं
उपसाधयेत् नैवेद्यपुष्पादि संस्कुर्यात् २२ तदद्भिः प्रोक्षणीयाद्भिर्देवयजनं देवपूजास्थानं २३ पाद्याद्यर्थं त्रीणि

स्नानालंकरणं प्रेष्ठमर्चायामेव तूद्धव स्थंडिले तत्त्वविन्यासो वह्नावाज्यप्लुतं हविः १८ सूर्ये चाभ्यर्हणं
प्रेष्ठं सलिले सलिलादिभिः श्रद्धयोपहृतं प्रेष्ठं भक्तेन मम वार्यपि १९ भूर्यप्यभक्तोपहृतं न मे तोषाय
कल्पते गंधो धूपः सुमनसो दीपोऽन्नाद्यं च किं पुनः २० शुचिः संभृतसंभारः प्राग्दर्भैः कल्पितासनः आसी
(प्रोक्षणीयं च यथा) सीनः प्रागुदग्वार्चेदर्चायां त्वथ सन्मुखः २१ कृतन्यासः कृतन्यासां मदर्चां पाणिनामृजे
त् कलशं प्रोक्षणीयं च यथावदुपसाधयेत् २२ तदद्भिर्देवयजनं द्रव्याण्यात्मानमेव च २३ प्रोक्ष्य पात्रा
णि त्रीण्यद्भिस्तैस्तैर्द्रव्यैश्च साधयेत् २४ पाद्यार्घाचमनीयार्थं त्रीणि पात्राणि दैशिकः हृदा शीर्ष्णाथ
शिखया गायत्र्या चाभिमंत्रयेत् २५ पिंडे वाय्वग्निसंशुद्धे हृत्पद्मस्थां परां मम अण्वीं जीवकलां ध्याये

पात्राणि कलशोदकैः पूरितानि तैस्तैर्द्रव्यैः साधयेत् तत्र पाद्याद्यद्रव्याणि पाद्ये श्यामाकदूर्वाब्जविष्णुक्रान्तादिरिष्यते
गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपाः दूर्वा चेति क्रमाद्द्रव्याण्यर्घ्यस्य कीर्तितानि जातीलवंगककोलैर्मतमाचमनीय
कमिति तानि च त्रीणि पात्राणि यथाक्रमं हृदयादिमंत्रैर्गायत्र्या च सर्वाण्यभिमंत्रयेत् दैशिकः पूजकः २५ तदनंतरं
पिंडे देहे वाय्वग्निसंशुद्धे इति वायुना शोषिते आधारस्थेनाग्निना दग्धे पुनर्ललाटस्थचंद्रमंडलस्रवेना
मृतमयो जातस्तस्मिन् हृत्पद्मस्थां परां श्रेष्ठां जीवकलां श्रीनारायणमूर्तिं ध्यायेत् कथंभूतां नादान्ते सिद्धभावितां प्र
णवस्याकारोकारमकारबिंदुनादाः पंचांशाः तत्र नादान्ते सिद्धैर्ध्यानिभिर्भाविता यथाहुः यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रति ॥ ॥
ष्ठितः तस्य प्रकृतिलीनस्य यः परः स महेश्वरः इति २५

त्वयात्मभूतया स्वेनैव भावेन चिंतितया अमृतमये पिंडे दीपेन प्रभया गृहमिव व्याप्ते सति तस्मिन्नेवावाह्य मानसैरुपचारैः संपूज्य तन्मयः सन्नर्चादिष्वावाह्य स्थाप्य तद्रूपास्थापयित्वा उभाभ्यामाप्रूजयेत् २४ कथं पूजयेत्तदाह पाद्येति द्वाभ्यां धर्मादिभिर्ममासनं २४ तत्र पद्मं च कल्पयेत्ताभ्यां वेदतंत्राभ्यां उभयसिद्धये मह्यं पाद्यादीनुपचारान् प्रकल्पयेदित्यन्वयः उपस्पर्श आचमनं अर्हणमर्घ्यं उभयसिद्धये वेदतंत्रोक्तभक्तिशक्तिप्राप्तये अर्थः धर्मज्ञानवैराग्यैश्वर्याण्यासनपर्यंकस्याग्नेयादिचतुष्कोणेषु पादाः अधर्मादीनि पूर्वादिदिक्षु गात्राणि मध्ये च कर्णिकायां त्रिगुणाः पद्मिकास्तत्र पूर्वादिदिक्षु मे एतामध्ये च विमलोत्कर्षिणी ज्ञाना क्रिया योगा प्रह्वी सत्येशानानुग्रहेति नव शक्तयः एवं यथापदेशं धर्मादिभिश्च नवभिश्च शक्तिभिश्चासनं कल्पयित्वेति कर्णिकायाः केसरैः तत्र स्वस्थपीठं स्लेस्रो

तयात्मभूतया पिंडे व्याप्ते संपूज्य तन्मयः आवाह्यार्चादिषु स्थाप्य न्यस्तांगं मां प्रपूजयेत् २४ पाद्योप
स्पर्शार्हणादीनुपचारान् प्रकल्पयेत् धर्मादिभिश्च नवभिः कल्पयित्वासनं मम २५ पद्ममष्टदलं तत्र कर्णि
काकेसरोज्ज्वलं उभाभ्यां वेदतंत्राभ्यां मह्यं तूभयसिद्धये २५ सुदर्शनं पांचजन्यं गदासीषुधनुर्हलान्
मुसलं कौस्तुभं मालां श्रीवत्सं चानुपूजयेत् २६ नंदं सुनंदं गरुडं प्रचंडं चंडमेव च महाबलं बलं चैव कु
मुदं कुमुदेक्षणं २७ दुर्गां विनायकं व्यासं विष्वक्सेनं गुरून्सुरान् स्वे स्वे स्थाने त्वभिमुखान्पूजयेत्प्रोक्ष
णादिभिः २८ चंदनोशीरकर्पूरकुंकुमागुरुवासितैः सलिलैः स्नापयेन्मंत्रैर्नित्यदा विभवे सति २९ स्वर्ण

त्तत्वमित्यर्थः २५ आयुधादिपूजामाह सुदर्शनमिति त्रिभिः तत्र स्वांगाभित्यावरणे पूजा सूचिता आसनेनैवं अंगावरणमित्युक्तं ततः सुदर्शनादि मुसलांतान्यायुधान्यष्टासु दिक्षु कौस्तुभमालाश्रीवत्सान् उरसि २६ नंदादीन्पार्षदान्सुपरिदद्गरुडं पुरतः २७ दुर्गादीनि कोणेषु गुरूनात्मनः सुरानिंद्रादिलोकपालान्पूर्वादिदिक्षु एवमेतान्देवस्याभिमुखान्प्रोक्षणादिभिः अर्घ्यादिभिः पूजयेदित्यर्थः २८ पाद्यादीनुपचारान्प्रकल्पयेदित्युक्तं तानेव वरणाविधिभिः प्रपंचयति षड्भिः चंदनेति २९ मंत्रानाह स्वर्णघर्मानुवाकः स्वर्णघर्मं परिवेद वेनमित्यादिर्महापुरुषविद्या जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन सुब्रह्मण्य नमस्तेस्तु महापुरुष पूर्वजेति पौरुषं सूक्तं सहस्रशीर्षेत्यादि नीराजनादिनाम्नानि सामानि इंद्रं नरो नेमधिता हवंत इत्यस्यामुत्पन्नानि गानानि आदिशब्दाद्रोहिणादीनि ३० ॥

वस्त्राद्युपचारैश्चालंकारलक्षणगुणविदग्नेवत्वेत्तिकपोलवद्वलादिषुलिखिताः पत्रभंगयः मङ्गलाः चेतश्चेमयथा
यथोचितमलंकुर्वन्नेतत्कार्यंसर्वसाधारणं २१ अन्यलक्षणगुणविधन्नेपाद्यमिति २२ नैवेद्येवेलक्षणगुणं
गुणविधन्नेगुडपायसंनिशष्कुल्यपिष्टकपक्वविशेषाः अपूपाः अपूपानांमंडकादीनांसमूहाः सूपाः व्यंजनानिसर्पि
विभवद्वतिशेषः २३ कालभेदेनगुणविद्धन्नेअभ्यंगेतिअभिषेचनेपंचामृतादिस्नपनेअग्रात्रयोंतिअन्नभोज्यस्याद्य
भक्ष्यपर्वणकाद्याद्यैअन्नहव्यमहंवाविभवेसनीति २४ फलभूयस्त्वार्थिनोग्रावपिष्टजोप्रकारमाह विधमा
सगृहोक्ताभ्यारेणमेखलाश्चत्रीनंगुलाहूत्स्नमात्राभवेत्जनाः सयोनिर्वेदिकानथापाद्दिनअग्निज्वलितमग्निंपरितःस
भूमेर्दिकत्रमेलयेत् २५ दर्भैः परिस्तीर्यपरितः प्रोक्षयेत् अन्वाधाय अन्वाधानसंज्ञकव्याहृतिभिः समित्प्रदेशादि

वस्त्रोपवीताभरणपत्रस्रग्गंधलेपनैः अलंकुर्वीतसप्रेममङ्गलाः मायथोचितं २६ पाद्यमाचमनीयं
वर्गंधस्वमनसोद्धताना धूपदीपौमहार्याणिदद्यान्नैअद्धयार्चकः २७ गुडपायससंयाविशष्कुल्यापू
पमोदकान् संयावादधिसूपांश्चनैवेद्यंसत्यकल्पयेत् २८ अभ्यंगमर्दनादर्शदंतधावाभिषेचनं अन्ना
भुञीतन्नृत्यानिपर्वणिसुकृतान्वहं २९ विधिनावह्निनेकुंडेमेखलागर्तवेदिभिः अग्निमादायपा
रितः समाहत्याणिनादिते ३० परिस्तीर्याथपर्युक्षेदन्वाधाययथाविधि प्रोक्षणमाधाद्रव्याणिशो ३१
धानग्नौभावयेत्तसं ३२ तप्तजांबूनदप्रख्यंशंखचक्रगदांबुजैः लसच्चतुर्भुजंशांतंपद्मकिंजल्कवाससं
स्फुरत्किरीटकटककटिसूत्रवरांगदं श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनं ३३ ध्यायन्नभ्यर्च्यदात
णिहविषाभिर्हुतानिच आस्याज्यभागावाघारौदत्वाचाज्यप्लुतंहविः ३४ ॥

रूपंकर्मकृत्वाप्रक्रमेतदेवद्रव्याणिहोमोपयोगीन्यासाद्यनिधायप्रोक्षणपात्रोदकेनप्रोक्षणाग्नौसध्यायेत्
३५ पूर्वाभिरुक्तासंततः शोभमानाश्चत्वारोभुजायस्यतं स्फुरंतिकिरीटादीनियस्यतं ३६ हविषाहुतेनाभिहुत्वा
निसंसिक्तानिदारूणिशुष्कसमिधः ससिक्तानिदारूणिशुष्कसमिधः प्रास्यप्रदीप्यआगारोतइध्मसंज्ञकोयोगेनाय
वमाज्यभागौचद्वौआहुतीस्तेनतार्थः ततआघारौप्रजापतयेस्वाहाइंद्रायस्वाहेतिवायव्यदक्षिणपरि
यसंधिमारभ्याग्निमध्यादापश्चिमंउत्तरपूर्वाज्यभागौअग्नयेस्वाहासोमायस्वाहेत्येवंहोमक्रमो ३७ ॥ ॥

श्री॰ मूलमंत्राह्वानद्वारेणानयाद्यावाहनकेवास्मिंल्लिनंतु रुषस्कन्नेनवध्रुवदानंततः स्नानवमाङ्गनिग्रहणेनैवार्घ्यं गुरुषस्
भा॰पु॰ क्रेनारायणपेदेसमवमूलमंत्रसलैनेवप्रत्यवमवदानंततो होमइतिमंत्रैस्वाहान्तैनैर्नामभिर्द्वैर्यथान्यायं पूजाक्रमेणाव
टी॰ शिष्टसमिद्भिःहुत्वास्वाहेत्यवस्थाष्टिहुत्वेनैवहुत्वा ४॰ ततोवह्निस्थंभगवंतमभ्यर्च्यानमस्कृत्यपार्षदेभ्योनेदादिभ्यो
८४ ष्टस्वादिदिक्षुबलिंहरेत् ततः पूजास्थानमागत्यदेवस्याग्रेसम्यगुपविश्ययथाशक्तिः मूलमंत्रंजपेत् ४(ततउभय
त्रभागवतोभोजनसीमासिद्ध्यात्ताश्राचमनेहृत्वाडच्छेषविष्वक्सेनायकल्पयित्वानंतरंपंजयायापश्चात्स्वयंभुंजीततततः

मुखवासंमूलमंत्रेणाघोरेश्राचावदानंततः धर्मादिभ्योयथान्यायंमंत्रैःस्विष्टकृतंहुत्वा ४॰ अभ्यर्च्याथ
नमस्कृत्यपार्षदेभ्योबलिंहरेत् मूलमंत्रंजपेद्ब्रह्मस्मरन्नारायणात्मके ४(दत्त्वाचमनमुच्छेषंवि
ष्वक्सेनायकल्पयेत् मुखवासंसुरभिमत्ताम्बूलाद्यमथार्हयेत् ४२ उपगायन्गृणन्नृत्यन्कर्माण्य
भिनयन्मम मत्कथाःश्रावयन्शृण्वन्मुहूर्तंक्षणिकोभवेत् ४३ स्तवैरुच्चावचैःस्तोत्रैःपौराणैः
प्राकृतैरपि स्तुत्वाप्रसीदभगवन्नितिवंदेतदंडवत् ४४ शिरोमत्पादयोःकृत्वाबाहुभ्यांचपरस्परं
प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ४५ ॥

सुरभिमत् ताम्बूलाद्यं मुखवासं सुगन्धमथानंतरं पितृनर्हयेत् सपर्यांजलिनापूजयेत् ४२ अभिनयन्स्तत्स्विन्ना
विष्कुर्वन् क्षणिकः वेयग्रंपरित्यज्यलब्धावसरोभवेत् ४३ स्तवस्तोत्राणांभेदेदर्शयतिपौराणैः प्राकृतैः इति ६
४४ कृत्वाप्रणामेदित्युपदेशायमाहु शिरइतिबाहुभ्यांदक्षिणोत्तराभ्यांपरस्परंमत्पादोपादाश्रहीत्वायर ॥ रामः
द्वाः पूजनः परस्परंनिबद्धाभ्यांकृत्वाप्रपथइवप्रपन्नमिमादिविज्ञाप्यचप्रणमेत् ४५ ॥ ८४

ततः प्रोक्षाग्रहणात्पूर्वं कं वैकाल्पिकोद्वासनप्रकारमाह इत्यनयैव प्रार्थनया शेषां निर्माल्यं मया दत्तां ध्यात्वा शिर
साधाय धृत्वा उद्वासयेत् नहि शक्तिमायोपशमास्तज्ज्योतिस्तस्मिन्नः हृत्पद्मस्तज्ज्योतिष्यावोद्वासनीयं ४८ यत्नेष्वपि ह्या
ने किं प्रकृतमित्यपेक्षायामाह अर्चादिष्विति यदा यत्र श्रद्धानदानेऽपि ह्यानेऽप्रत्यत्नेऽप्रत्यत्ने कृतः यतः सर्वभूतेषि
ति ४९ उभयतः इहामुत्र च ५० समर्थयन्नाह मदर्चामिति त्रिभिः पुष्पोद्यानानि च कारयेत् पूजायात्रोत्सवौ

इति शेषां मया दत्तां शिरस्याधाय सादरं उद्वासयेच्चेदुद्वास्यं ज्योतिर्ज्योतिषि तत्पुनः ४८ अर्चादिषु यदा
यत्र श्रद्धा मां तत्र चार्चयेत् सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ४९ एवं क्रियायोगपथैः पुमान्वैदिकता
न्त्रिकैः अर्चन्नुभयतः सिद्धिं मत्तो विन्दत्यभीप्सितां ५० मदर्चां संप्रतिष्ठाप्य
मन्दिरं कारयेद्दृढं पुष्पोद्यानानि रम्याणि पूजा
यात्रोत्सवाश्रितां ५१ पूजादीनां
प्रवाहार्थं महापर्वस्व
--न्वहं क्षेत्रा
पणपुरग्रामान्
दत्वा मत्सार्ष्टि
तामियात्
५२

श्रितान् पूजा यत्र हि यात्रा विशिष्टे पर्वणि वहुजनसमागमः उत्सवनादि महोत्सवः तदाश्रितान्देवादीन्मद्दत्तात्पूजा
यात्रोत्सवाश्रितानि तस्य विवरणं पूजादीनां प्रवाहार्थं सततानुवृत्त्यर्थं मत्सार्ष्टितां मत्समानैश्वर्यं श्रतिष्ठादीनां ५२

श्री॰
भा॰ ए॰
टी॰
८५

प्रतिष्ठादीनां व्यस्तसमस्तानां फलमाह प्रतिष्ठयेति मत्साम्यं मया साम्यमित्यर्थः ५१ सकामं प्रत्युक्त्वाऽहैतुकः
भक्तं प्रत्याह मामेवेति अहैतुकभक्तियोग एष य एवं भक्तिवति भक्तियोगमिति ५२ दातृफलमुक्त्वाऽपहर्तारं निंदति
यस्त्विति विड्भुक् विष्ठाभोजी कृमिः ५३ यत्तु यत्फलं तेनैव तेषामप्याह कर्त्तुरिति सारथेः सहकारिणः हेतोः प्र
योजकस्यानुमोदितुश्चैतत्फलमित्यन्वयः कुतः यतः कर्मणामेते भागिनः भागार्हाः तत्रापि विशेषमाह भू
यसीति कर्मणा सारथ्यादौ च भूयः अधिकफलमिति पयः पत्रादिमात्रेणापि पूजितो यः परपदं प्रागेव दिशतीति प्रीतः स्व

प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयं पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ५१ मामेव नैरपे
क्ष्येण भक्तियोगेन विंदति भक्तियोगं स लभते एवं यः पूजयेत मां ५२ यः स्वदत्तां परैर्दत्तां हरेत सुरविप्र
योः वृत्तिं स जायते विड्भुग्वर्षाणामयुतायुतम् ५३ कर्तुश्च सारथेर्हेतोरनुमोदितुरेव च कर्मणां
भागिनः प्रेत्य भूयो भूयसि तत्फलं ५४ इति श्रीभागवते एकादशस्कंधे सप्तविंशोऽध्यायः २७ श्रीभग
वानुवाच परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत् विश्वमेकात्मकं पश्यन्प्रकृत्या पुरुषेण च १ पर
स्वभावकर्माणि यः प्रशंसति निंदति स आशु भ्रश्यते स्वार्थादसत्यभिनिवेशतः २ ॥ ॥

कृत्स्नशरणं मम ५४ इति श्रीभावार्थदीपिकायामेकादशे सप्तविंशः २७ अष्टाविंशेऽन्वयः पूर्वविस्तरेणोपवर्णितः ज्ञाना
योगयुतः सांख्ये समास इति निरूप्यते इदानीं इति विस्तरेणोक्तं ज्ञानयोगं संक्षेपेण वक्तुमाह परेषां स्वभावान् शा
न्तघोरादीन् कर्माणि च न प्रशंसेत् विश्वमिति १ विक्षेपदोषमाह परेति स्वार्थात् ज्ञाननिष्ठालक्षणात् असत ॥ ॥ ॥
नि मिथ्याभूते देहादावभिनिवेशात् २ ॥

राम॰
८५

श्रेणामेवदृष्टांततोदर्शयतितैजसेमहंकारकार्ये इंद्रियगणेनिद्रयाभिभूतेसतिपिंडस्थोजीवःकेवलेमोत्रेणमायांस
प्नरूपांप्राप्नोतिततोमनसःप्रलीनेसतिःनष्टचेतनःसन्मृत्युंवसुप्तत्वात्मसुषुप्तिंवप्राप्नोति यथाचइहदेवनानार्थदृक्देहेन्द्रा
भिनिवेशीविक्षेपंलयंवप्राप्नोतीति ३ द्वैतासत्यतयास्तुतिनिंदयोर्विषयत्वंप्रपंचयन्निःसार्थवाह् किंभद्रमिति अव
स्तुनोद्वैतस्यमध्येकिंभद्रंकिंवाअभद्रंकियत्कियद्वाभद्रमित्यर्थः अवस्तुत्वमेवाहवाचेतिवाह्योपलक्षणंवा
चउदितंउक्तंवचनादिभिरुपहृतमर्पणंतदनृतमिति ४ ननुएवंसतिदेहादिभावानामसत्त्वात्कथंभयहेतुत्वंतत्रसदृष्टा
न्तमाह छायेतिछायाप्रतिबिंबंप्रत्याह्वयःप्रतिध्वनिःआभासाःशुक्तिरजतादिःएतेयथासंतोप्यर्थकारिणोभवंति अमृत्युतःमृत्युपर्य

तैजसेनिद्रयापन्नेपिंडस्थोनष्टचेतनः मायांप्राप्नोतिमृत्युंवातद्वन्नानार्थदृक्पुमान् ३ किंभद्रंकिमभद्रंवाद्वैतस्या
वस्तुनःकियत् वाचोदितंतदनृतंमनसाध्यातमेवच ४ छायाप्रत्याह्वयाभासाह्यसंतोप्यर्थकारिणः एवंदे
हादयोभावायच्छंत्यामृत्युतोभयं ५ आत्मैवतदिदंविश्वंसृज्यतेसृजतिप्रभुः त्रायतेत्रातिविश्वात्माह्रियतेहर
तीश्वरः ६ तस्मान्नह्यात्मनोन्यस्मादन्योभावोनिरूपितः निरूपितेयंत्रिविधानिर्मूलाभातिरात्मनि ७ इदंगुण
मयंविद्धित्रिविधंमाययाकृतं ७ एतद्विद्वान्मदुदितंज्ञानविज्ञाननैपुणं ननिंदतिनचस्तौतिलोकेचरतिसूर्यव
त् ८ प्रत्यक्षेणानुमानेननिगमेनात्मसंविदा आद्यंतवदसज्ज्ञात्वानिःसंगोविचरेदिह ९ उद्धवउवाच नै
वात्मनोनदेहस्यसंसृतिर्द्रष्टृदृश्ययोः अनात्मस्वदृशोरीशकस्यस्यादुपलभ्यते १० ॥

नापणयथाछायादिभ्यःभयं यावत्तेवलीयतेतावदनर्थंतामित्यर्थः ५ ननुसृष्ट्यादिक्रियाभिर्देहतनिरूपितेकथंमसत्त्वंसात्तत्राह
आत्मैवेतिद्वाभ्यां त्रायतेपाल्यतेत्रातिपालयति ६ तस्मात्सृज्यादिव्यतिरिक्तान् त्रिविधाध्यात्मादिरूपाभातिःप्रतीतिः
ननुकथंनिर्मूलातत्राहइदंगुणमयमिति ७ ज्ञानविज्ञानयोर्नैपुण्यंनिष्ठाप्रसिद्धवत्सर्वमाध्रुवा ८ एतन्निष्ठाप्राप्त्युपायमाहप्रत्य
क्षेणेति परात्पनवद्दृष्टंतदसदितिज्ञात्वानिःसंगोविचरेत् आद्यंतवत्त्वंप्रमाणत्रयेणप्रत्यक्षेणाद्यनुमानेनसावयवत्वेनदृ
ष्टपृथिव्यादिनिगमेनअग्रेसत्तमाकाशादि आत्मसंविदाज्ञानभावनसर्वद्रष्टृरूपमाद्यंतवत्प्रसुप्तिज्ञातेति ९ ननुयद्यात्मसं
विदासर्वद्रष्टृरूपमसदितिज्ञातंतर्हिआत्माअप्रकाशोदेहादिर्हतत्रचजडइतिद्वयोःसंसारोनतथाचसंसारप्रतिभासोनघटेतेतिविवा
दयतिअथवादिविपर्ययेवति अनात्मसदृशोजडजडयोः अस्वद्रष्टृदृश्यपयोर्मध्येकस्यसंसारःस्यादुपलभ्यते

= ५ मू

श्रीः
भा॰ए॰
टी॰
८८

एतत्सर्वंपश्यतिआत्मेतिअत्राव्ययत्वादिपंचविशेषणैर्नोत्पत्तिनाशरागादिगुणाश्रयत्वपरिच्छेदनाशसंभवंदर्शयतिहेतुहेतुहेतु
मत्वेनयथोक्तश्रुद्विनजरः अयंभावः यथैवाग्निर्दारुणाभेदेनाप्युपलभ्योपिदारुप्रकाश्यमेवअग्निस्तुप्रकाशकः तथा देहा
त्मनोरपि दृश्यत इति न संसृतिस्तयोरन्यतरस्यापिघटतेइति ११ सत्यंतथाप्युभयोरेवमविवेकएवसंसारलक्षणमित्याहपंचभिः
यावदितितत्रिकर्षणंसंबंधः नवसंगस्यकुतःसंबंधस्तत्राहअविवेकेनःअज्ञानकृतइत्यर्थः नन्वस्वप्रकाशस्यकथम
ज्ञानतः संसारस्तत्राहअपार्थोपिकेवलंफलवाननुस्फूर्तिः नतुतत्त्वतोस्तीत्यर्थः १२ नन्वसतोदेहादेःकुतःसंसारस्फूर्ति
हेतुत्वमपिनतत्राहअर्थेहीतिस्वप्नात्मनः १३ ननुकथंविज्ञानतोविषयस्फूर्तिर्जीवन्मुक्तस्यापिदृश्यतेत्यतिमोहप्रसंगः

आत्माव्ययोगुणःशुद्धःस्वयंज्योतिरनावृतः अग्निवद्दारुवदचिद्देहःकस्येहसंसृतिः ॥ श्रीभगवानुवाच
यावद्देहेंद्रियप्राणैरात्मनःसंनिकर्षणं संसारःफलवांस्तावदपार्थोप्यविवेकिनः १२ अर्थेह्यविद्यमाने
पिसंसृतिर्नविवर्तते ध्यायतोविषयानस्यस्वप्नेनर्थागमोयथा १३ यथाह्यप्रतिबुद्धस्यप्रस्वापोबह्वनर्थभृ
त् सएवप्रतिबुद्धस्यनवैमोहायकल्पते १४ शोकहर्षभयक्रोधलोभमोहस्पृहादयः अहंकारस्यदृश्यंते
जन्ममृत्युश्चनात्मनः १५ देहेंद्रियप्राणमनोभिमानोजीवोंतरात्मागुणकर्ममूर्तिः सूत्रंमहानित्युरुधेवगी
तःसंसारआधावतिकालतंत्रः १६ ॥

स्यात्तत्राहयथाहीतिप्रस्वापःबह्वनर्थान्बिभर्तिप्राप्नोतीतितथा १४ अहंकारस्यैवतल्लक्षणोदेहादिसंकर्षणात्संसारलंब
नमित्यन्वयः ननुप्रतिबोधमात्रेणास्यधर्माणांशोकादीनांकथंनिवृत्तिस्तत्रव्यतिरेकाभावंदर्शयतिशोकेतिस्पृहा
दीनेषामहंधर्मत्वानअहंकारस्यैवेतिव्युत्पन्नेसुप्तस्येतिप्रतीत्यभावात्दर्पणस्थस्यमलत्वादीनांमुखशवादिवत्तद्धर्मत्वानुप
पत्तेरितिभावः १५ ननुयद्यहंकारस्यसंसारस्तस्यसंसारस्तर्हिमुक्तिरपितस्यैवेतिमुक्तावहंकारावशेषःस्यात्सत्यमेततथा
हदेहेतिदेहादिष्वभिमानोयस्यसःआत्मैवतेषामंतर्हितोजीवःअतएवगुणकर्ममयीमूर्तिर्यस्यसःएवंसत्त्वाद्युपाधि
भिरुरुधेवबहुधाविशब्दैर्गीतःसंसारोपरमेश्वराधीनः
सर्वतोधावतिअतोनायंदोषइति
भावः १६ ॥

तदेवमहंकारकृतं बंधमुक्त्यादि इदानीं ज्ञानेन तन्निवृत्तौ मुक्तिरित्याह अमूलमिति वस्तुतो मूलस्य अत्यन्तमज्ञानस्य बहुभी रूपैर
पितं प्रकाशितं मे: ज्ञानं कं तत्त्वमिति वा किं तदाह मनः इति मन आदीनां दृढः बद्धा मन आदिभिः क्रियते इति कर्म अहंकार
णे गुरूपासनया निशितेन ज्ञानासिना छिन्नाः १७ तदेवं ज्ञानं स्वरूपसाधनफलैः निरूपयति ज्ञानमिति विवेको ज्ञानं तत्र
साधनत्वात् निगमो वेदः तपः स्वधर्मः प्रत्यक्षं स्वानुभवः ऐतिह्यं गुरूपदेशः अनुमानं तर्कः फलं ज्ञानस्वरूपमाह आद्यन्त
योर्यदेवासीज्जगतः मध्येपि तदेव केवलं न तु जगदिति किं ततः कालः कलयति प्रकाशयति यः तथा हेतुः कारणं च यत् तदे
व एतदुक्तं भवति यदस्य विश्वस्य कारणं प्रकाशकं सत् तन्मात्रमेव तत्त्वं ततः पृथगिव विश्वस्य फलं निगमादिसा
धनैर्जायते यो विवेकः तज्ज्ञानमिति १८ तद्विज्ञानावेदयति हारालम्बनस्यापि विश्वस्य कारणमात्रात्मकत्वं सदृष्टान्तमाह

अमूलमेतद्बहुरूपरूपितं मनोवचःप्राणशरीरकर्म ज्ञानासिनोपासनया शितेन च्छित्वा मुनिर्गां विचरत्यतृष्णः
१७ ज्ञानं विवेको निगमस्तपश्च प्रत्यक्षमैतिह्यमथानुमानं आद्यन्तयोरस्य यदेव केवलं कालश्च हेतुश्च तदेव म
ध्ये १८ यथा हिरण्यं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहम.
स्य तद्वत् १९ विज्ञानमेतत्त्रियवस्थमङ्ग गुणत्रयं कारणकार्यकर्तृ समन्वयेन व्यतिरेकतश्च येनैव तुर्येण तदे
व सत्यम् २० ॥

यथेति सुकृतं सुघटं कुण्डलादिरूपेणाविरचितं यद्धिरण्यं कीदृशं हिरण्मयस्य कुण्डलादेरुपपत्तेः पुरस्तात् नाशाच्च यदस्ति
कटककुण्डलमित्यादिना नाव्यपदेशैर्व्यवहारप्राप्यमाणमपि तदेव यथा तद्वदस्य विश्वस्य कारणभूतो हमेव नानाव्यवहा
रालम्बनेन तत्त्वमतः इत्यथश्चिदमिति १९ तदेवं कार्यस्य कारणात्मना प्रकाशस्य प्रकाशात्मना माह विज्ञानमिति त्रि
यदवस्थ्य कारणस्य त्र्यवस्थाः जाग्रदादयो येन जाग्रदादिष्ववस्थास्वयं हि ज्ञानमेतत् तदेव सत्याकारणभूतेन च गुणत्रयं यच्च कारण
कार्यकर्तृकारणमध्यात्मकार्यमधिभूतं कर्तृ अधिदैवं एवं गुणत्रयकार्यभूतं त्रिविधं जगदेतत् येन तुर्येण सामान्यज्ञानमा
त्रेण समन्वयेन अनुवृत्ति येनानुगतं प्रकाशते तदस्यार्थः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति न्यायात् सुषु
प्त्यवस्थायां समाधौ च मनसो येन मनो निरुद्धं विद्यादिष्कृतः तत्र ज्ञानविशेष व्यतिरेकेण न तुर्येणामोपलम्भात् इत्यनेन व्यतिरे
केण च समाधावपि यदस्ति तदेव सत्यमिति २० ॥

श्री॰
भा॰ प॰
टी॰
६२

एवं कालत्रयेऽप्यव्यभिचारिणः सत्त्वगुणस्याव्यभिचारिणा सत्त्वरूपेणात्मा सह नयदिति मध्ये वर्तनं यथा कस्मिंश्चित्कार्ये व्यपदेशमात्रं
कृतः यतः यद्यन्येन रूपेणात्मनः प्रसिद्धं प्रकाशितं वर्तनं तदेव कारणप्रकाशकं तावन्मात्रं स्यात्तदस्य गतिमिति मनीषा
भुद्धिः वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेः कारणप्रकाशकव्यतिरेकेणाव-
कार्यस्य प्रकाशस्यानुपलंभादिति भावः ॥ एवं सामान्यतः कार्यप्रकाशरूपेण कारणप्रकाशकाभावाद्भेदमुक्त्वाथ
प्रत्येकेन तु मयथविवेक सर्वकं प्रपंचस्य ब्रह्माभेदमाह यद्यविद्यमान इति कोऽयं वैकारिकः विकारसमूहः सप्तधातुविधि
मात्मा राजसः सर्गः तस्मादहंकारस्तत्कार्यभूतस्य सर्वः प्रभासते यद्ब्रह्मप्रकाशरूपेणास्य सर्वः प्रमितस्य स्वतः सिद्धं तत्त्व
मादाय तामसः सर्गः तस्मादहंकारात्प्रवृत्तस्य कारणादिंद्रियाणि वा तन्मात्राणि वा मनस्त्व देवानामप्युपल
ब्धिमित्यर्थः ज्योतिष्प्रकाशकमित्यर्थः अतः कारणादिंद्रियाणि वात्मयोस्तन्मात्राणि वा मनस्त्व देवानामप्युपल

प्रतेः प्रसिद्धं चपरेणायद्यत्तदेव स्यादिति मे मनीषा ॥
न यत्र स्वतन्त्र स्यात्तु तत्र पचपणा मध्ये वर्तनं व्यपदेशमात्रं यो
यदि विद्यमानो प्रभासते यो वैकारिको राजसस प्रसर्गः ब्रह्म स्वयं ज्योतिरतो विभाति ब्रह्मेंद्रियार्थात्मविकारचि
ते ॥ एवं स्फुरं ब्रह्म विवेकहेतुभिः परापवादेन विशारदेन छित्त्वात्मसंदेहमुपारमेत स्वानंदतुष्टोऽखि
लकामुकेभ्यः ॥ नात्मा वपुः पार्थिवमिंद्रियाणि देवा ह्यसुर्वायुर्जलं हुताशः मनोऽन्नमात्रं धिषणा च सत्त्वम
हंकृतिः खं क्षितिरर्थसाम्यम् ॥
तत्त्वांविकारः एवं भूतानि पंचविंशतिं ब्रह्मैव भातीति ॥ उपसंहरति एवं निगमः तपः प्रमाणैः त्वानुमानैः स्फुरं यथा भव
ति तथा ब्रह्म विवेकहेतुभिः परापवादेन परवादेन तनिराकरणेन विशारदेन निपुणेन गुरुणा
निमित्तभूतेन छित्त्वा आत्मविषयं संदेहं छित्त्वा स्वानंदतुष्टः सर्वेभ्यः इंद्रियादिभ्य उपारमेत निःसंगो भवेत् ॥ ए
ताप्यादेः प्रपंचरूपनिवृत्तयात्मा न भवति पार्थिवदेहस्य वपुरात्मा न भवति पार्थिवत्वात् घटवत् एवमिंद्रियाणि तदधिष्ठात्रो देवाश्च मनः धिषणा बुद्धिः मनो
चित्तं अहंकृतिः इत्येते नात्मा भवंतीत्यर्थः अन्नमात्रं मनो यस्मादन्नात् शरीरवत् वायुर्जलं वह्निर्हुताशः तेजः खं क्षितिरितिपंच
भूतानि प्रत्यर्थः शब्दादयः साम्यं प्रकृतिश्च नात्मानः दृश्यत्वात् घटवदिति यद्वा दिश्यशब्देनावमानांतराणि सर्वाणि निरस्य
यत्रेंद्रियाणि आत्मा न भवंति तेषां समस्तानां दीपवत्कारणत्वादात्मनो वत्
प्राणास्त्वबाह्यवादाय वायुवदिति ॥ २४ ॥ राम ॥

एवं विवेकज्ञानवतो मुक्तस्येन्द्रियादिकृतो गुणदोषसंबंधःस्याह समाहितैरिति मत्सु विविक्तधाम्नः मम सु विविक्तं धाम
स्वरूपं येन तस्य प्रकाशकस्य गुणदोषा न भवंतीति रविदृष्टांतेनोक्तं २५ असंगत्वेनाबाधितस्यानेकोपि गुणदोषस्याका
शादृष्टांतेनाह यथेति वाय्वादीनां शोषणदाहनक्लेदनरजोधूसरत्वादिभिर्गतागतैरागमापायिभिः ऋतुगुणैः शीतोष्णा॰
दिभिर्वा यथा नभः एवं अहंकारात्परमक्षरं अहंमतेः संसृतिहेतुभिर्न सज्जते यद्वा अहंकारस्य संसृतिहेतुभिरिति २६ मुक्तवदसम्य
ग्ज्ञानी न यथेष्टमाचरेदित्याह द्वाभ्यां न तथापीति गुणेषु विषयेषु रजो रागः मनसः कषाय इति निरस्यतामाह २७ एतदेव
दृष्टांतेनोपपादयति यथेति नृणामामयो रोगः असाधु सम्यग्यथा भवति तथापक्वकषायकर्म अदग्धाः कषायाः रागाद

समाहितैः कः करणैर्गुणात्मभिर्गुणो भवेन्मत्सुविविक्तधाम्नः विक्षिप्यमाणैरुत किं नु दूषणं घनैरुपेतैर्विगतैः
रवेः किं २५ यथा नभो वाय्वनलांबुभूगुणैर्गतागतैर्वर्त्तुगुणैर्न सज्जते तथाक्षरं सत्वरजस्तमोमलैः अहंमतेः
संसृतिहेतुभिः परं २६ तथापि संगः परिवर्जनीयो गुणेषु मायारचितेषु तावत् मद्भक्तियोगेन दृढेन यावद्र
जो निरस्येत मनःकषायः २७ यथामयोसाधुचिकित्सितो नृणां पुनः पुनः संतुदति प्ररोहंश्च एवं मनोपक्वक
षायकर्म कुयोगिनं विध्यति सर्वसंगं २८ कुयोगिनो ये विहितांतरायैर्मनुष्यभूतैस्त्रिदशोपसृष्टैः ते प्राक्तना
भ्यासबलेन भूयो युंजंति योगं न तु कर्मतंत्रं २९ करोति कर्म क्रियते च जंतुः केनाप्यसौ चोदित आनिपातात् न त
त्र विद्वान्प्रकृतौ स्थितोपि निवृत्ततृष्णः स्वसुखानुभूत्या ३० ॥

यः जन्ममूलानि कर्माणि तैर्यस्मिंस्तत्र पुनस्तत एव सर्वसंगं देहपुत्रादिषु सज्जमानं मनः कुयोगिनमपक्वज्ञानं विध्यति भ्रंशय
ति २८ ननु कथंचिद्विषयसंगाद्योगभ्रष्टः स्यात्तर्हि सोपायेन योगमार्गेणानत आह कुयोगिन मनुष्यभूतैर्बंधुशिष्या॰
दिरूपैस्त्रिदशैरुपसृष्टैः प्रवर्तितैस्तथाविधप्रकृतिः यस्मात्तदेषां न प्रियं यदेव मनुष्या विदुरिति भूयो जन्मांतरेन तु कर्मविस्तारं
२९ ननु विदुषामपि सर्वथा कर्मत्यागो दुर्घट इति पुनः संसारः स्यात् अत आह करोतीति विदुषो मोक्षं जंतुर्देह एव भोजनादि
कर्म करोति क्रियते विक्रियते च तेन कर्मणा वृद्ध्याद्यपि प्राप्नोतीत्यर्थः केनापि संस्कारादिना चोदितः सन्नानिपातात् मर
णपर्यंतं स तु विद्वान्प्रकृतौ देहे स्थितोपि न तत्कर्मणा न विक्रियते निरहंकारत्वात् हर्षविषादादिभिः संसारं न प्राप्नोति
३०

श्री:
भा॰पु॰
टी॰
८८

किंचप्राक्तनानांदेहादिकर्मभिर्विकारःशंकयतोदेहमध्यासेनपश्यतीत्याह तिष्ठन्तमिति उत्तानंशयानंस्वभावशान्तमन्यदपि
दर्शनादिरंहमानंकुर्वंतमात्मानंदेहे ३० नन्विंद्रियवतःसर्वथाकथमदर्शनंसंभवतितत्राह यद्यपिपश्यतियद्यप्यवहृश्यंतथाना।
मिंद्रियार्थमर्थंपश्यतितथापिनानानुमानेनमिथ्यात्वसमवदितनुमानेनविरुद्धंबाधितंसदन्यदात्मव्यतिरिक्तंमनीषीवस्तुत।
यानमन्यतेस्वाप्नंयथोत्थायपूर्वसंस्कारमात्रेणतत्स्वाप्नविषयस्फुरणंतत एवस्वयमेवतिरोभवन्तंयथातद्वत् ३१ तदेवमात्मान
विक्रियत्वमुक्तंतेनतदज्ञानजंदुःखमात्मनोमाभूदित्याशयेन प्रागुक्तं जीवमुक्तावस्थायांयोगिनोनामात्मनोविक्रियाभावः
विक्रियत्वमुक्तेनतत्त्वेनतद्गुणवत्तंतुजावस्थायांउपगम्यमानत्वात्मुक्तावस्थायांचपृथगात्मानंमनस्त्रीहृयोवव्यानेनब्रीहिभावं
यागोत्कृष्टभावेनशृत्तमाणातिक्रियतेतथाहपूर्वमितिविधावस्थायांगुणाःकर्मभिश्चचित्रमज्ञानकार्यंदेहेन्द्रियादिलक्षणं

स्वभावमन्यत्किमपीहमानमात्मानमात्मस्थमतिर्नवेद ३१
तिष्ठन्तमासीनमुतव्रजन्तंशयानमुक्षन्तमदन्तमन्नं
यदिस्मपश्यत्यसदिन्द्रियार्थंनानानुमानेनविरुद्धमन्यत् नमन्यतेवस्तुतयामनीषीस्वाप्नंयथोत्थायतिरोदधा
ने ३२ पूर्वंगृहीतंगुणकर्मचित्रमज्ञानमात्मन्यविविक्तमंग निवर्ततेतत्पुनरीक्षयैवनगृह्यतेनापिविसृज्यआ
त्मा ३३ यथाहिभानोरुदयोनृचक्षुषांतमोनिहन्यान्नतुसद्विधत्ते एवंसमीक्षानिपुणासतीमेहन्यात्तमि
स्रंपुरुषस्यबुद्धेः ३४ एषस्वयंज्योतिरजोऽप्रमेयोमहानुभूतिःसकलानुभूतिः एकोऽद्वितीयवचसांविरा
मेयेनेषितावागसवश्चरंति ३५
पृथ्यामेनात्मनिविविक्तंगृहीतमासीत्तदेवपुनर्ज्ञानेननिवर्ततेआत्मातुकेनापिरूपेणगृह्यतेनापित्यज्यतेअयंभावःमुक्ते
क्रियाफलत्वेनतावदात्मनोविकारस्तस्यास्वारोपितात्मज्ञानमात्रनिवृत्तिरूपत्वात्तन्नात्मसंस्पर्शितेबंधमोक्षयोःअतोनविका
ररति ३३ तदेवदृष्टान्तेनस्पष्टयतियथेतिनतुसद्वैमेवसद्वस्तुघटादिपुनर्विधत्तेकरोतिसमीक्षाआत्मविद्या ३४ आत्मनोति
विकारत्वंप्रपंचयति एषइत्यनेनापरोक्षतयानिमशामस्यात्मनःप्रापयतिस्वयंज्योतिरितिमनेनात्मानमलापकारणालक्ष
णंनिवृत्तिंवारयतिअजइत्यनेनाविवारयतिअप्रमेयइतिस्वालक्षणानिशायाधानेनसंस्कारंमहानुभूतिरितिदृष्टाकालेपा
दिच्छेदाभावेनानात्मिवहृद्धिविपरिणामावदत्ययनाधानात्स्वयंज्योतिष्ट्वादेवहेतुःसकलानुभूतिरितिएकोऽद्वितीयइतिविकारहेतो
रुपमस्वभावाक्तापिविकारइतिदर्शयतिनवृक्षादिविषयस्यकथमप्यस्यमितिविद्धातिनिगोहवचसांविरामेअगोचरत्वेनेतिहृज्ञोमस्त्य
तथाचश्रुतिःयतोवाचोनिवर्तन्तेअप्राप्यमनसासहेतितत्रहेतुःयेनेषिताःप्रेषिताःतथाचश्रुतिःकेनेषितंपततिप्रेषितंमनःकेनप्राणःप्रथमःप्रैतियुक्तःकेने
षितांवाचमिमांवदन्तिचक्षुःश्रोत्रंकउदेवोयुनक्तिश्रोत्रस्यश्रोत्रंमनसोमनोवाचोहवाचंसउप्राणस्यप्राणश्चक्षुषश्चक्षुरिति ३५ ॥

प्रहितीयत्तमुपपादयितुंभेदस्याबस्तत्वमाहएतावानितिकेवलेप्रभिन्नेप्रात्मनिप्रात्मनुविकल्पइतियदेतावान्सर्वोप्यात्मनो
मनमःसंमोहः भ्रमःयतःसमात्मानंमृतेविनायस्यविकल्पस्यावलंबःप्राश्रयोनास्तिरजतभ्रमस्येवशुक्तिविनाभेदनानाप्रा
त्निकिंवनरंप्रेमायाभिप्रुवन्नपरंपतेप्रकाशत्समहवयःप्रशब्दादयोपादिप्रस्ततेविषयः ३८ केचित्स्वैःसमस्तादिमतीनःप्र
पंचमस्याबाधायोमानवेदानार्थानांचक्रमनर्थःकृतप्रतिपादनपरवेनार्थवादत्वानुहेतमिति मन्यतेतेनत्मतमनुत्तरहषयति
ययुतिनामाकृतिभिःनामरूपोपलक्षितेपंचभूतात्मकंहृदयंहृतेयत्तदबाधितमितिप्रतिमार्गेप्रश्नवमेवप्रतिताशस्यभिमा
नवनीवेदांतेश्वथमर्थवादइतिप्रतीतिःननवविरोधतःप्रथंनापिविनाप्यर्थेनमायप्रतीतिःतथाहितत्वावहिप्रनवाक्यावेने
तेषामस्तित्वनार्थवादत्वंस्यात्नवाकर्तृभोक्तृप्रमातेदंरूपकत्वात्ग्राह्यत्वात्पंचवर्णात्मकत्वात्स्वप्नवदिमायत्वमानवी
एतावानात्मसंमोहोयद्विकल्पस्तुकेवले आत्मनृतेसमात्मानमवलंबोनयस्यहि ३८ योगिनोपकृतयोग
मायुंजतःकायउत्थितैः उपसर्गैर्विहन्येततत्रायंविहितोविधिः ३७ यत्रामाश्रकृतिग्राह्यपंचवर्णमबाधितं
कश्चिन्नाप्यर्थवादोयंहृदयंपंडितमानिनां ४० योगधारणयाकांश्चिदासनैर्धारणान्वितैः तपोमंत्रौषधैःकां
श्चिदुपसर्गान्विनिर्दहेत् ४५ कांश्चिन्ममानुध्यानेननामसंकीर्तनादिभिः योगेश्वरानुवृत्त्यावाहन्यादशुभदा
न्बुधः ४६ केचिद्देहमिमंधीराःसुकल्पंवयसिस्थिरं विधायविविधोपायैरथयुंजंतिसिद्धये ४७
न्याङ्गाभ्यसिद्धायशामाघ्येते ४९ केचिद्देहमिमंधीराःसुकल्पंवयसिस्थिरं विधायविविधोपायैरथयुंजंतिसिद्धये ४७
नहितत्कुशलादृत्यंतदायासोह्यपार्थकः अंतवत्वाच्छरीरस्यफलस्येववनस्पतेः ४८
योगिनांभमादिकृतिमिश्रबाधितत्वादिति ३८ तदेवंज्ञानयोगंसपरिकरंनिरूप्येदानींतच्छिष्यविघ्नप्रतीकारमाहयोगिन
इतिविमिः योगंयुंजतःकायोत्थितैःवान्यैःउपसर्गैःरोगादुपद्रवैःप्रभिभूयततविधिःप्रकारः ३७ योगधारणयाप्रासनम
न्वयंयाधारणयासंतापथ्येत्सादीनामनवायुधारणान्वितैर्वान्यादिपागानतपोमंत्रौषधैःपापग्रहसर्पादिकृतान् ३८ म
मनुध्यानादिभिःकामादीन्योगेश्वरानुवृत्त्यादंभादीन्हन्यात् ४७ एवंतदेहासिद्धार्थमेवतत्सर्वंकृत्वेतितन्हृषयतिकेचिदि
मतवसेनुङ्पायैर्देहमेवसुकल्पंजरारोगादिरहितंवयसिताकृत्यपिस्थिरंवकृत्वापदेहपकारयमसेशादिसिद्धयेतनतेदा
रागात्रुपयोगंयुंजंतितन्नत्वात्तन्निष्टप्रभूयं ४७ कुशलैःशास्त्रेवादारणीयतनभवतितन्नस्यतिवदान्मस्थेर्ये शरीरस्यफलवन
सुरमितयथेः ४२ नकश्चित्माध्यगतेनापिप्रयासप्राप्तादियोगाकियमाणाजरारोगाद्यभावादरूपतसुपातयापुनमपा
दिपुनम्नावत्तत्स्वतेयसाहयोगाद्भिदितन्नतदाहहसिदेनरूपदध्यात्रविसुमन ४२ तदेवविघ्नप्रतीकारंयोगाऽभ्यसोदितकृ
मल्करामस्यतत्विघ्नयाकापिरसाहयोगगयोसिनिविवरत्नप्रायवत्समस्तान्मित्रनुमनितयस्यसःस्पृहासन्नादिविघ्नःसावमर

श्रीः
भा०पु०
टी०
८४

इतिश्रीभावार्थेएकादशेऽष्टविंशोध्यायः २८ ऊनत्रिंशेतु यः सर्वैर्दुस्तरो योगनिष्ठितैः भक्तियोगस्तमेवाह स्वभक्ताय
समाधवः अतिक्लेशमिवालक्ष्य योगमार्गं सुकरं हृदि सुखोपायं पृच्छति सुदुस्तरामिति अनात्मनः अवशी
कृतमनसः येन मार्गेण यथा अञ्जसा पुमान् सिद्ध्येत् तथा तन्मे ब्रूहि १ सदुःखत्वं प्रपञ्चयति प्रायश इति म
नो युञ्जन्तो निगृह्णन्तः असिद्धिं प्राप्य विषीदन्ति कुतः असमाधानात् मनोनिग्रहेण कर्शिताः श्रान्ताः सन्तः
यस्मादेवं तस्मात्तु विषीदन्ति अथात एव ये हंसाः सारासारविवेकवन्तः ते तावदानन्ददुघं पदाम्बुजमेव सुखं यथा
भवति तथा निश्रयन्ते आश्रयन्ते अमी तु त्वन्मायया विहताः केवलयोगकर्माभिमानिनः अमतो न प्रयतन्ते यदा अमी तद्भक्ताः त्वन्मायया न विहताः अत ए
व योगकर्मभिः कृताभिमानिनो न भवन्ति अयं तत्त्वन्मायया मोहिताः मनोवशयोगस्तावद्यकर्मकुशलादिनि केवले गतिनाभवति न त्वद्ध्याने रमन्ते:

इति श्रीभागवते एकादशे योगनिर्णये नाम अष्टविंशः २८ उद्धवः सुदुस्तरामिमां मन्ये योगचर्यामनात्मनः य
थाञ्जसा पुमान्सिद्ध्येत्तन्मे ब्रूह्यञ्जसाच्युत १ प्रायशः पुण्डरीकाक्ष युञ्जन्तो योगिनो मनः विषीदन्त्यसमाधानान्म
नोनिग्रहकर्शिताः २ अथात आनन्ददुघं पदाम्बुजं हंसाः श्रयेरन्नरविन्दलोचन सुखं नु विश्वेश्वर योगकर्मभिः
त्वन्माययामी विहता न मानिनः ३ किं चित्रमच्युत तवैतदशेषबन्धो दासेष्वनन्यशरणेषु यदात्मसात्त्वं यो रो
चयत्सह मृगैः स्वयमीश्वराणां श्रीमत्किरीटतटपीडितपादपीठः ४ तं त्वाखिलात्मदयितेश्वरमाश्रितानां
सर्वार्थदं स्वकृतविद्विसृजेत को नु को वा भजेत्किमपि विस्मृतये नु भूत्यै किं वा भवेन्न तव पादरजोजुषां नः

३ वक्त्राः तत्र मादेन कृतार्था भवन्ति इति नातिचित्रमित्याह कि मिति अनन्यशरणेषु दासेषु तव आत्मसात्त्वं तदधीनत्वं यद्यथानन्दगो
पीवलिप्रभृतिषु एतत्किं चित्रं नाश्चर्यमित्यर्थः यतो यो भवान् श्रीरामरूपेण मृगैर्वानरैः सह साहित्यं सख्यमिति यावत् अरोचयत् श्रीमा
कृतवान् कथंभूतः ईश्वराणां ब्रह्मादीनां यानि श्रीमन्ति किरीटानि तेषां तटानि अग्राणि तैः पीडितं विलुलितं पादपीठं यस्य सः यत एवंभूतोऽपि
सन् ४ अतः स्वापविस्मृतिकेनाप्यात्मसमर्पयेदित्याह तं त्वेति तं त्वामेवंभूतं को नु विसृजेत् कथंभूतः स्वकृतविन्न बलिमुख्यादादिभक्तया कृतम
नुग्रहं जानन् यद्वा स्वस्मिन्नेव तत्रयो मितयापि कृतमुपकारं विद्वान् तदेवाह अखिलात्मदयितेश्वरमखिलस्य जगतः आत्मानं चेतयिता
चात्मत्वादेव दयितं प्रेष्ठं सेव्यः ईश्वरत्वादवश्यं भजनीयं किं च आश्रितानां सर्वार्थदं तर्हि किं फलोद्देशेनाहं सेव्यः न हि न हि किं अपि अ
निरूपं वद्यातिरिक्तं स्वर्गादि वियादन्यमपि को वा भजेत् सेवेत कथंभूतं तत् केवलं भूतेर्विषयभोगाय अनु पश्चात् तदेव वादिस्मृतये भ
वति यस्मात् वह्नि निर्निक्ष किमपि देवताद्वारा मंत्रादिसाधनं भूतं सुखाय संसारस्य विस्मृतेर्भोगाय वा को वा भजेत् न कोऽपि
ननु तत्साधनं विना भोगमात्रादि फलं कथं स्यात् तत्राह किं वेति तदक्षयं वै साधनसंपत्तिः अस्माकं पादरजःसेविनां तया विना न
दाप्नोति नरो नारायणाश्रय इति ५ ॥ ८४

आस्तामन्यभजनवार्तात्वत्कृतोपकारस्यात्वय्यात्मनिवेदनेनैवनिष्कृतिर्नान्यथेत्याह नैवेति अपचि
तिंप्रत्युपकारंब्रह्मायुषामितियावत्कृतवयोब्रह्मविदोपिनैवप्राप्नुवंति यतस्त्वत्कृतमुपकारंस्मरंतः ऋद्धमु
दः उपचितपरमानंदाः उपकारमेवाह योभवान्विहरणार्थवपुषा गुरुरूपेण अंतश्चैत्यवपुषा अंतर्यामि
रूपेण च अशुभंविषयवासनांविधुन्वन्निरस्यन्स्वगतिंनिजरूपंप्रकटयतितस्यतव ६ ईश्वरेश्वरत्वेहेत्वंजग

नैवोपयंत्यपचितिंकवयस्तवेशब्रह्मायुषापिकृतमृद्धमुदःस्मरंतः योंतर्बहिस्तनुभृता
मशुभंविधुन्वन्नाचार्यचैत्यवपुषास्वगतिंव्यनक्ति ६ श्रीशुकउवाच इत्युद्धवेनात्यनुरक्तचेत
सापृष्टोजगत्क्रीडनकःस्वशक्तिभिः गृहीतमूर्तित्रयईश्वरेश्वरोजगादसप्रेममनोहरस्मि
तः ७ श्रीभगवानुवाच हंततेकथयिष्यामिममधर्मान्सुमंगलान् यान्श्रद्धयाचरन्
मर्त्योमृत्युंजयतिदुर्जयं ८ राम ॥ ॥

त्क्रीडनकंक्रीडोपकरणंयस्यसः ननुजगत्स्रष्टादिनाब्रह्मेशादयः क्रीडंतितत्राह स्वशक्तिभिः
सत्वादिभिर्गृहीतंमूर्तित्रयंयेनसः सप्रेमप्रेमसहितंमनोहरंस्मितंयस्यसः सप्रेमयायानयाजगादे
तिवा ७ तदेवकथयिष्यामिहंतेति संप्रहर्षसंबोधनेसुमं
गलान् स्वतःरूपान्मृत्युंसंसारंदुर्जयं
अन्यैरुपायैः ८ ॥

श्री॰ भा॰ ए॰ टी॰ १२७

धर्मानेवाह कुर्यादितित्रयोदशभिः मांस्मरन्शनकैः ९ असंभ्रमतः कुर्यान्नदाम्भमयीति अर्पितेम
नश्चित्तेसङ्कल्पविकल्पात्मकेध्यानात्मकेयेन अतएवमद्धर्मेष्वात्ममनसोरतिर्यस्यसः पुण्यदेश
लक्षणंमद्भक्तैरितिदेवादिषुयेयेमद्भक्तास्तेषामाचरितानिकर्माणिवाश्रयेत १० सङ्घेणसंभूय
वा ११ अन्तरङ्गांभक्तिमाह मामितित्रिभिः सर्वभूतेषुवात्मनिचात्मानमीश्वरंस्थितंमामेवैक्षेतेक
स्यैवसर्वेषुस्थितिरुक्तमाह बहिरन्तःपूर्णमित्यर्थः नन्वन्तः अपावृतमानावरणेनाच्छादनेनव
र्जितः यथाखमसङ्गत्वादित्यर्थः १२ हेमहाद्युतेअतिप्राज्ञइत्यनेनप्रकारेणकेवलंज्ञानदृष्ट्याद

कुर्यात्सर्वाणिकर्माणिमदर्थंशनकैःस्मरन् मय्यर्पितमनश्चित्तोमद्धर्मात्ममनोरतिः
९ देशान्पुण्यानाश्रयेतमद्भक्तैःसाधुभिःश्रितान् देवासुरमनुष्येषुमद्भक्ताचरितानिच १०
पृथक्सत्रेणवामह्यं पर्वयात्रामहोत्सवान् कारयेद्गीतनृत्याद्यैर्महाराजविभूतिभिः
११ मामेवसर्वभूतेषुबहिरन्तरपावृतं ईक्षेतात्मनिचात्मानंयथाखममलाशयः
१२ इतिसर्वाणिभूतानिमद्भावेनमहाद्युते सभाजयन्मन्यमानोज्ञानंकेवलमाश्रितः
१३ ब्राह्मणेपुक्कसेस्तेनेब्रह्मण्येर्केस्फुलिङ्गके अक्रूरेक्रूरकेचैवसमदृक्पण्डितोमतः १४

ञ्चमाश्रितः सन्सर्वाणिभूतानिमद्भावेनमन्यमानः सभाजयन्पण्डितोमतइत्युत्तरेणान्वयः १३
ननूत्तमाधममध्यमेष्वेकरूपेणसभाजनमयोग्यमेवस्यात्स्वरूपजात्यादिव्यतिक्रमादित्याशंक्यतामेवा
ज्ञानदृष्टिंप्रपञ्चयति ब्राह्मणइति विषमेष्वपिसमदृक् समंमामेवपश्यन् वैषम्यमेवचनेद्दृश
यति ब्राह्मणेपुक्कसइति जातितोवैषम्यंपुक्कसोन्त्यजातिविशेषः स्तेनेब्रह्मण्येस्वहारिणिब्रह्मण्येब्र
ह्मणोभ्योदानशीलेकर्मतः अर्केविस्फुलिङ्गेइतिगुणतः अक्रूरेशान्तेक्रूरेचेतिस्वभावतः १४ ॥ ॥ राम॰ १२७

नेरष्वभीक्ष्णं दृष्टिं कुर्वतः सद्यः फलविशेषमाह नरेष्विति समो ब्रह्म मद्भावेनेषु भावयतः स्पर्धादयः सहसाहंकारश्च हि निश्चितं वियंति न
श्यंति १५ प्रतीतं तथाभीक्ष्णं दृष्ट्या सर्वात्मत्वमेव विद्यादिः विसृज्येति स्मयमानान् हसतः स्वान् स्वीयांस्त्यक्त्वा दैहिकीं दृशमुद्दृश्य
मः सज्जनीचदृष्टिं दृष्टिं तया च त्रपया व्रीडां लज्जां च विसृज्य श्वचांडालादीनभिव्याप्य प्रणमेत् नन्विरोधकर्यादित्यर्थः १६
एवं पंचभिः श्लोकैरुक्तायाः समदृष्टेरवधिमाह द्वाभ्यां यावदिति १७ तस्यैवं कुर्वतः पुंसः सर्वं ब्रह्मात्मकमेव भवतीत्य
तः आत्ममनीषया सर्वं ब्रह्मदृष्ट्या या विद्या तया प्रतिपरितो ब्रह्मैव पश्यन् सर्वतः क्रियामात्रादुपरमेत् १८ किमयमेवोपा

नरेष्वभीक्ष्णं मद्भावं पुंसो भावयतोऽचिरात् स्पर्धासूयातिरस्काराः साहंकारा वियंति हि १५ विसृज्य स्मयमा
नान्स्वान्दृशं व्रीडां च दैहिकीं प्रणमेद्दंडवद्भूमावाश्वचांडालगोखरं १६ यावत्सर्वेषु भूतेषु मद्भावो नोपजाय
ते तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः १७ सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया परिपश्यन्नुपर
मेत्सर्वतो मुक्तसंशयः १८ अयं हि सर्वकल्पानां सध्रीचीनो मतो मम मद्भावः सर्वभूतेषु मनोवाक्कायवृत्ति
भिः १९ न ह्यंगोपक्रमे ध्वंसो मद्धर्मस्योद्धवाण्वपि मया व्यवसितः सम्यङ्निर्गुणत्वादनाशिषः २० यो यो
मयि परे धर्मः कल्प्यते निष्फलाय चेत् तदायासो निरर्थः स्याद्भयादेरिव सत्तम २१ एषा बुद्धिमतां बुद्धिर्म
नीषा च मनीषिणां यत्सत्यमनृतेनेह मर्त्येनाप्नोति मामृतं २२ एष तेऽभिहितः कृत्स्नो ब्रह्म

यः शक्तिराद्योपाधीनामयां मतिबहुत्वः समीचीनत्वमुपमेयमाह अयंहीति १९ भगवद्धर्मलक्षणोपायस्य समीचीनत्वमे
वोपपादयति द्वाभ्यां नहीति उपक्रमे ह्यंगवैगुण्यनाशो वा निष्कामस्य मद्धर्मस्योपक्रमे सति प्रत्यवायः परिमिष्टापि वैगुण्यादिभि
र्ध्वंसो नास्त्येव यतो मयैवैनं निर्गुणत्वादयं धर्मः सम्यग्व्यवसितो निश्चितः न तु मन्वादिभिरिव कश्चित् २० किंच यो यमित्र्य
मर्थः किंच कल्प्यं मद्धर्मं साधयति यतो लौकिको विधियोगानिरर्थः व्यर्थप्रयासः सोपि मयि परे निष्फलाय चेत्कल्प्यते तेनि
ष्कामतयार्पितश्चेत्तर्हि परधर्मः स्यात् निरर्थो यायासः यथा भयशोकादेर्हेतोः पलायनाक्रंदनादिक्लेशस्तद्वत् २१
प्रत्तामद्भजनमेव बुद्धेर्विवेकमनीषायाश्चातुर्यस्य च फलमित्याह एषेति नामेवद्ध्रीयतिसत्यमशृतमामाप्नुतेना
नृतेन मर्त्येन विनाशिना मनुष्यदेहेन इहास्मिन्नेव जन्मनि प्राप्नोतीति यत्सैव बुद्धिर्मनीषा चेति बुद्धिर्विवेकः मनीषा चातु

श्रीः
भा॰ए
टी॰
५१

सहाप्रकारेणार्थमुपसंहरति एषत इति द्वाभ्यां समासव्यासविधिना संक्षेपविस्तारप्रकारेण २३ किंचाभीक्ष्णशः
ज्ञाने एतदनुसंधानकथनपठनश्रवणाचरणमेष्वेवदेव फलं भवतीत्याह चतुर्भिः सुविविक्तमिति मया सुविविक्तं
तेनाविर्भूतं एतद्व्याख्यानमपि योधारयेत् सनातनं ब्रह्मगुह्यं वेदेषु रहस्यं २५ स एव फलं यथा भवति तथा ब्रह्मदाय
स्य ब्रह्मदस्यातीति व्याख्यातं ज्ञानोपदेष्टुः २६ समधीयीत स्वैः पठेत् परमं शुचि श्रेयसामपि शोधकं एवं तत्र शुश्रूषेत् २७ स
मस्तानान्नुत्यत्रोश्रवणकर्तुस्त्वामीमां शयेन सूच्छति शृणोति श्रुतिं पृच्छति २८ उपधावितमाकं तत्र्याह नैतदिति श्रवणरहस्यं नमा

एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः समासव्यासविधिना देवानामपि दुर्गमः २३ अभीक्ष्णशस्ते गदि
तं ज्ञानं विस्पष्टयुक्तिमत् एतद्विज्ञाय मुच्येत पुरुषो नष्टसंशयः २४ सुविविक्तं तव प्रश्नं मयैतदपि धारयेत्
सनातनं ब्रह्मगुह्यं परं ब्रह्माधिगच्छति २५ य एतन्मम भक्तेषु संप्रदद्यात्सुपुष्कलं तस्याहं ब्रह्मदायस्य ददा
म्यात्मानमात्मना २६ य एतत्समधीयीत पवित्रं परमं शुचि स पूयेताहरहर्मां ज्ञानदीपेन दर्शयन् २७ य ए
तच्छ्रद्धया नित्यमव्यग्रः शृणुयान्नरः मयि भक्तिं परां कुर्वन् कर्मभिर्न स बध्यते २८ अप्युद्धव त्वया ब्रह्म सखे सम
वधारितं अपि ते विगतो मोहः शोकश्चासौ मनोभवः २९ नैतत्त्वया दाम्भिकाय नास्तिकाय शठाय च अशु
श्रूषोरभक्ताय दुर्विनीताय दीयतां ३० एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च साधवे शुचये ब्रूयाद्भक्तिः
स्याच्छूद्रयोषितां ३१ नैतद्विज्ञाय जिज्ञासोर्ज्ञातव्यमवशिष्यते पीत्वा पीयूषममृतं पातव्यं नावशिष्यते
३२ ज्ञाने कर्मणि योगे च वार्तायां दण्डधारणे यावानर्थो नृणां तात तावांस्तेऽहं चतुर्विधः ३३

शठाय वंचकाय ३० ब्रह्मण्याय वेदितां च यदि भक्तिः स्यात्तर्हि ब्रूयात् ३१ एतज्ज्ञानेन वश्यमानं कृतार्थो भवतीत्याह
नैतदिति जिज्ञासोः उक्तार्थमाह पीत्वेति पीयूषं स्वादु ३२ ननु संति बहूनि ज्ञेयानि तत्तत्फलसाधनानि सर्वेषां भक्तानां भ
क्तिमतां सर्वं ग्रहमेवातो मदेकशरणो भवेत्याह ज्ञाने तत्त्वविज्ञाने दाया वान् धर्मादिलक्षणः पुरुषार्थस्तावानस्वेवापि त
देवमेव तज्ज्ञाने मोक्षः कर्मणि विहिते धर्मः कर्मण्येव स्वाभाविके न कामः योगे अणिमादिसिद्धयः वार्तायां कृष्यादा
वर्थः दंडनीतौ ऐश्वर्यमिति सिद्धैश्वर्ययोर्वापि कामानं तर्गताश्चतुर्विधः ३३

ज्ञानरत्नप्रदानहं मुनीश्वर इति पद्मान्मत्यक्त ममस्तकर्मा मन्मेनिवेदितात्माभवेत्तिनदासोमेविचिकीर्षितः विशिष्टकर्त्तुमिष्टोभ
वतितनत्स्मामृतत्वमोदनिशतिपद्यमानोमयात्मभूयायमदेकायमत्तमानेभूयावेतियावकल्पतेयोग्योभवतिवेधुवे ३४
श्रादर्शितोयोगमार्गोयस्मैसः ३५ एवंश्रावेणवभ्रातितंदृष्ट्वाभतंविन्नेधैर्यात्विष्टम्भवद्धमन्यमानः श्रात्मानेकृतार्थम
मानः ३६ मयायाश्रितश्रासीत्स्मनवसन्निधानेनैवविशावितःप्रभवतिकिंतबाधायसमर्थोभवतिश्रजाश्रवन
तोपिजनक ३७ किंवयच्चपिवसंनिधानादेवगतस्तस्यानुकंपितामवतावित्तानमयःप्रदीपश्चप्रर्पितः स्वमा

मर्पीयत्वान्यक्तममस्तकर्मोनिवेदितात्माविचिकीर्षितोमे तदामृतत्वंप्रतिपद्यमानोमयात्मभूयायचकल्प
तेवै ३४ श्रुकउवाच सएवमादर्शितयोगमार्गस्तदुत्तमश्लोकवचोनिशम्य बद्धांजलिःप्रीत्युपरुद्धकंठो
नकिंचिदूचेश्रुपरिप्लुताक्षः ३५ विष्टभ्यचित्तंप्रणयावघूर्णितंधैर्यात्परामन्वबद्धमन्यमानः कृतांजलिःप्राह
यदुप्रवीरंशीर्ष्णास्पृशंस्तच्चरणारविंदं ३६ उद्धवउवाच विद्रावितोमोहमहांधकारोयश्राश्रितोमेभवतःस
न्निधानात् विभावसोःकिंनुसमीपगस्यशीतंतमोभीःप्रभवंत्यजाद्य ३७ प्रत्यर्पितोमेभवतानुकंपिनाभृत्या
यविज्ञानमयःप्रदीपः हित्वाकृतज्ञस्तवपादमूलंकोन्यंसमीयाच्छरणंत्वदीयं ३८ वृक्णश्चमेसुदृढः
स्नेहपाशोदाशार्हवृष्ण्यंधकसात्वतेषु प्रसारितःसृष्टिविवृद्धयेत्वयास्वमाययाह्यात्मसुबोधहेतिना ३९
नमोस्तुतेमहायोगिन्प्रपन्नमनुशाधिमां यथात्वच्चरणांभोजेरतिःस्यादनपायिनी ४० श्रीभगवान्
उवाच गच्छोद्धवमयादिष्टोबदर्याख्यंममाश्रमं तत्रमत्पादतीर्थोदेस्नानोपस्पर्शनैःशुचिः ४१ ईक्षयालक
कनंदायाविधूताशेषकल्मषः वसानोवल्कलान्यंगवन्यभुक्सुखनिस्पृहः ४२ ॥

यथापहृतःपुनःसमर्पितःश्रतस्तवकृतज्ञस्यत्वयाकृतमनुग्रहंजानतोनानितमःकोनामत्वदीयंपादमूलंहित्वान्यच्छरणं
समीयादाश्रयेत ३८ किंचदाशार्हादिषुवयायःस्नेहपाशःप्रसारितःसत्वयैवात्मतत्त्वज्ञानखड्गेनवृक्णःछिन्नः
३९ एवंयद्यपितथापिवत्सरूपतयायुष्मत्पादपद्मेनमोस्त्विति अनुशाधिअनुशासनीयमाहयथेतिद्वयेन
अनपायिनी ४० ततःकोमाममियामीकृत्यनस्यापिमयादिष्टोलोकसंग्रहार्थमेतावत्कार्यमित्याहगच्छेतिद्वाभ्यां
शुचिः ४१ स्नानादेःसर्वमेवमत्पादतीर्थोदश्रतायाअलकनंदायागंगायाःईक्षयावमानःपरिधानःवन्यभुग्वन्याहारः

श्री: भा० द० टी० ६३

हृद्ग मात्राणां त्यक्तो स्मादि विषयाणां सप्रीत: प्रानेवादि स्वभाव: ४३ तेन यातिर्विजित्य सविवादितं निस्व: विगुणात्मा

त्मिका गतीरतिक्रम्य ४४ हरिमेध मामेमारं हरति मेधा यस्य तेन प्रोक्त सेन प्रहृष्ट्यरोपि सत्वगु: स्वनिर्मुक्तोपिप्र

पक्रमे निर्गमनमयं ४५ मद्भुत्स्यन: स्नेहो यस्मिन्नुनेन वियोगात्कातरो भीत: सुतएव तं परिहाय मन्नुवज्राव्रतोविह्वल:

मनुतत्कुलकं यथोपाय ४६ ततस्त्रभक्तै: पार्श्वे तेनवक्तुयादतं मूर्ध्नि विशुद्धितानि वेदु त्र पयानन्तान्त्यानं पुन: पुन: न

स्तूयमयो श्रवणहृतोन्वगमं भक्ते: पादविश्लेषणात्तमरस्मादिरेतीयस्केधापक्रमोक्तान्तमारभावदर्शिकात्रमेग

लिलित्वद्वेहमात्राणां सप्रीत: संयतेन्द्रिय: शान्त: सम्माहितधियात्मानविज्ञानसंयुत: ४३ मत्तोनुशिक्षि

तयतेविविक्तमनुभावयन् मय्यावेशितवाक्चित्तो मद्धर्मनिरतोभव प्रतिव्रज्य गतीस्तिस्रो मामेष्यसित

तयतेविविक्तमनुभावयन् मय्यावेशितवाक्चित्तो मद्धर्मविवृतोभव पादयो: शिरोनिधायाश्रु

त: परम् ४४ शुकउवाच सएवमुक्तोहरिमेधसोद्धव: प्रदक्षिणं तं परिसृत्य पादयो: शिरोनिधायाश्रुकलाभिरार्द्रधीर्न्यषिञ्चदद्वन्द्वपरोप्युपक्रमे ४५ सुदुस्त्यजस्नेहवियोगकातरो न शक्नुवंस्तं परिहातुमातुर:

कृच्छ्रं ययौ मूर्ध्नि विभर्तृपादुके बिभ्रन्नमस्कृत्य ययौ पुन: पुन: ४६ ततस्तमन्तर्हृदि संनिवेश्य गतो महाभा

गवतो विशालां यथोपदिष्टां जगदेकबन्धुना तप: समास्थाय हरेरगाद्गतिम् ४७ य एतदानन्दसमुद्रसंभृ

तं ज्ञानामृतं भागवताय भाषितं कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयासेव्य जगद्विमुच्यते ४८ भव

भयमपहन्तुं ज्ञानविज्ञानसारं निगमकृदुपजह्रे भृङ्गवद्वेदसारं अमृतमुदधितश्चापाययद्भृत्यवर्गान्पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोस्मि ४९ ततो मैत्रेय:

त्वन्नभगवत: प्रभाममयायानुपश्चात्यपाने: इष्टतागत: मन्नुपमस्हत निजलभगवतमेकान्तेहष्ट्वातत्कालशमेन मे मैत्रेय: सर्व

तामसद्पुन: कृपयाभगवतोपदिष्टत्वमाकलय्य तदात्ताल्लोयथाविलिरस्कृत्य ४६ विशालां बद्रिकाश्रमगात: सर्व

हरेगतिममलकथ्यभूतां तेनैव जगदेकबन्धुना यथायदिष्टां तदामृतवं प्रतिपद्यमानो मयात्मभूयायैवकल्पतेवं प्रति

वृहस्यगती स्तिस्रो मामेष्यतिनत: पदिमित्यवमुक्तप्रकारं ४७ प्रातरसमुद्रेभगवज्ज्ञानिमात्रसम्भृतमेकीकृतमेत

वय: सच्छ्रद्धयाश्रसेवार्हवदपिसेविभावर्तने समभ्युच्यत इतिकिंवक्तव्यं तस्यात्तजगदपि विमुच्यतं तस्याद्ये: ४८ एवं कृतोप

देशं जयकुर्मतामानिभवतिभव: संसार: भयहन्तुनाशोयादिनिमित्तं निगमकृत्वाचमङ्गानां च भृत्यवर्गाणां यथायपायमसपहर्तं योमृत

हृदयमुपजहेउद्धृतवानुतदेवाहदेवमारमेककितं तत्त्वानविज्ञानमपं चतत्सारं श्रेष्ठं च भृङ्गवद्धेगायथापुष्पमकोपयज्ञोवामृतमुपमहवतितर

पात्रयममृतं वेदानुसारेणोवडदधितश्चकृतस्वामभयंयथायपभृत्यवर्गान्पाययत्तं तत्त्वतोस्मीति ४९ ॥ योगानुकेपितविष्णुमुद्धवयस्मानि

५२

इति श्रीभावार्थदीपिकायामेकादशे एकोनत्रिंशोऽध्यायः २९ त्रिंशे त्वयादुगणपतिं मौसलेनाघ्नतो हरिः स्वधाम गंतुमखिलं से
नहावनिजे कुले निनाय पृथ्वीभारमुपदिति मे हि मौसलं कथावसाने तत्रैव विशेषं परिपृच्छति तत इति त्रिभिः १
ब्रह्मशापोपसंसृष्टे कुले सति स्वयं भावः भगवतस्तन दृष्टे प्रभवति यादवानां कारणान्तु सोपि कथं विनष्टः स्वतः
किमकरोदित्याह देहं कथमत्यजदिति सर्वनेत्राणामिति सर्वेंद्रियोपलक्षणं २ तत्सर्वं पृच्छति प्रत्याक्रष्टुमिति य
स्मिन्नबला लग्नं नयनं परावर्तयितुं न शेकुः यच्च कर्णरंध्रे प्रविष्टं सतां मनो निलग्नं लग्नमिव तिष्ठति

इति श्रीभागवते एकादशस्कंधे उद्धवसंवादे एकोनत्रिंशोऽध्यायः २९ राजोवाच ततो महाभागवत उद्धवे
निर्गते वनं द्वारवत्यां किमकरोद्भगवान्भूतभावनः १ ब्रह्मशापोपसंसृष्टे स्वकुले यादवर्षभः प्रेयसीं सर्व
नेत्राणां तनुं स कथमत्यजत् २ प्रत्याक्रष्टुं नयनमबला यत्र लग्नं न शेकुः कर्णाविष्टं न सरति ततो यत्सतामा
त्मलग्नं यच्छ्रीर्वाचां जनयति रतिं किं नु मानं कवीनां दृष्ट्वा जिष्णोर्युधि रथगतं यच्च तत्साम्यमीयुः ३ ऋषि
रुवाच दिवि भुव्यंतरिक्षे च महोत्पातान्समुत्थितान् दृष्ट्वासीनान्सुधर्मायां कृष्णः प्राह यदूनिदं ४ श्रीभग
वानुवाच एते घोरा महोत्पाता द्वार्वत्यां यमकेतवः मुहूर्तमपि न स्थेयमत्र नो यदुपुंगवाः ५ उत्तिष्ठंतु य
दुश्रेष्ठाः स्थातव्यं नो रक्षिष्यंते स्त्रियो बालाश्च वृद्धाश्च शंखोद्धारं व्रजंत्वितः वयं प्रभासं यास्यामो यत्र प्रत्यक्स
रस्वती ६ तत्राभिषिच्य शुचय उपोष्य सुसमाहिताः देवताः पूजयिष्यामः स्नपनालेपनार्हणैः ७ ब्रा
ह्मणांस्तु महाभागान्कृतस्वस्त्ययना वयं गोभूहिरण्यवासोभिर्गजाश्वरथवेश्मभिः ८

तोन सरति न तिर्गच्छति यच्छ्रीः शोभा भासकीर्त्तमाना कवीनां वाचां रतिमुत्साम विशेषं जनयति तेषां मानेन राकस्यतो
मनयतीति किं वक्तव्यं यच्च त्रिलोः कृष्णं जिष्णोरर्जुनस्य रथस्थितं दृष्ट्वा युधि सूतास्तत्साम्यं सारूप्यमीयुः प्राप्ताः कर्णेन तूपे.
गात्यजदित्यन्वयः ३ दिवि स्वर्गे पविवेष्वादीन् भुवि भूकंपादीन् अंतरिक्षे दिग्दाहादीन् महोत्पातान् स्वयमेवोत्पादित
तानस्येदुःप्रतीकारान् ४ यमस्य कालस्य केतवो ध्वजा इव मृत्युसूचका इत्यर्थः नः अस्माभिः ५ प्रत्यक् पश्चिमवाहिनी ६ शुचिभि
र्भूत्वा स्नात्वा ७ ब्राह्मणानां स्वस्तैः कृतं शांतिकाः गवादिभिः पूजयिष्यामः ८ विधिः प्रतीकारः मंगलायनेन वा किंच
हि न देवगणं पूजनात् स्वहेतोः देवलोके परमं उद्धवो भविष्यतीति भावः २९ मधुद्विषो वक्ष्यमाणमर्थमभिनेय उत्तीर्य समुद्रे

१०

श्रीः
भा॰ ए॰
टी॰
९२

सर्वश्रेयोपबृंहितमित्यत्र संधिरार्षः भगवतानुक्तैः रथिसर्वैः श्रेयोभिः सहितं चक्रुः ११ पीयत इति पानं मैरेयकं मदिराविशेषं मधु स्वरसं दिष्टेन दैवेन विभ्रंशिता धियः ननु कथमन्यथा तस्मिन् तथा तद्युक्तमिति भावः यद्द्रवैः रसैः १२ कृष्णमायाविमूढानामिति मुख्यो हेतुः संघर्षः कलहः १३ ततो युयुधुस्तस्य १४ पतत्पताकैः पतन्त्यः पताका येषु तैः रथादिभिर्मिथः समेत्य न्यहन् न्यघ्नन्नित्यर्थः दद्भिर्दन्तैरिव १५ मिथः समेत्यस्य प्रपंचः प्रद्युम्नेत्यादिचतुर्भिः गदो हलभृतो भ्राता एकः शुभ

तस्मिन्भगवतोद्दिष्टं यदुदेवेन यादवाः चक्रुः परमया भक्त्या सर्वश्रेयोपबृंहितं ११ ततस्तस्मिन्महापानं पपुर्मैरेयकं मधु दिष्टविभ्रंशितधियो यद्द्रवैर्भ्रश्यते मतिः १२ महापानाभिमत्तानां वीराणां दृप्तचेतसां कृष्णमायाविमूढानां संघर्षः सुमहानभूत् १३ युयुधुः क्रोधसंरब्धा वेलायामाततायिनः धनुर्भिरसिभिर्भल्लैर्गदाभिस्तोमरर्ष्टिभिः १४ पतत्पताकै रथकुंजरादिभिः खरोष्ट्रगोभिर्महिषैर्नरैरपि मिथः समेत्याश्वतरैः सुदुर्मदा न्यहन्शरैर्दद्भिरिव द्विपा वने १५ प्रद्युम्नसांबौ युधि रूढमत्सरावक्रूरभोजावनिरुद्धसात्यकी सुभद्रसंग्रामजितौ सुदारुणौ गदौ सुमित्रासुरथौ समीयतुः १६ अन्ये च ये वै निशठोल्मुकादयः सहस्रजिच्छतजिद्भानुमुख्याः अन्योन्यमासाद्य मदांधकारिता जघ्नुर्मुकुंदेन विमोहिता भृशं १७ दाशार्हवृष्ण्यंधकभोजसात्वता मध्वर्बुदा माथुरशूरसेनाः विसर्जनाः कुकुराः कुंतयश्च मिथस्तु जघ्नुः सुविसृज्य सौहृदं १८ पुत्रास्त्वयुध्यन्पितृभिर्भ्रातृभिश्च स्वस्रीयदौहित्रपितृव्यमातुलैः मित्राणि मित्रैः सुहृदः सुहृद्भिर्ज्ञातींस्त्वहन्ज्ञातय एव मूढाः १९ शरेषु हीयमानेषु भज्यमानेषु धन्वसु शस्त्रेषु क्षीयमाणेषु मुष्टिभिर्जह्रुरेरकाः २० प्रत्यनीकं मन्यमाना बलभद्रं च मोहिताः हंतुं कृतधियो राजन्नापन्ना आततायिनः २२ ॥

द्रापरस्तौ सुमित्रासुरथाविति द्वंद्वमार्षं प्रसिद्धरथनामा वा कश्चित् १६ मदांधेन मदेन तमसा वा लोकाकारिताः १७ दाशार्हेत्येतन्नद्देश्याः मधुदामाथुराः शूरसेनाश्च तत्तद्देशीयाः १८ भ्रातृभिश्चेति भ्रात्रादिशब्दानां सप्रतियोगित्वाविनाभावात् ज्ञातृत्वमातुलान्ता इत्यादि ते ये मित्रभ्रमित्राणि च शत्रुवत् हतवंतः १९ धन्वसु धनुःषु जह्रुः जगृहुः २० परिघा लोहदंडाः भृता धृताः ते वज्रीकृत्समपि २१ प्रत्यनीकं प्रतिपक्षं २२ ॥

परकायशुद्धिर्योपरिवाहुदृश्य २२ यथाग्निर्निजः क्रोधः कुले संलयं निन्ये २४ यो रूपं योगेयरमशुरूपध्याने लक्षणेतमेवा
हं सयो ज्योतिमान् पंलोके भूलोके मनुष्यरूपतां वा पयोपस्थभूतले २६ प्राजिष्णुरूपं २८ नदेवाङ्गवर्णीयनिश्रीवत्सांकमि
नितन्तर्थिः २९ संदरस्मितेवक्त्राब्जेयस्मिन्स्तत्पुंडरीकवदभिराममसंदरीयवर्णीयस्मिन् ३० वनमालयापरीतांगाति

प्रपन्नानपि संकुद्राणुयस्य कृष्णनंदन परवतमुद्दिपरयोवरंतोनन्मतदुधि २३ ब्रह्मशापोपसृष्टानां कृष्ण
मायावृतात्मनां स्पर्द्धाक्रोधः लयं निन्ये वैणवोग्निर्यथा वने २४ एवं नष्टेषु सर्वेषु कुलेषु स्वेषु केशवः भुव
नेरितो भुवो भारस्तनिमेनेव घोषितः २५ रामः समुद्रवेलायां योगमास्थाय पौरुषं तत्याज लोकं मानुष्यं सं
योज्यात्मानमात्मनि २६ रामनिर्याणमालोक्य भगवान् देवकीसुतः निषसाद धरोपस्थे तूष्णीमासाद्य पि
प्पलं २७ बिभ्रच्चतुर्भुजं रूपं भ्राजिष्णु प्रभया स्वया दिशो वितिमिराः कुर्वन् विधूम इव पावकः २८ श्रीवत्सां
कं घनश्यामं तप्तहाटकवर्चसा कौशेयांबरयुग्मेन परिवीतं सुमंगलं २९ सुंदरस्मितवक्त्राब्जं नीलकुन्त
लमंडितं पुंडरीकाभिरामाक्षं स्फुरन्मकरकुंडलं ३० कटिसूत्रब्रह्मसूत्रकिरीटकटकांगदैः हारनूपुरमुद्रा
भिः कौस्तुभेन विराजितं ३१ वनमालापरीतांगं मूर्तिमद्भिर्निजायुधैः कृत्वोरौ दक्षिणे पादमासीनं पंकजा
रुणं ३२ मुसलावशेषायःखंडकृतेषुर्लुब्धको जरा मृगास्याकारं तच्चरणं विव्याध मृगशंकया ३३ चतुर्भुजं
तं पुरुषं दृष्ट्वा स कृतकिल्बिषः भीतः पपात शिरसा पादयोरसुरद्विषः ३४ अजानता कृतमिदं पापेन म
धुसूदन क्षंतुमर्हसि पापस्य उत्तमश्लोक मेनघ ३५ यस्यानुस्मरणं नृणामज्ञानध्वांतनाशनं वदंति तस्य ते
विष्णो मयासाधुकृतं प्रभो ३६ तन्माशु जहि वैकुंठ पाप्मानं मृगलुब्धकं यथा पुनरहं त्वेवं न कुर्यां सदतिक्रमं
३७ यस्यात्मयोगरचितं न विदुर्विरिंचो रुद्रादयोऽस्य तनयाः पतयो गिरां ये त्वन्मायया पिहितदृष्टय एतदं

यस्मिन्नत्र निजायुधैः परीतांगं पंकजारुणं वामं पादं दक्षिणोरौ कृत्वा आसीनं रूपं बिभ्रत् ३२ जरानामकश्चिल्लुब्ध
कोऽहं मृगस्यास्यमिवाकारो यस्य तं चरणं ३३ बालधनपयकृतमेवं तत्तत्तवापराधं तरति वेदनमाह यस्यात्मयोग
रचितं स्वाधीनमायया रचितं विरिंचिः अस्य तनयाः रुद्रादयश्च ये गिरां पतयो वेदरसज्ञा रसेपि न विदुः तस्य ते अवि
नमायस्य पन्नगभूषणप्रिये सानिध्यं यशस्करं नयः पापयोनयो वयं किं शृणीमः कथं वर्णयामः इति यावत्प्रत्न
तरास्त्वाश्रयपुनरिति मामेवापराधकारिणं पापकर्माणं महापुरुषस्य नहीति भावः ३७

श्री:
भा॰ए॰
टी॰
५४

इच्छाशरीरेणात्मस्वरूपं भावः प्रत्तमनमयीनिर्नाश्रीमूर्तिमेतत्थायतत्प्रतिकूलमेवंवितर्कयन्मात्रमितिएतदेव स्फुटीक
र्यातिदेवादयोवत्सप्रत्यारस्यादिना ४० ४१ तंपतिंतत्रदृष्ट्वातस्यपादयोर्निपपात ४२ उडौलुमाणास्तमस्तमितः
४४ निर्याणायोगमार्गेणामहद्गामिस्रारीराभिप्रायेण ४५ अविनाशवत्माणः इंद्रप्रस्थंगमिष्यथेतिब्रूहीतिसर्वेणो

श्रीभगवानुवाच माभैर्जरेत्वमुत्तिष्ठकामएषकृतोहिमे याहित्वंमदनुज्ञातः स्वर्गंसुकृतिनांपदे ३९ श्रु॰ उ
इत्यादिष्टोभगवताकृष्णेनेच्छाशरीरिणा त्रिःपरिक्रम्यतंनत्वाविमानेनदिवंययौ ४० दारुकः
कृष्णपदवीमन्विच्छन्नधिगम्यतां वायुंतुलसिकामोदमाघ्रायाभिमुखंययौ ४१ तंतत्रतिग्मद्युभिरायुधै
र्वृतंह्यश्वत्थमूलेकृतकेतनंपतिं स्नेहप्लुतात्मानिपपातपादयोरथादवप्लुत्यसबाष्पलोचनः ४२ अपश्यत
स्त्वच्चरणाम्बुजंप्रभोदृष्टिःप्रणष्टातमसिप्रविष्टा दिशोनजानेनलभेचशांतिंयथानिशायामुडुपेप्रणष्टे ४३
इतिब्रुवतिसूतेवैरथोगरुडलांछनः खमुत्पपातराजेंद्रसाश्वध्वजउदीक्षतः ४४ तमन्वगच्छन्दिव्यानि
विष्णुप्रहरणानिच तेनातिविस्मितात्मानंसूतमाहजनार्दनः ४५ गच्छद्वारवतींसूतज्ञातीनांनिधनं
मिथः संकर्षणस्यनिर्याणंबंधुभ्योब्रूहिमद्दशां ४६ द्वारकायांचनस्थेयंभवद्भिश्चस्वबंधुभिः मयात्य
क्तांयदुपुरींसमुद्रःप्लावयिष्यति ४७ स्वंस्वंपरिग्रहंसर्वेआदायपितरौचनः अर्जुनेनाविताःसर्वइंद्रप्रस्थंग
मिष्यथ ४८ त्वंतुमद्धर्ममास्थायज्ञाननिष्ठउपेक्षकः मन्मायारचनामेतांविज्ञायोपशमंव्रज ४९ इत्युक्त
स्तंपरिक्रम्यनमस्कृत्यपुनःपुनः तत्पादौशीर्ष्ण्युपाधायदुर्मनाःप्रययौपुरीं ५० इतिएकादशेत्रिंशोध्यायः
१ श्रीशुकउवाच अथतत्रागमद्ब्रह्माभवान्याचसमंभवः महेंद्रप्रमुखादेवामुनयःसप्रजेश्वराः १ पितरःसि
द्धगंधर्वाविद्याधरमहोरगाः चारणायक्षरक्षांसिकिंनराप्सरसोद्विजाः २ द्रष्टुकामाभगवतोनिर्याणं
परमोत्सुकाः गायंतश्चगृणंतश्चशौरेःकर्माणिजन्मच ३ ववृषुःपुष्पवर्षाणिविमानावलिभिर्नभः कं

नयः ४८ मन्मायारचनामेतांविविज्ञायेतिनिजश्रीमूर्तेरंतर्हितवाहृष्याशोकंमाकृथाइत्यर्थः ४९ कृत्स्नविनष्टवाताड
मैना ५० इतिभावार्थदीपिकायामेकादशेत्रिंशोध्यायः ३० एकत्रिंशेस्वकंधामजगामभगवानिति तमेवाग्रंथकुःश्रीमानब्रह्मदेवादयस्ततः
देवाअग्रविद्याधरादयोदेवानिथायवा श्रीकृष्णःस्वेच्छयाधामस्वतत्वेवसमाविशत् मुनयःसनकादयः १ प्रजेश्वरामरीच्यादयःद्विजागरुड
लोकवासिनःपक्षिणःमैत्रेयादयोवाभगवतोनिर्याणंद्रष्टुकामाःसंतःपरमोत्सुकाःसंतःतत्रागमन्तेषामोत्सुक्यकृतेमहोत्सवमाहसा

५४

विशन्तीः इन्द्रादीस्तु पश्यन्नेवैन्यमीलयदिति तत्रायं भावः पूर्वं ब्रह्मादिभिः स्वलोको लोकपालान्नः पाहि वैकुंठ कि।
कराननिति प्रार्थितत्वादिदानीं च स्वं स्वं लोकं प्रति निवर्तमागतत्वादङ्कं प्रचचनेषु रादित्येणाज्ञात्वा चयिने समाधिमिवि[
उर्व्वी नैन्यमीलयदिति ४ योगिनामिव स्वकं देहं धृत्वा भ्रमेवारयति लोकाभिराममिति त्रयं त्रयेऽर्थः योगिनो हि स्वकं
देहमुत्सृज्य स्वतनुमाग्नेय्या योगधारणया दग्ध्वा लोकान्तरं प्रविशन्ति भगवांस्तु स्वतनुं तथा किं त्वदग्ध्वैव स्वतनुं सहितं एव
स्वकं धाम वैकुंठाख्यमविशत् न त्वेहे त्वं लोकानामभिरामः अभितो रमणं स्थितिर्ययस्यां तां जगदाश्रयत्वेन जगन्मापिदा
रूपसंगादित्यर्थः किं च धारणाध्यानस्य मंगलं शोभनं विषयं इतरथा तयोर्विर्विषयत्वं स्यात् दग्धेनेवाग्याश्रयामु
सकानां तयैव तन्द्रूपसाक्षात्कारः फलं ग्रामस्त्वेति भावः इच्छाशरीराभिप्रायेणैवायथाक्रमनमेवास्तनं चापि स्वलो

भगवानपि तं वीक्ष्य विभूतीरात्मनो विभुः संयोज्यात्मनि चात्मानं पद्मनेत्रे न्यमीलयत् ५ लोकाभिरा =
मां स्वतनुं धारणाध्यानमंगलं योगधारणयाग्नेय्यादग्ध्वा धामाविशत्स्वकं ६ दिवि दुंदुभयो नेदुः =
पेतुः सुमनसश्च खात् सत्यं धर्मो धृतिर्भूमेः कीर्तिः श्रीश्चानु तं ययुः ७ देवादयो ब्रह्ममुख्या न विशं
तं स्वधामनि अविज्ञातगतिं कृष्णं ददृशुश्चातिविस्मिताः ८ सौदामिन्या यथाकाशे यान्त्या हित्वा
भ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैः ९ ब्रह्मरुद्रादयस्ते तु दृष्ट्वा योगगतिं हरेः विस्मि
तास्तां प्रशंसन्तः स्वं स्वं लोकं ययुस्तदा १० राजन्परस्य तनुभृज्जननाप्ययेहा मायाविडंबनमवेहि य

काभिरामामित्यादिविशेषणानामनर्थकप्रसंगात्तदपि अदग्ध्वा तिरोधाय निर्गत इत्येवं सांप्रतं ६ तदा स्वं स्वमेव
लोकं मा गमिष्यतीति संभ्रमेण देवादिकृतः संवेनोदुंदुभिनादपुष्पवृष्ट्यादिमहोत्सवादि तामाह दिवीति भूमेः सकाशा
त् श्रीहरिमनुययुः ७ तदा श्रीहरेर्मत्यन्तर्हितेऽसति कुतो गत इति वितर्कयंतोऽपि ब्रह्ममुख्या देवादयः स्वधामनि विश
न्तं श्रीकृष्णं न ददृशुः न च हेतुः अविज्ञातगतिमिति किं चित् ददृशुस्त्वन्तानि विस्मिताश्च बभूवुरित्यर्थः ८ अविज्ञातगति
त्वं दृष्टान्तेन स्पष्टयति सौदामिन्या गतिर्यथा मर्त्यैर्न लक्ष्यते तद्वत् स्वलक्ष्यते तथा भ्रमंडलं हित्वा गच्छतः श्रीहरेस्त्या
दैवैरपि न लक्ष्यते किं तत्त्वार्थं दृष्टवेत्यर्थः अभिप्रायापरिज्ञानतः प्रथमं विस्मिता दृष्टान्तेन स्पष्टयन्नेन दृष्ट्वा पुनस्त
मेवार्थं प्रपंचयति राजन्निति त्रिभिः परस्य सर्वकारणस्य तनुभृन्त्याद्वा दितु जननाप्ययेहा आविर्भावतिरोभावचेष्टा
मायया यन्नटस्य कदालायमवेहि नटो यथाविष्ठं न पवनानारूपजन्मादीन्बिडंबयति तद्वत् १० ॥ ॥

श्री॰
भा॰ ए॰
टी॰
४५

आत्मनावस्थानाद्धि स्थित्यादिषु मन्त्रादिशंकायां वा हि सर्गनिरोधादिषु स्वस्यासाविवत्कृतं न प्रवासेत्याह सृष्ट्वेति आत्मना ।
स्वयमेवाह जगत्कृष्णान्तर्यामित्वेनानुप्रविश्यात्ममहिम्ना स्वमहिम्ना आत्मन उपरत्य यामनवयनोऽस्मिन्नेवावतारे तत्
प्रभावो निरतिशयोऽदृष्टेत्याह मर्त्येनेति १२ यमेन स्वलोकं प्रतिनीतं गुरुसुतं तेन मर्त्येनेति तेनैव शरीरेणानयत् अनुयत्
गृहीतवान् शरणदः शरणागतवत्सलः त्वां च ब्रह्मास्त्रदग्धं योऽरक्षितवान् यश्चान्तकानामन्तकमपीशं श्रीरुद्रं बाण
युद्धे जितवान् मृगयुं जरव्याधं सदेहं स्वर्गमनयत् किमिति स्वोऽसौ स्वावने रक्षणे अनीशः असमर्थः १३ तथापि स्म
स्थितिहि किं वा तत्र मनेनैव गुणाकिं नातिष्ठत् तथाहं तथापीति यद्यपि एवंप्रकारेणाशेषस्य जगतः स्थित्यादिषु

सृष्ट्वात्मनेदमनुविश्य विहृत्य चान्ते संहृत्य चात्ममहिनोपरतः स आस्ते ११ मर्त्येन यो गुरुसुतं यमलोकनी-
तं त्वां चानयच्छरणदः परमास्त्रदग्धं जिग्येऽन्तकान्तकमपीशमसावनीशः किं स्वावने स्वरनयन्मृगयुं स-
देहं १२ तथाप्यशेषस्थितिसंभवाप्ययेष्वनन्यहेतुर्यदशेषशक्तिधृक् नैच्छत्प्रणेतुं वपुरत्र शेषितं म-
र्त्येन किं स्वस्थगतिं प्रदर्शयन् १३ य एतां प्रातरुत्थाय कृष्णस्य पदवीं परां प्रयतः कीर्तयेद्भक्त्या तामे-
वाप्नोत्यनुत्तमां १४ दारुको द्वारकामेत्य वसुदेवोग्रसेनयोः पतित्वा चरणावस्रैर्न्यषिंचत्कृष्णविच्यु-
तः १५ कथयामास निधनं वृष्णीनां कृत्स्नशो नृप तच्छ्रुत्वोद्विग्नहृदया जनाः शोकविमूर्छिताः १६
तत्र स्म त्वरिता जग्मुः कृष्णविश्लेषविह्वलाः व्यसवः शेरते यत्र ज्ञातयो घ्नंत आननं १७ देवकी रोहि-
णी चैव वसुदेवस्तथा सुतौ कृष्णरामावपश्यन्तः शोकार्ता विजहुः स्मृतिं १८ ॥ ॥

तन्महेत्वनिरपेक्षत्वं कारणं स्वयं यद्यस्मादशेषशक्तिधृक् तथापि यदा वा संहर्तानि निजवपुः अत्र शेषितं कर्तुं नैच्छ-
त् किं तत्स्वमेव लोकं नयन् तत्र हेतुः मर्त्येन देहेन किं न किंचित्कार्यमिति स्वस्थानामात्मनिष्ठानां दिव्या
गतिमेव प्रकाशं प्रदर्शयन् अन्यथा तेऽपि दिव्यां गतिमनादृत्य योगबलेन देहसिद्धिं प्रिया याश्चैवं यतन्ते यतेरन् तन्मा
भूदिति मा न दर्श्यमिति भावः १३ यताभूत प्रकारोकथित प्रपंचापदवीतात्ति १४ तदेवं भगवतः स्वलोकं गच्छतो वा
सुदेवादीनामपि तत्पद्मप्रेय उपायः चिंतित आसीत्तमाह दारुक इत्यादिना १५ पतः कृष्णविच्युतः भगवद्वि-
रहमापन्नः तच्छोकोद्भवेनेत्रांबुना सिषिचे इत्यर्थः १७ कृष्णरामौ स्वनावपश्यन्तः १८ ॥ ॥

राम॰
४५

सदुक्तिभिः सत्या अवितथा उक्तयो येषु तैः नाहं प्रकाशः सर्वस्य योगमायासमावृतः लोकोयं नाभिजानाति मोढो माम
जमव्ययमित्यादिभिः २ नष्टगोत्राणां नष्टसंततीनां सांपरायिकं पिंडोदकादिकां क्रियां २४ आदितश्चारभ्य श्रीकृ

प्राणांश्च विजहुस्तत्र भगवद्विरहातुराः उपगुह्य पतींस्तात चितामारुरुहुः स्त्रियः २० रामपत्न्यश्च तद्देह
मुपगुह्याग्निमाविशन् वसुदेवपत्न्यस्तद्गात्रं प्रद्युम्नादीन्हरेः स्नुः २१ कृष्णपत्न्योविशन्नग्निं रुक्मिण्याद्या
स्तदात्मिकाः अर्जुनः प्रेयसः सख्युः कृष्णस्य विरहातुरः २२ आत्मानं सान्त्वयामास कृष्णगीतैः सदुक्तिभिः
बंधूनां नष्टगोत्राणामर्जुनः सांपरायिकीं २३ हतानां कारयामास यथावदनुपूर्वशः क्रियावकाव वि
धिवत्कृष्णस्यास्लेहविस्तुतः २४ द्वारकां हरिणा त्यक्तां समुद्रोप्लावयत्क्षणात् वर्जयित्वा महाराज श्री
मद्भगवदालयं २५ नित्यं सन्निहितस्तत्र भगवान्मधुसूदनः स्मृत्याशेषाशुभहरः सर्वमंगलमंगलः
२६ स्त्रीबालवृद्धानादाय हतशेषं धनंजयः इंद्रप्रस्थं समावेश्य वज्रं तत्राभ्यषेचयत् २७ श्रुत्वा सुहृद्वधं
राजन्नर्जुनात्ते पितामहाः त्वां तु वंशधरं कृत्वा जग्मुः सर्वे महापथं २८ य एतद्देवदेवस्य विष्णोः कर्माणि जन्म
च कीर्तयेच्छ्रद्धया मर्त्यः सर्वपापैः प्रमुच्यते २९ इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरिता
नि च शंतमानि अन्यत्र चेह च श्रुतानि गृणन्मनुष्यो भक्तिं परां परमहंसगतौ लभेत ३० इति श्रीभागवते
महापुराणे एकादशस्कंधे भगवदुद्धवसंवादे
मौसलोपाख्याने एकत्रिं
शोध्यायः ३१
समाप्तश्चा
यमेका
दशः

सर्वावतारकीर्तनस्य फलमाह य एतदिति द्वाभ्यां २७ शंतमानि सुखरूपाणि २८ निःपरममंगलानि परमहंसगतौ श्रीकृष्णे ३०
एवमेकादशस्कंधे यथाभावार्थदीपिका सात्तानथृत भीतेन श्रीधरेण प्रकाशिता इति श्रीभावार्थदीपिका
यामेकादशस्कंधे एकत्रिंशोध्यायः ३१ ॥

९६ एकादश स्कंध पत्राणि

१.१

॥